CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्र.४२१
२४४८

9.5
UHP

सारस्वती सुषमा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२४४८
सं ४२९

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

[त्रैमासिकी]



मार्गशीर्षपूर्णिमा २०१०

अष्टमवर्षे द्वितीयतृतीयाङ्कौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्ग संख्या सं. ४२१ प्राप्ति-संख्या २६४८

ग्रन्थ-कार्ड

श्री गणेश वर्णी दि० जैन (शोध) संस्थान

ग्रन्थागार

नरिया, वाराणसी-५

ग्रन्थ नाम सारस्वती सुषमा

लेखक सं० २०१०

लेनेवाले का नाम	देनेकी तिथि	लेनेवालेका हस्ताक्षर	लौटानेकी तिथि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२४८८
सं. ८२१

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

[त्रैमासिकी]

★

प्रधानसम्पादकः
श्रीत्रिभुवनप्रसाद उपाध्यायः
एम० ए०, व्याकरणाचार्यः

सहायकसम्पादकः
श्रीब्रजवल्लभद्विवेदो दर्शनाचार्यः

★

वार्षिकम्
७॥)

प्रत्यङ्कम्
२॥।=)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषय-सूची

भागवृत्तिसंकलनम्	—श्रीयुधिष्ठिरमीमांसकः ।	८३
वेदान्तावतारः	—श्रीशान्तिभिक्षुः, साहित्याचार्यः ।	१०७
साक्षिस्वरूपविचारः	—श्रीमुरलीधरमिश्रः, व्याकरणाचार्यः ।	१२३
षष्टितन्त्रम्	—श्रीमामराजदत्तः कापिलः, एम० ए० ।	१३१
राहुग्रासः	—ब्रह्मचारी गिरिजाप्रकाशः ।	१३६
नवभारते वर्णाश्रमव्यवस्था आवश्यकी न वा ?	—पण्डितराजराजेश्वरशास्त्री द्राविडः ।	१४३
हिन्दूधर्मसंहिताविमर्शः	—श्रीरघुनाथशर्मा, व्याकरणाचार्यः ।	१४७
प्राचीनपाठनिर्णयकुञ्जिका	—श्रीरामाज्ञापाण्डेयः, व्याकरणाचार्यः ।	१५६
कला तत्प्रयोजनं च	—श्रीद्विजेन्द्रनाथमिश्रः, साहित्याचार्यः ।	१६८
संस्कृतभाषायाः क्रमिको ह्रासः	—श्रीअजयमित्रशास्त्री ।	१७२
भारतशतकम् (खण्डकाव्यम्)	—श्रीमहादेवशास्त्री पाण्डेयः, साहित्याचार्यः ।	१७६
मायाजालम् (आख्यायिका)	—सौ० क्षमादेवी राव ।	१९५
न्यायनये शब्दार्थसम्बन्धविचारः	—श्रीबदरीनाथशुक्लः, न्यायाचार्यः, एम० ए० ।	२०४
शाब्दिकमते शब्दशक्तिस्वरूपम्	—श्रीभूपनारायणझा, व्याकरणाचार्यः ।	२०६

विविधम्

शून्य-निःस्वभाव-निरालम्बशब्दार्थविचारः	—श्रीजगन्नाथ उपाध्यायः, वेदान्ताचार्यः ।	२१४
वास्तवचन्द्रशृङ्गोन्नतौ स्थलविशेषद्वयविमर्शः	—श्रीमीठालाल ओझा, ज्यौतिषाचार्यः ।	२१६
कालिदासीयपद्येऽस्थानस्थपदता ?	—श्रीरघुनाथशर्मा, व्याकरणाचार्यः ।	२२१
महाभाष्यपाठविमर्शः	—श्रीरामशङ्करभट्टाचार्यः, शास्त्री ।	२२२
सिद्धान्तकौमुदीपाठविमर्शः	—श्रीरामशङ्करभट्टाचार्यः, शास्त्री ।	२२३
फिट्सूत्रसमीक्षा	—श्रीरामशङ्करभट्टाचार्यः, शास्त्री ।	२२३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पादकीयम्

देवनागरीलिपिप्रतिसंस्कारसंमेलनम् २२४

ग्रन्थाः

काण्वसंहिताभाष्यसंग्रहः (वेदः) आनन्दबोधभट्टोपाध्यायप्रणीतः। डा० सुभद्रझा-व्रजवल्लभद्विवेदाभ्यां संपादितः। १२१–१६८

बीजगणितावतंसः (गणितज्यौतिषम्) नारायणपण्डितविरचितः। श्रीचन्द्रभानुपाण्डेयेन ज्यौतिषाचार्येण संपादितः। ६–२४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयपत्रिका

८ वर्षः } भाद्रमार्गौ २०१० { २-३ अङ्कौ

भागवृत्तिसंकलनम्

श्रीयुधिष्ठिरमीमांसकः, प्राच्यविद्याप्रतिष्ठानम्, मोतीझील, काशी।

(पूर्वतोऽनुवृत्तम्)

४०–प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। (२।३।४६)

(५७) कथं वृक्षोऽयमिति ? क्रियाया अभावे कारकत्वाभावादनभिहितत्वाच्च। उच्यते—"कारकत्वमभिहितत्वं[1] च" इति भागवृत्तिः। [दुर्घटवृत्तिः–पृ० ४६]

४१–क्तस्य च वर्तमाने। (२।३।६७)

(५८) (वर्तमानक्तेन भूतक्तस्य बाधनात् त्वया ज्ञातो मयाऽर्चित इत्यादयोऽपशब्दा इति भागवृत्तिः। [द्र० ३।२।१८८ सूत्रोद्धरणानि])

४२–द्विगुरेकवचनम्। (२।४।१) (?)

(५९) यत्तु 'द्विगु'-[२।४।१] [2]सूत्रे भागवृत्तिकारेणोक्तम्—"समाहरणं समाहार इति भावे घञ् इति स्थिते यदुक्तं कर्मसाधने पञ्चकुमार्यः समाहृताः पञ्चकुमारि इति

---

१ "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" [२।३।४६] इति भाष्यवचनात् क्रियात्वे गम्यमाने कारकत्वमभिहितत्वं चोभयमुपजायत इति भावः।

२ परिभाषावृत्तिसम्पादकेन [२।१।५१] संख्या निर्दिष्टा सा त्वशुद्धा प्रतिभाति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'गोस्त्रियोरुपसर्जनस्य' [१।२।४८] इति न प्राप्नोति । एवं तर्हि भावसाधनः"[१] इति। [परिभाषावृत्तिः–पृ० ७६]

४३–तद्राजस्य बहुषु तेनैवास्त्रियाम्। (२।४।६२)

(६०) कथम्······'कौरव्याः पशवः'·····इति वेणी [१।२५] ? यतः–'कुर्वादिभ्यो ण्यः' [४।१।१५१] इत्यक्षत्रियवृत्तिकुरुशब्दात् सावकाश इति क्षत्रियवृत्तेः–'कुरुनादिभ्यो ण्यः' [४।१।१७२] इति भाव्यम्। तस्य च तद्राजत्वाल्लुक्।······उच्यते—"कुर्वादिभ्यो ण्यः' [४।१।१५१] इत्यत्रापि क्षत्रियगोत्रग्रहणानुवृत्तेः[२] सोऽपि क्षत्रियगोत्रवचनादेव, तस्यातद्राजत्वादलुक्" इति भागवृत्तिः। [दुर्घटवृत्तिः–पृ० ५२]

(६१) 'परस्परं परिरेभिरे कुकुरकौरवस्त्रियः' इति माघः [१३।१६], तथा-'सोऽयं मद्भुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः' [वेणी ३।४७] ? 'कच्छादि'-[४।२।१३३] पाठात् 'मनुष्यतत्स्थयोर्वुञ्' [४।२।१३४] इति वुञा भाव्यम्। उच्यते—शब्दव्युत्पत्तेर्विवक्षाधीनत्वाद् मनुष्याणां कुरुशब्देनाविवक्षितत्वान्न वुञ्। ततश्च तस्येदमित्यर्थेऽण्, जनपदविवक्षायां वाञ्। "विषयो देशे' [४।२।५२] इत्यणि तात्पर्यात्" इति [३]भागवृत्तिः। [दुर्घटवृत्तिः–पृ० ५३]

४४–यङोऽचि च। (२।४।७४)

(६२) "चकारात् 'बहुलं छन्दसि' [२।४।७३] इति सर्वमनुवर्तते। तेन बाहुल्यादनच्यपि छन्दस्येव यङ्लुक्। भाष्ये तु हुश्नुग्रहणज्ञापक-[६।४।८७] बलाद् बोभवीतीत्येव पदं भाषायां साधु, नान्यत्" इति [४]भागवृत्तिः। [भाषावृत्तिः–पृ० १०६]

---

१ सीरदेवो भागवृत्तिकारमतं प्रत्याचक्षाण आह–"तदयुक्तम्, यतः–'गोस्त्रियोरुपसर्जनस्य' [१।२।४८] इत्यस्याभावे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' [१।२।४७] इति विद्यत एव। नपुंसकत्वं तु 'स नपुंसकम्' [२।४।१७] इत्यनेन। अत एव 'स्वमोर्नपुंसकात्' [७।१।२३] इति लुका न विभक्तिश्रुतिः। [परिभाषावृत्तिः–पृ० ७६]

२ क्षत्रियगोत्रग्रहणं कुतोऽनुवर्तत इति तु न व्यक्तीकृतं भागवृत्तिकृता। न हि कुतश्चित्तस्यानुवृत्तिः सम्भवति।

३ प्रकृतसूत्रेऽयं पाठोऽन्यसूत्रे वेति न निश्चितं शक्यते वक्तुम्। दुर्घटवृत्तौ त्वत्रैव सूत्र उद्धृतः।

४ अत्र भागवृत्तिमतमेव युक्तम्। ये त्वत्र 'छन्दसि' पदं नानुवर्तयन्ति, तेषां मते बहवो दोषाः। यथा—

(क) अननुवर्तने छन्दसि पदे भाषायां स्वतः सिद्धे 'यङ्लुग् भाषायामपि भवति'इति ज्ञापकं [महाभा० ६।४।८७] व्यर्थं स्यात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(६३) यङो लुग् बहुलम्, प्रकृतिवत् परस्मैपदी चेति। भागवृत्तिकारस्तु बोभवीतीत्येव न छान्दसमिति मन्यते।

[कविकण्ठहारविरचिते चर्करीतरहस्ये। द्र०–लायब्रेरी आफ दी इण्डिया आफिस, कैटोलाग जिल्द १, भाग २, ग्रन्थ नं० ७८३]

४५–बाष्पोष्मभ्यामुद्वमने। (३।१।१६)

(६४) "धूमाच्चेति भर्तृहरिः" इति भाषावृत्तिः। अत्राह [1]सम्पादकः–"भर्तृहरिः भागवृत्तिकारः" इति।

४६–सर्त्तिशास्त्यर्त्तिभ्यश्च। (३।१।५६)

(६५) अत एव 'पुषादिद्युतादि-लृकारानुबन्धार्त्तिसर्तिशास्तिभ्यश्च परस्मै' इत्येकीकृतं कौमारैः [कातन्त्र० ३।४।२८], भागवृत्तौ च यथाश्रुतं यथाभाष्यं च सूत्रं व्याख्यातम्।

[[2]शब्दसाम्राज्यम्]

(ख) भाषायां सति यङ्लुकि 'रोरवीति' इत्यत्र 'दृष्टानुविधिश्छन्दसि' इति भाष्यकारीयं वचनमसमञ्जसं स्यात्। [द्र०–महाभा० १।१।५]।

(ग) "यङ्लुग् भाषायामपि भवति। किमेतस्य ज्ञापने प्रयोजनम्? बेभिदीति चेच्छिदीतीत्येतत् सिद्धं भवति भाषायामपि" [६।४।८७] इति भाष्यवचन उभयत्र 'अपि'-पदस्य सामञ्जस्यं न प्रकल्पते।

(घ) 'च्छ्वोः शूड०' [६।४।१९] इत्यत्र क्ङिद्ग्रहणानुवृत्त्यननुवृत्ती प्रकृत्य-'तत्र त्वेतावान् विशेषः' इति भाष्यकारव्याख्यानुसारं वकारान्तानां भाषायां यङ्लुग् न भवतीति ज्ञाप्यते, अन्यथा दिवादीनां यङ्लुगन्तानां तिबादिषु क्ङिद्ग्रहणानुवृत्तौ ऊठ् न स्यात्, अननुवृत्तौ च स्यादित्येषोऽपि भेदः स्यात्। न चायं विशेषो भाष्यकारेण प्रतिपादितः। अत एव कैयट आह–छान्दसो यङ्लुक्। न चैते छन्दसि प्रयोगा दृश्यन्ते। भाषायां तु 'हुश्नुवोः सार्वधातुके' [६।४।८७] इत्यत्र हुश्नुग्रहणज्ञापकात् क्वचिदेव यङ्लुग् भवति न सर्वत्र। अन्यथा–'यङोऽचि च' [२।४।७४] इत्यत्र छन्दोग्रहणानुवृत्तिरनर्थिकैव स्यादिति भाष्यकारस्य दर्शनम्। [कैयटे ६।४।१९]

(ङ) नागेशभट्टोऽपि–"छान्दस एव यङ्लुक्, भाषायां तु क्वाचित्क एव" इत्यत्रानुकूलः। द्र० भाष्यप्रदीपोद्योतः–१।१।५ ६।४।८७; एतेन चान्द्रादीनां भाषायां 'यङो वा' [६।२।३५] इति सूत्रेण सामान्येन यङ्लुग्विधानं चिन्त्यमेव।

१ भाषावृत्तिसम्पादकस्यैतद्वचनं चिन्त्यम्। [द्रष्टव्यम्–संस्कृत व्याकरणशास्त्र का इतिहास भाग १, पृ० २७०, टि० १]

२ द्रष्टव्यम्–मद्रास राजकीय हस्तलेख पुस्तकालय भाग ३, खण्ड १ बी० पृष्ठ ३३९३, पुस्तकसंख्या २४४५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४७–चरेष्टः । (३।२।१६)

(६६) कथं 'प्रेक्ष्य स्थितां सहचरीम्' इति रघुः [?] अधिकरण इत्यनुवृत्तेः । उच्यते—"चिन्त्यताम्" इति भागवृत्तिः । [दुर्घटवृत्तिः–पृ० ५६]

४८–लिटः कानज् वा । (३।२।१०६)

४९–क्वसुश्च । (३।२।१०७)

(६७) क्वसुकानचौ छन्दस्येव विहिताविति भाष्यव्याख्यातृभिर्व्यवस्थितम् । अत एव भाषाभागे भागवृत्तिकृद् भाषावृत्तिकारश्च क्वसुकानज्विधानलक्षणं न लिखितवान्[1]

[संक्षिप्तसारटीका–तिङन्त० ८२६]

५०–यजजपदशां यङः । (३।२।१६६)

(६८) वदेर्यङ्लुगन्तादूकः–'वावदूकश्च वक्तरि'[2] इति भागवृत्तिः ।

[उज्ज्वलदत्तस्य–उ० वृ० पृ० १५३]

५१–मतिबुद्धिपूजार्थेभ्यश्च । (३।२।१८८)

(६९) "इह वर्तमानक्तेन भूतक्तस्य बाधनमिष्यते । तेन 'त्वया ज्ञातो मयार्चितः' इत्याद्यचिकित्स्यम्" इति भागवृत्तिः । [भाषावृत्तिः–पृ० १६१]

(७०) कथं 'त्वया ज्ञातो वधाद् भीतः' [?] इत्यादि..........। उच्यते—अपशब्द इति पदे [?] भागवृत्तिः । [दुर्घटवृत्तिः–पृ० ६३]

(७१) "वर्तमानक्तेन भूतक्तस्य बाधनमिष्यते । तेन 'त्वया ज्ञातो मया ज्ञातः' इत्याद्यचिकित्स्यम्" इति भागवृत्तिरिति भाषावृत्तिः । [दुर्घटवृत्तिः–पृ० ६३]

---

१ 'न लक्षितवान्' इति पाठान्तरम् ।

२ तुलना कार्या—'वावदूकोऽतिवक्तरि' [३।१।३५] इत्यमरः । अत्र क्षीरस्वामी–"यजजपेत्यत्र वदेरनुपदेशः कार्य इति पदकारवाक्यादूकः"इत्याह । पदकारशब्देन नात्र भाष्यकारोऽभिप्रेतः, भाष्ये तादृशपाठस्यानुपलम्भात् । यद्वा भाष्येऽयं पाठस्त्रुटितः स्यात् [द्र०–सं० व्याकरण-शास्त्र का इतिहास पृ० २५१] । टीकासर्वस्वकारस्तु–"वदेर्यङन्तात् 'यजजपदशां यङः' [३।२।१६६] इति बहुवचननिर्देशादन्यतोऽपि 'ऊकः' इति धातुपारायणम् । चेक्रीयन्तानां 'यजिजपिदंशिवदाम्' इत्यूक इति कालापाः" इत्याह । भानुजिदीक्षितस्तु–"कुर्वादिषु [गण० ४।१।१५१] वावदूकशब्दपाठाद् वदेरूकः" इत्याह [अमरटीका ३।१।३५] ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(७२) कथं भूते क्ते सति 'त्वया शीलितो मया ज्ञातः' इति, बुद्ध्यर्थत्वाद्वर्तमानक्तेन भूतक्तस्य बाधनात् । अत एव 'क्तस्य च वर्तमाने' [२।३।६७] इति षष्ठी न भवति । यदि वर्तमानक्तस्य ग्रहणं स्यात् तर्हि 'क्तस्य च वर्तमाने' इति षष्ठी स्यात् । "कालदुष्टा एवापशब्दा" [इति] भागवृत्तिः । [दुर्घटवृत्तिः–पृ० ६३]

(७३) 'त्वया ज्ञातो मया ज्ञातः' इत्यसाधुरिति भागवृत्तिः ।

[संक्षिप्तसारवृत्तिः–कारक० १७७]

(७४) आह चैतत् सर्वं सुधाकरः—"अनेन वर्तमाने क्तेन भूते प्राप्तः क्तो बाध्यत इति [1]भर्तृहरिः । [2]भाष्यटीकाकृतस्तु भूतेऽपि भवतीत्यूचुः ।

[दैवस्य पुरुषकारव्याख्यायाम्–पृ० १०६]

५२–परिमाणाख्यायां सर्वेभ्यः (३।३।२०)

(७५) कथम्—'एकोऽपि तव निश्चयः' इति ? [3]"पदसंस्कारेण" इति भागवृत्तिः ।

[धातुवृत्तिः–पृ० ३१४ (चिञ्धातौ)]

५३–प्रथने वावशब्दे । (३।३।३३)

(७६) अशब्दविषये प्रथने वाच्ये वेः परात् स्तृणातेर्घञोऽभावात् "वस्तुविस्तरे" इत्यसाधुरयं प्रयोग इति चेत्, तच्चु नातिश्लिष्टम् । यतः सूत्रे प्रथनं विस्तीर्णत्वमभिप्रेतम् । तदाह काशिकाकारः—"प्रथनं विस्तीर्णता" इति । न चात्र विस्तरशब्देन वस्तूनां विस्तीर्णत्वमभिप्रेतम्, अपि तु बाहुल्यम् । यथा तृणस्य विस्तर इत्यत्र । अत एव "प्रथनमिति किम् ? तृणविस्तारः" इति प्रत्युदाहृतम् । अस्य चार्थं भागवृत्तिकारोऽपि अञ्जसाऽःय (? सा व्या) ज्ञीत्–"तृणस्य विस्तरो बाहुल्यमित्यर्थः" । तत्कथं प्रथने वर्तमानादस्माद्धातोर्घञ् भवितुमर्हतीति । [पण्डितदुर्वेकमिश्रकृतहेतुबिन्दुटीकालोकः–पृ० २६२]

---

१ कोऽयं भर्तृहरिरिति न ज्ञायते । पूर्वोद्धरणानां तुलनया कदाचिदयं भागवृत्तिकृतो निर्देशः स्यात् ।

२ क इमे भाष्यटीकाकृत इति न ज्ञायते । कदाचिदत्र पूजायां बहुवचनं स्यात् । तथा सति किमयं वाक्यपदीयकारो महाभाष्यव्याख्याताऽशेषशब्दविद् भर्तृहरिः संभवति ? प्रदीपकारस्त्वयं नैव संभवति, तस्य तक्रकौण्डिन्यन्यायेन वर्तमानक्तेन भूते क्तस्य बाधाश्रयणात् ।

३ 'पदसंस्कारपक्षे भविष्यति' इति भाषावृत्तिः [३।३।२०]।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५४–उदि श्रयतियौतिपूद्रुवः । (३।३।४९)

(७७) 'उच्छ्रायः....[1]उच्छ्रयः' [अमर० २।४।१०] । भागवृत्तिकारस्तु 'उच्छ्रयम्' नेच्छति । [संक्षिप्तसारटीका–कृदन्त० २८१]

५५–एरच् । (३।३।५६)

(७८) "वाऽसरूपेण' [३।१।९४] क्तादयोऽपि भवन्ति । भीतं शिशुना, वृष्टं देवेन, वर्षणं मेघस्य" इति भागवृत्तिः । [भाषावृत्तिः–पृ० १७१]

५६–अ प्रत्ययात् । (३।३।१०२) (?)

(७९) "कण्डूतिरसाधुः" इति भागवृत्तिः । [टीकासर्वस्वम्–भा० २ पृ० ३११]

५७–अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा । (३।४।१८)

(८०) "भावेऽपि हि प्रत्यये सकर्मकाद् धातोः पश्चात् कर्मसंबन्धो भवत्येव । पाक ओदनस्य, कटं कृत्वा शेते, गम्यते मया ग्रामम्" इति भागवृत्तावुक्तम् । [भाषावृत्तिः–पृ० १८९]

('लः कर्मणि च' [३।४।६९] सूत्रमपि द्रष्टव्यम् ।)

(८१) भावेऽपि प्रत्यये सकर्मकस्य धातोः कर्मापेक्षा चेत् कर्मसंबन्धो भवत्येव । यथा–गम्यते मया ग्राममिति भाषावृत्तिर्भागवृत्तिश्च । [हरिनामामृतम्–सू० ९६६]

५८–कषादिषु यथाविध्यनुप्रयोगः । (।४।४६)

(८२) "स[2] च क्रियासमभिहारानुपयोगवद् व्यवधानेऽपि भवति । यथा—घृतनिधाय-मुदकं निदधाति" इति भागवृत्तिः । [भाषावृत्तिः–पृ० १९३]

५९–सप्तम्यां चोपपीडरुधकर्षः (३।४।४९)

(८३) "अत्र णमुल्विधावुपसर्गग्रहणं पीडेरेव [3]विशेषणम्" इति भागवृत्तिः ।

[धातुवृत्तिः–पृ० २०० (कृषधातौ)]

---

१ कथं 'पतनान्ताः समुच्छ्रयाः' [महा० शान्ति० २७।३१] इति । वक्ष्यमाणं विभाषाग्रहणमिह सिंहावलोकितन्यायेन सम्बद्ध्यत इति काशिकाकारः ।

२ अनुप्रयोग इत्यर्थः ।

३ 'धनुररिभिरसह्यं मुष्टिपीडं दधाने' [भट्टि० १।२६] इति प्रयुञ्जन् भट्टिकारस्त्वतन्त्रं मन्यते । धातुवृत्तिकारो [पृ० २००] भट्टिभागवृत्त्योर्मतमेवं निराचष्टे—"इदं तावत् साहसमात्रम्, यदाचार्येण प्रत्युक्तस्यातन्त्रत्वाङ्गीकरणम् । यदपि पीडिनैव सम्बन्धकथनं तदपि न न्याय्यम्, बह्वच्कस्यास्य पूर्वनिपातायोगात् । अत एव वृत्तिन्यासपदमञ्जर्यादिषु सम्बन्धोऽङ्गीकृतः" इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(८४) [1]केचिद् उपशब्दस्य पीडयतिनैव संबन्धमाहुः ।

[धातुवृत्तिः–पृ० ३४८ (रुपधातौ)]

(८५) उपपूर्वाणामेवैषां ग्रहणमिच्छन्ति जयादित्यदुर्गसिंह[2]धर्मदासाः[3] । तदिह नेष्टम् । एतदर्थमेव 'हस्तरोधं दधनुः' [?] इति भट्टिप्रयोगो दर्शितः । भागवृत्तिकृताऽप्येतदेवेष्टम् । [संक्षिप्तसारटीका–कृदन्त० ४३७]

९०–लः कर्मणि च भावे चाकर्मकेभ्यः (३।४।६९) (?)

(८६) 'गम्यते ग्रामं विप्रेण' इत्याद्यपि भावे भवतीति भागवृत्तिकृतोक्तम् ।

[संक्षिप्तसारटीका–कृदन्त० १८०]

यत्तु भागवृत्तिमतनिराकरणे–"इदं तावत् साहसमात्रं प्रयुक्तस्यातन्त्रत्वाङ्गीकरणमित्युक्तम्" तन्न, दृश्यते ह्यन्यत्रापि प्रयुक्तस्यातन्त्रत्वम् । यथा–'तस्यादित उदात्तमर्धह्रस्वम्' इत्यत्र ह्रस्वग्रहणम् [द्र०–काशिका १।२।३२] । अपि च 'बह्वच्कस्य पूर्वनिपातायोगात्' इति यो हेतुरुक्तः सोऽप्ययुक्तः, भवति ह्यन्यत्रापि बह्वच्कस्य पूर्वनिपाते उपसर्गस्यैकेनैव धातुना सम्बन्धः । यथा–'नाम्न्यादिशिग्रहोः' [३।४।५८] इति । अत्र ह्याङो दिशिनैव सम्बन्धः, न तु ग्रहिणा । स्वयमपि ग्रहधातौ तथैव प्रयुङ्क्ते–'नामग्राहमाह्वयति' इति । तस्मादत्रापि केवलं पीडयतिनैव सम्बन्धः सम्भवति । यदि तु नेष्यते तर्हि हेत्वन्तरं वाच्यम् । भाषावृत्तिकारोऽपि भागवृत्तिमतमनुसरति [द्र०–पृ० १९३] ।

शब्दरत्नकारस्तु पूर्वोक्तं भट्टिप्रयोगं घञन्तं मन्यते । तदाह–'धनुररिभिरसह्यं मुष्टिपीडं दधाने' इति भट्टिप्रयोगे तु न णमुलन्तम् । किन्तु घञन्तम् । क्रियाविशेषणत्वाच्च द्वितीयेति बोध्यमिति [श० र० पृ० ८३८] ।

1 केचित्पदेन भागवृत्तिकारोऽत्राभिप्रेतः ।

2 कातन्त्रवृत्तिकारः ।

3 धर्मदासो चान्द्रव्याकरणस्य वृत्तिकारः । नायं वृत्तिकारस्यैवाभीष्टमपि तु–'सप्तम्यां चोपात् पीडरुधकर्षेभ्यः' [१।३।१४१] इति सूत्रे 'उपात्' इति पृथक्पदस्य निर्देशात् सूत्रकारस्य चन्द्रगोमिनोऽप्यभीष्टम् । जैनशाकटायनव्याकरणकारोऽपि–'तत्सप्तम्योपात् पीडरुधकृषः' [४।४।१५७] इति सूत्रे 'उपात्'-पदं पृथक् पपाठ । तेनोभयोर्मते उपपदस्य सर्वधातुभिः सह सम्बन्धः स्पष्ट एव । भोज [सं० कं० २।४।२६४]–देवनन्दि [जैनेन्द्र० २।४।३५]-हेमचन्द्र [५।४।७५]-कातन्त्रकार [कृद्वृत्ति० ४६४] प्रभृतय उपपदं धातुभिः सह समस्य [उपपीडरुधकर्ष०] निर्दिशन्ति, व्याख्यायां च सर्वधातुभिः सहोपसर्गं सम्बध्नन्ति । एवं च कृत्वा सर्वव्याकरणसम्प्रदायेषु भट्टिकारभागवृत्तिकारावेव 'उप'-पदं केवलं पीडयतिना सम्बध्नीतः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(अलंखल्वोः [३।४।१८] सूत्रमप्यत्र द्रष्टव्यम्। संक्षिप्तसारटीकाकृता कृदन्तप्रकरणेऽस्य पाठस्योद्धरणात् कदाचिदयं पाठः–'अलंखल्वोः' [३।४।१८] इति सूत्रवृत्तावेव स्यादिति संभाव्यते।)

६१–न षट्स्वस्रादिभ्यः (४।१।१०)

(८७) भागवृत्तिकारस्तु नप्तृशब्दमपि स्वस्रादिषु पठित्वा [1]'नप्ता कुमारी' इत्युदाजहार।
[शब्दकौस्तुभः–भा० ३ पृ० १०]

(८८) भागवृत्तिकृद् नप्तृशब्दं स्वस्रादौ पठितवान्। [दुर्घटवृत्तिः–पृ० ७४]

६२–वर्णादनुदात्तात् तोपधात् तो नः। (४।१।३९)

(८९) वाऽनुवृत्तिर्जयादित्यचन्द्रप्रभृतिभिरुक्ता। वाचस्पत्यादिकोशे च विकल्पो दृश्यते। भाष्येऽनुदाहृतत्वाद् भागवृत्तिकृता नित्यत्वमुक्तम्। भागुरिवोपालितादिकोशे नित्यत्वमुदाहृतम्। [संक्षिप्तसारटीका–तद्धित० ४६]

६३–चन्द्रभागान्नद्याम्। (४।१।४५ ग० सू०)

(९०) तस्माच्चन्द्रभागान्नद्यामिति पाणिनीयानां ह्रस्वादिपाठः[2]। तेषामेव भ्रमपरम्पराविरोधादपपाठ इति भागवृत्तिकृतोपेक्षितः। [संक्षिप्तसारटीका–तद्धित० ७४]

६४–न प्राच्यभर्गादियौधेयादिभ्यः। (४।१।१७८)

(९१) कथं 'प्राक्, केकयीतो भरतस्ततोऽभूत्' [भट्टि० १।१४] इति? "आद्यप्रकृतेरेव कुलद्वारेण सोऽयमिति स्त्रीवृत्तेः 'शार्ङ्गरवाद्यञो ङीन्' [४।१।७३]" इति भागवृत्तिः।
[भाषावृत्तिः–पृ० २२९]

६५–दध्नष्ठक्। (४।२।१८)

(९२) केचिद् दध्नि संस्क्रियत इत्यर्थविवक्षायां टन्[3] माभूदित्याहुः। न हि किञ्चिद् दध्नि संस्क्रियमाणं प्रसिद्धमस्ति। यस्याभिधानं दाधिकम्? स्पष्टार्थं वचनमिति भागवृत्तिः।
[संक्षिप्तसारटीका-तद्धित० १६२]

---

१ 'नप्तेति भागुरिः' इति भाषावृत्तिकारः [पृ० २०४]। अमरस्तु–'नप्त्री पौत्री सुतात्मजा' [२।६।२९] इत्याह।

२ संक्षिप्तसारे–'चान्द्रभागान्नद्याम्' इति दीर्घादिपाठः।

३ पाणिनीयानां ठग् इत्यर्थः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

६६–भिक्षादिभ्योऽण्। (४।२।३८)

(९३) भागवृत्तिकारः–"युवतीनां समूहो यौवनम्"[1] इत्याह। [परिभाषावृत्तिः-पृ० ५८]

(९४) युवतिशब्दाद् यौवतमिति जयादित्यः। "भस्याढे तद्धिते' [६।३।३५ वा०] इति पुंवद्भावे यौवनम्" इति भागवृत्तिः। [भाषावृत्तिः–पृ० २३५]

(९५) (युवतीनां समूहः) "पुंवद्भावे यौवनम्"इति भागवृत्तिः।

[हरिनामामृतम्–सू० २३६५]

६७–नडशादाद्ड्वलच्। (४।२।८८)

(९६) "पङ्कवाचिनः शादशब्दाद् ड्वलज् न भवति, अनभिधानात्। शष्पवाचिन एव भवति" इति भागवृत्तिः। [टीकासर्वस्वम्–भा० २ पृ० ११]

(९७) शष्पवाचिन एव (शादशब्दात्) भवतीति भागवृत्तिः।

[संक्षिप्तसारटीका–तद्धित० ३४०]

६८–शेषे। (४।२।९२)

(९८) "इह चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। अश्वैरुह्यते आश्वो रथः। चातुरं शकटम्। दृषदि पिष्टा दार्षदा माषाः। औलूखलाः सक्तवः। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। इति सामान्येन 'तस्येदम्' [४।३।१२०] इति विवक्षायाम्" इति भागवृत्तिः।

[भाषावृत्तिः–पृ० २४३]

६९–अग्रपश्चाड्डिमच्[2]। (४।३।२३ वा०)

(९९) "अग्रपश्चाड्डिमजिति छान्दसम्" इति भागवृत्तिः। [भाषावृत्तिः–पृ० २५४]

७०–पदोत्तरपदं गृह्णाति। (४।४।३९)

(१००) पदोत्तरपदिकः। एतद् भागवृत्तिकृतो [3]भाषावृत्तिकृतश्चाभीष्टम्। [4]जयादित्येन त्वन्यथा व्याख्यातम्। [संक्षिप्तसारटीका–तद्धित० १९५]

---

१ तथा च दृश्यते—"रूपलावण्यसम्पन्नं कलाकुशलयौवनम्। यस्य पुण्यकृतः प्रेष्यं सफलं तस्य जीवितम्॥" इति सीरदेवोद्धृतः श्लोकः। [परिभाषावृत्तिः–पृ० ५८]

२ 'अग्रादिपश्चाड्डिमच् स्मृतः' इति भाष्यवार्त्तिकम्।

३ 'पदोत्तरपदिकः' इत्यत्र भाषावृत्तिकृतो या सम्मतिर्निर्दिष्टा सा चिन्त्या। भाषावृत्तौ तादृशोदाहरणस्यानुपलम्भात्, पौर्वपदिक औत्तरपदिकः प्रातिपदिकमित्याद्युदाहरणानां दर्शनाच्च।

४ जयादित्येन तु पदशब्द उत्तरपदं यस्य तस्मादित्येवं व्याख्याय पौर्वपदिकः, औत्तरपदिक इत्युदाहरणे उपन्यस्ते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

७१-स्तेनाद्यन्नलोपश्च । (५।१।१२५)

(१०१) "स्तैन्यशब्दस्तु [1]पाञ्चायतलौहितक इतिवदागमिकः" इति भागवृत्तिः ।
[भाषावृत्तिः–पृ० ३०६]

७२-योपधाद् गुरूपोत्तमाद् वुञ् । (५।१।१३२)

(१०२) साहाय्यमित्यपि ब्राह्मणादि-[५।१।१२४] त्वादिति जयादित्यः । नेति भागवृत्तिः । [भाषावृत्तिः–पृ० ३१०]

(१०३) जयादित्यमतेन साहाय्यमित्यपि, न भवति चेति भागवृत्तिः ।
[दुर्घटवृत्तिः–पृ० ८६]

(१०४) साहाय्यमिति जयादित्यः, नेति भागवृत्तिः । [हरिनामामृतम्–सू० २९०६]

७३-धान्यानां भवने क्षेत्रे खञ् । (५।२।१)

(१०५) धान्यशब्देनात्र तद्विशेषवाचिनः शब्दा गृह्यन्ते, न तु धान्यशब्दः । ....भागवृत्तिकारस्तु 'धान्यीनम्' उदाजहार । [संक्षिप्तसारटीका-तद्धितपरि० ६०३]

(१०६) भागवृत्तिकारस्तु 'धान्यकम्' (? धान्यीनम्) उदाजहार ।
[अनिर्ज्ञातकर्तृकाऽमरटीका–द्र० मद्रास ओरियण्टल जर्नल सन् १९३२ पृ० २५३]

(भाषावृत्तिकारो धान्यविशेषवाचिन उदाहरन् 'धान्यीनम्' अप्युदाजहार । तेन तन्मते धान्यपदस्य स्वं रूपं तद्विशेषवाचिनश्चेत्युभयमपि गृह्यत इति स्पष्टम् ।)

७४-अद्यश्वीनाऽवष्टब्धे । (५।२।१३)

(१०७) कथमद्यश्वीनो वियोगः ? विजायत इत्यस्यानुवृत्तेरिति जयादित्यः । "स्त्रीलिङ्ग-निर्देशादुपमानस्याप्यसंभवान्नैतत्" इति भागवृत्तिः । [भाषावृत्तिः–पृ० ३१४]

७५ सस्येन परिजातः । (५।२।६८)

(१०८) ....सस्यकः ॥ १८७६ ॥

---

[1] इमं सृष्टिधर इत्थं व्याचष्टे—"पञ्चायतस्य भावः पाञ्चायतम् । लोहितको मणिः, तस्य भावो लौहितकम् । एतौ शब्द्येते । न चानयोरञोऽणो वा विधाने सूत्रमस्ति । तथा च 'अण्' इति योगविभागाद् यथेदं तथा स्तेनात् स्तैन्यमिति च कल्प्यमिति भावः । आगमः परम्परा, तत आगत आगमिकः । 'चौरिका स्तैन्यचौर्ये च' [२।१०।२५] इत्यमरोऽपि"इति । [द्र० भा० वृ० पृ० ३०९ टि०]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भागवृत्तिकृता तूक्तं सस्यसम्पन्नवस्तुषु ।
व्रीहिशाल्यादिकेष्वेव स्थावरेष्वत्र भेदवत् ॥ १८८० ॥
यत्त्विदं गुणसम्पन्ने जयादित्येन भाषितम् ।
अतिलोकतया तस्य विरसत्वादुपेक्षितम्[1] ॥ १८८१ ॥

[नानार्थार्णवसंक्षेपः केशवकृतः–भा० २ पृ० २११]

७६ ऊषसुषिमुष्कमधो रः । (५।२।१०७)

नगपांसुपाण्डुभ्यश्चेति वक्तव्यम् । (काशिका)

(१०९) पाण्डुगुणयोगात् 'नगपाण्डुपांसुभ्यो रः' इति रः । अस्यानार्षत्वात् पाण्डुरोऽसाधुरिति भागवृत्तिकृतो दुर्ज्ञानं जयादित्यं प्रति वाग्यमात्रजनितम् । भाष्यविरुद्धं हिं चेदं न त्वयुक्तम्, वृद्धान्तरोक्तानामन्येषामपि ग्राह्यत्वात् । भाष्यानुक्तानां भट्टिकाव्योक्तानामन्यथाऽप्रामाण्यापत्तेः । अयं च शब्दार्णवकारादिभिरपि परमशिष्टैरनुशिष्टः ।

[रायमुकुटकृताऽमरटीका–द्र० ओरियण्टल कान्फ्रेंस बनारस जिल्द १, पृ० २७५]

९७ रजःकृष्यासुतिपरिषदो वलच् । (५।२।११२)

(११०) 'या सम्प्रति प्राक् परिषद्वलानाम्' इति व्योषः[2] । [3]'परिषद्वलान् महाब्रह्मैः' [४।१२] इति भट्टिः । (इह तु) नवाक्षरैकपादेऽपि वृत्तभेदोऽस्यास्तीति । यथा–'प्रधाने कर्मण्यभिधेये[4] लादीनाहुर्द्विकर्मणाम्'' [१।४।५१ भाष्ये] इति भागवृत्तिः[5] ।

[भाषावृत्तिः–पृ० ३२९] ।

(१११) ''कथम्–'परिषद्वलान् महाब्रह्मैः' इति भट्टिः, नवाक्षरेण च्छन्दोभङ्गात् । नवाक्षरेणैकपादे वृत्तभेदोऽस्ति । यथा–'प्रधाने कर्मण्यभिहिते लादीनाहुर्द्विकर्मणाम्' [१।४।५१

---

१ अयं भावः—भागवृत्तिकारमते सस्यकः शालिव्रीह्यादिष्वेव प्रयुज्यते । काशिकाकारस्तु–सस्यकः शालिः, सस्यकः साधुः, सस्यको मणिरिति सर्वत्र प्रयुक्तवान् ।
२ 'घोषः' इति दुर्घटवृत्तिः–पृ० ८६ (घोषोऽश्वघोष इत्यर्थः ।)
३ 'पर्षद्वलान्' इति साम्प्रतिकः पाठः ।
४ 'अभिहिते' इति दुर्घटवृत्तिः--पृ० ८७
५ भागवृत्तिकृतोद्धृतः पाठो भाष्येऽन्यथोपलभ्यते । तद्यथा—'प्रधानकर्मण्याख्येये' इति । अस्मिन् पाठेऽष्टाक्षरैकपाद एव । गणरत्नमहोदधिकारोऽप्येवमाह । द्रष्टव्याग्रिमा टिप्पणी ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भाष्ये] इति । तथा–'तस्मै तिलोदकं दद्यादपुत्राय भीष्मवर्मणे' । एवं च न छन्दोभङ्गः" इति भागवृत्तिः[1] । [दुर्घटवृत्तिः–पृ० ८७]

७८–किमोऽत् । (५।३।१२)

(११२) भागवृत्तिकारस्तु [2]भाषायामेतन्नेच्छति । [पदमञ्जरी–भा० २ पृ० ३३६]

(११३) त्र (ल) मपि केचिदिच्छन्तीति जयादित्यः । कुत्र क्व इति रूपद्वयम् । कुत्र इत्यस्मात् तमिति (?) भागवृत्तिः । [संक्षिप्तसारटीका–सुबन्त० ३२२]

७९–शीले को मलोपश्च । (५।३।७३ वा०)

(११४) "कुर्वन्त्येव हि तूष्णीकां राजन् गम्भीरवेपसः ।
लघवो घोषयन्त्येव न तु कुर्वन्ति किञ्चन ॥" इति भागवृत्तिः ।
[उज्ज्वलदत्तस्य–उ० वृ० पृ० १५२]

---

१ "आसुतिपरिषद्रजश्शब्दानां यौगिकत्वं केचित् प्रतिपन्नाः । तन्मते आसुतिमान् परिषद्वान् रजस्वान् ग्राम इत्यपि भवति । परिषच्छब्द एव गृह्यते । यस्त्विदानीन्तनपुस्तकेषु संयोगः परिषच्छब्दो (? संयोगवान् पर्षच्छब्दो) दृश्यते स प्रमादपाठ एव । पुराणेषु हि भाष्यपुस्तकेषु 'परिषदो वलच्' इति पाठः । काव्येषु–'श्रीहर्षो निपुणः कविः परिषद्प्येषा गुणग्राहिणी' इत्यादिषु परिषच्छब्द एव दृश्यते । कथं तर्हि—'परिषद्वलान् महाब्रह्मैराट नैकटिकाश्रमान्' इत्यनुष्टुप् ? अत्र हि रिशब्दे पृथगवस्थिते नवाक्षरः पादो भवति । न चैतद्युक्तम्–त्रयः पादा अष्टाक्षरा अनुष्टुप्, एको नवाक्षर इति । उच्यते–अयमप्यस्ति वृत्तप्रभेदो यत्रैकः पादो नवाक्षरोऽन्येऽष्टाक्षराः । यथा–"प्रधाने कर्मण्यभिधेये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणाम् ॥" [महाभा० १।४।५१] इति । अत्र ह्याद्य एव पादो नवाक्षरः, परिशिष्टा अनुष्टुभ एवेति कश्चिद् ब्रूते । तत्त्वतिसूक्ष्मेक्षिकयोच्यते, यतो व्याकरणलक्ष्यं च द्वाभ्यामपि शब्दाभ्यां व्याप्तम् । क्षीरस्वामिनाऽपि–'मार्ष मारिष इत्यपि, यथा पर्षत् परिषत्' [अमरटीका १।६।१४] इति टीकायां विवृतम् । किञ्च, यो नवाक्षरः पाद उदाहरणीकृतः, सोऽपि न संगच्छते, 'प्रधाने कर्मण्याख्येये' इति दर्शनात्" [गणरत्नमहोदधिः–पृ० २३८] । अत्रोद्धरणे रेखाङ्कितपदेष्वयं विशेषः—(१) रजस्वान् ग्रामः, अत्र धर्मशास्त्रेष्वसकृत् प्रयुज्यमानः 'रजस्वला नद्यः' इत्यनुसन्धेयः । (२) कश्चिद् ब्रूते भागवृत्तिकृदित्यर्थः । (३) द्वाभ्यामपि शब्दाभ्याम्–पर्षत्परिषच्छब्दाभ्यां वलज् दर्शनादित्यर्थः । "पृषोदरादित्वादिकारलोपे एकदेशविकारद्वारेण पर्षच्छब्दादपि वलज्" इति केशवः [भाषावृत्तिः–५।२।११२] । एतेन केशवमते सूत्रे 'परिषत्'-शब्दो द्रष्टव्यः ।

२ 'एतत्'-पदेन 'कुत्र' इत्यस्य परामर्शः । त्रलमपि केचिदिच्छन्तीति काशिका [५।३।१२] ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(११५) तथा च भागवृत्तौ श्लोकः—

"कुर्वन्तोऽपि हि तूष्णीका राजन् गम्भीरचेतसः।
लघवो घोषयन्त्येव न कुर्वन्ति च केचन॥" इति।

[भाषावृत्त्यर्थविवृतिः[१]]

८०–बहुव्रीहौ संख्येये डजबहुगणात्। (५।४।७३)

(११६) अत एव भागवृत्तिकृतोक्तम्—निस्त्रिंशाद्यर्थम्[२]।

[संक्षिप्तसारटीका–समास० २७६]

८१–शेषाद्विभाषा। (५।४।१५४)

(११७) 'नद्यृतश्च' इत्यतः 'शेषाद्विभाषा' इत्यत्र चकारोऽनुवर्तते। स चानुक्तसमुच्चयार्थः। तेन प्रतिषेधविषयेऽपि कः, निश्रेयस्क इति भागवृत्तिन्यासकाराश्रद्धयारक्षितः (?)।

[संक्षिप्तसारटीका–समास० २७६]

८२–सन्यङोः। (६।१।९)

(११८) भागवृत्तिकारस्त्वाह—"पूर्वसूत्रे [६।१।८] धातोरनभ्यासस्येति द्वयमपि प्रत्याख्याय भाष्यकारेणोक्तम्—'तिष्ठतु तावत् सांन्यासिकं धातुग्रहणम्' इति। उत्तरार्थमिति भावः। अनभ्यासग्रहणस्य तु न किञ्चित् प्रयोजनमुक्तम्, ततश्चोत्तरार्थमपि तन्न भवतीति भाष्यकारस्याभिप्रायो लक्ष्यते। तेनात्र[३] भवितव्यमेव द्विर्वचनेन" इति।

[पदमञ्जरी–भा० २ पृ० ४२६]

---

१ द्रष्टव्या–भाषावृत्तिः–पृ० ३४४ टि०।

२ अत्र–'डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थम्' इति, 'अव्ययादेरिति वक्तव्यम्' इति च वार्त्तिकमनुसन्धेयम्।

३ 'लोलूय + सन्' इत्यत्र। अयं भावः—अनभ्यासस्येति प्रत्याख्यानाद् यङन्तात् सनि भवितव्यमेव द्विर्वचनेन। तेन लोलूयतेः सनि 'लुलोयिषते' इति रूपं भागवृत्तिकारमत इष्टमिति गम्यते।

इदमत्रावधेयम्–चान्द्रभोजव्याकरणे विहायान्येष्ववर्वाचीनव्याकरणेष्वेकेषां मतेनाभ्यासस्य पुनर्द्वित्वमुच्यते। यथा—"चस्यैके, च (अभ्यास) संज्ञकस्य द्वे न स्त इत्येके, लोलूयिषते। अस्त्येवेत्यपरे, लुलोलूयिषते' इति शब्दार्णवचन्द्रिकाकारः [४।३।५]। "द्विरेकेषाम्" इति जैनशाकटायनम् [४।१।५०]। "द्विरुक्तस्य द्विर्वचनं न भवतीत्यर्थः। लोलूयिषते, पोपूयिषते। अन्येषां भवति—सुसोषूयिषते, प्राणिणिनिषते" इति तस्य चिन्तामणिवृत्तिः। "पुनरेकेषाम्"

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

८३–धात्वादेः षः सः । (६।१।६४)

अज्दन्त्यपराः सादयः षोपदेशाः स्मिङ्स्वदिस्विदिस्वञ्जिस्वपयश्च,
[1]सृपिसृजिस्तृस्त्यासेकृसृवर्जम् [महाभाष्यम्] ।

(११६) भागवृत्तौ तु 'सीकृसेकृ' इत्यधिकमपि पठ्यते[2] । तच्च 'सीकृ सेचने' इति श्रीधरो[3] व्याकरोत् । 'एतानष्टौ वर्जयित्वा' इति चाधिक्यं मुक्तकण्ठमुक्तवान् ।

[दैवस्य पुरुषकारटीका–पृ० १६]

८४–णो नः । (६।१।६५)

(१२०) 'नृ' इति प्रायो न [4]पठन्ति (भागवृत्तिकारादयः) । तथा च [5]श्रीधरो नृत्यागेन नृत्यादीन् पठित्वा 'एतान् सप्त वर्जयित्वा' इत्याह । [दैवस्य पुरुषकारटीका–पृ० ६६]

(१२१) [6]भागवृत्तौ तु नाधृधातुरपि णोपदेशः पठ्यते ।

[संक्षिप्तसारटीका–तिङन्त० १७६]

इति हैमव्याकरणम् [४।१।१०] । "एकेषां मते द्वित्वे पुनर्द्वित्वं स्यात्" इति तदीया लघ्वी वृत्तिः । चन्द्रस्तु-"पुनः" [५।१।६], यद्द्विरुक्तं तत् पुनर्न द्विरुच्यते । जुगुप्सिषते, लोलूयिषते" इति स्पष्टं पुनर्द्विर्वचनं प्रतिषिद्धवान् । भोजोऽपि चान्द्रमतमनुससार । यत्तु भोजव्याकरणसूत्रसम्पादकेन–'अयि रः', 'पुनः' इति द्वे सूत्रे एकीकृत्य मुद्रापिते तदयुक्तम् ।

१ 'सृपिसृजिस्तृस्तॄस्त्यासेकृवर्जम्' ······ 'स्तृ' इति ह्रस्वान्तं केचिन्न पठन्ति । तथा च 'स्तॄञ् छादने' इति दीर्घान्तमेव जिनेन्द्रादयः प्रायः पठन्ति । श्रीधरस्तु–"स्तॄञ् छादने दीर्घः, स्तृञ् छादने ह्रस्वः" इत्युभावप्युपन्यास्थत् [दैवस्य पुरुषकारटीका–पृ० १६] । एतेन श्रीधरमते–'सृपिसृजिस्तॄस्तृस्त्यासीकृसेकृसृवर्जम्' इति भाष्यपाठो द्रष्टव्यः ।

२ पुरुषकारेण भागवृत्तिकारोक्तः 'सीकृ'-पाठः प्रत्याख्यातः । तथा हि—"तत्र चाद्यः पक्षः शीकर इति प्रयोगानुगुणः । योऽपि षोपदेशलक्षणे सीकृपाठ उक्तः सोऽप्येवमेव प्रत्युक्तः [दैवस्य पुरुषकारटीका–पृ० ४६] ।

३ श्रीधरो भागवृत्तेर्व्याख्याता । [द्र० संस्कृत व्याकरणशास्त्र का इतिहास पृ० ३४१] ।

४ महाभाष्ये—"सर्वे नादयो णोपदेशाः, नृतिनन्दिनर्दिनक्किनाटिनाथृनाधृनॄवर्जम्" इत्यत्र नॄधातुरपि पठ्यते । तं भागवृत्तिकारादयो न पठन्तीति भावः ।

५ श्रीधरो भागवृत्तेर्व्याख्याता । माधवीयधातुवृत्तौ–"नृतिनन्दिवावये नाधृवर्जं नृत्यादीन् पठित्वैतान् सप्त वर्जयित्वेति वदन् श्रीकरो (क्वचित् श्रीकारो) ऽप्यत्रैवानुकूलः ।" [नाधृधातौ] इति । अत्र श्रीकरः श्रीकारो वा पाठः श्रीधरस्यैवापभ्रंश इति प्रतीयते ।

६ यथा तु पुरुषकारपाठो धातुवृत्तिपाठश्च तथा भागवृत्तौ 'नाधृ'-धातुर्णोपदेश इति न शक्यते वक्तुम् । मैत्रेयाभरणकारौ नाधृधातुं णोपदेशं मन्येते, नान्ये वैयाकरणाः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

८५–दिव उत्। (६।१।१३१)

(१२२) "बहुलवचनात् केवलादपि [1]कनिन्निति। तेन दिवौकस इत्यत्र वृद्धिर्भवति" इति 'दिव उत्' [६।१।१३१] इत्यत्र भागवृत्तिः। [उज्ज्वलदत्तस्य–उ० वृ० पृ० ५८]

(१२३) "कनिन्प्रत्ययान्तेन दिवा ओको येषाम्" इति भागवृत्तिः।

[दुर्घटवृत्तिः–पृ० ६७]

(१२४) यद्यपि दिवर्थे दिवमिति निश्चितम्, तथाप्योकारनिवृत्त्यर्थमाह–दिवौकसः। तथा च भागवृत्तिकृता विमलमतिनाप्येष निपातितः। [कातन्त्रपरिशिष्टम्–सन्धि० १४२]

८६–अपरस्पराः क्रियासातत्ये। (६।१।१४४)

(१२५) "सूत्रार्थे केचिदनुस्वारस्य च लोपमिच्छन्ति। मास्पचनम्, मास्पाक इति। तत्तु तन्त्रभाष्यवाक्यस्याभावात् सन्दिग्धम्" इति भागवृत्तिः। [भाषावृत्तिः–पृ० ३३९]

८७–स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु [६।३।३४]

(१२६) दृढभक्तिरित्यादि त्वविवक्षितस्त्रीत्वात्, पूर्वपदस्य "आर्षत्वात्" इति भागवृत्तिः।

[संक्षिप्तसारवृत्तिः–समास० ४१६]

८८ जातेश्च। (६।३।४१)

(१२७) अमानिनीत्येव–कठमानिनी। 'कठीमानिनी' इति भागवृत्तिः।

[संक्षिप्तसारवृत्तिः–समास० ४३६]

(१२८) अत्र टीकाकारः–कठीमानिनीति भागवृत्तिरित्यमानिनीत्यस्यानुवृत्तिमसौ नाङ्गीकरोति। [संक्षिप्तसारटीका–समास० ४३६]

८९ इको ह्रस्वोऽङ्यो गालवस्य। (६।३।६१)

(१२९) "अद्भ्य उत्तारक उदपः (उडुपः) प्लवः। 'ऊदनोर्देशे' [६।३।९८] इति दीर्घनिर्देशादन्यत्रापि भवति" इति 'इको ह्रस्वोऽङ्यो गालवस्य' [६।३।६१] इत्यत्र भागवृत्तिः।

[उज्ज्वलदत्तस्य–उ० वृ० पृ० ८१]

(१३०) "भ्रुवोर्भङ्गो भ्रमङ्गो भ्रुभङ्गो भ्रूभङ्गश्चेति रूपत्रयम्। 'भ्रूकुंसादीनामकारो वा' [६।३।६१ वा०] इत्यकारह्रस्वौ, पक्षे दीर्घ एवावतिष्ठते।" एतत्सर्वम् 'इको ह्रस्वः' [६।३।६१] इत्यत्र भागवृत्तिः। [उज्ज्वलदत्तस्य–उ० वृ० पृ० ८४]

---

1 'कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः' [उ० १।१४२] इति सूत्रेणेति शेषः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

९० समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु। (६।३।८४)

(१३१) इह समानस्येति योगविभागः, तेन सपक्षसधर्मसजातीयाः सिद्धयन्तीति वामनवृत्तिः। "अनार्षोऽयं योगविभागः। तथा ह्यव्ययानामनेकार्थत्वात् सदृशार्थस्य सहशब्दस्यैते प्रयोगाः। कथं नाम समानपक्ष इत्यादयोऽपि भवन्ति"[1] इति भागवृत्तिः।

[भाषावृत्तिः–पृ० ४२०]

(१३२) "अव्ययानामनेकार्थत्वात् सहशब्दस्य समानार्थस्य सभावे सपक्षः, समानशब्दे तु समानपक्षः" इति भागवृत्तिः। [दुर्घटवृत्तिः–पृ० १००]

(१३३) एवम्–"सपक्षः सधर्मा सजातीयः" इति भागवृत्तिः।

[संक्षिप्तसारवृत्तिः–समास० ४७३]

९१ विभाषा पुरुषे। (६।३।१०६)

(१३४) "ईषदर्थे च वा" इति भागवृत्तिः। ईषत्पुरुषः, कुपुरुषः, कापुरुषः[2]।

[संक्षिप्तसारवृत्तिः–समास० २४८]

९२–अन्येषामपि दृश्यते। (६।३।१३७)

(१३५) दृशिग्रहणादिह पूरुषो नारक इत्यादावप्ययं दीर्घ इति वामनवृत्तिः। "अनेनोत्तरपदविधानादप्राप्तिरिति पूरुषादयो दीर्घोपदेशा एव संज्ञाशब्दाः" इति [3]भागवृत्तिः।

[भाषावृत्तिः–पृ० ४२७]

---

१ अत्र कश्चित् पाठत्रुटितः प्रतिभाति। अस्यायं भावः—सहशब्देन समासे तस्य सादेशे सपक्षसधर्मादयो भविष्यन्ति, समानशब्देन समासे समानपक्षसमानधर्मादय इति।

२ पुरुष उत्तरपदे ईषत्पुरुष इत्यपीष्यत इति भागवृत्तिकारमतं स्यात्। तथा सति विभाषापदमुभयोः शेष इति द्रष्टव्यम्।

३ सर्वत्र भाष्यैकरणः सन्नप्यत्र भागवृत्तिकारो भाष्यमतमुपेक्षितवान्। भाष्ये तु–"बहुलं छन्दसि दीर्घत्वं दृश्यते। तद्यथा पूरुषः नारकः" [६।४।७४] इति, "येषामपि दीर्घत्वं नारभ्यते तेषामपि छन्दसि दीर्घत्वं दृश्यते। तद्यथा–पूरुषः नारकः" इति चासकृत् पठ्यते। वस्ततस्तु–"पूरुषादयो दीर्घोपदेशा एव संज्ञाशब्दाः" इति भागवृत्तिकारमतमेव युक्तम्। भाषायामप्येषां बहुत्र प्रयोगदर्शनात्। "छन्दोवत् कवयः कुर्वन्ति" इति त्वगतिका गतिः [द्र० सं० व्याकरणशास्त्रका इतिहास–पृ० ३३]। वस्तुतस्त्विमे छान्दसा इमे लौकिका इत्ययं विभागस्त्वतिपुरा नासीदेव। सर्वेषामेव छान्दसत्वेनाभिमतानामतिपुरातनकाले लोकेऽपि प्रयोग आसीदेव। [द्र० संस्कृत व्याकरणशास्त्र का इतिहास–पृ० ३–४१]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

९३- दम्भेरेत्वं वक्तव्यम्। (६।४।१२० काशिका)

९४-श्रन्थेश्चेति वक्तव्यम्। (६।४।१२२ काशिका)

(चकारस्यानुक्तसमुच्चायकत्वाद् ग्रन्थेरपि)

(१३६) 'दम्भिश्रन्थिग्रन्थीनां नलोपश्च' [संक्षिप्तसारः-तिङन्त० ८०९]। वामनेनास्य नित्यत्वमुक्तम्। भागवृत्तिकृता त्वनार्षत्वमुक्तम्[1]। [संक्षिप्तसारटीका-तिङन्त० ८०६]

९५-न शसददवादिगुणानाम्। (६।४।१२६) (?)

(१३७) भागवृत्तौ [2]त्वनयोर्विकल्पेन 'वेमतुः' इत्युदाहृतम्।

[धातुवृत्तिः-पृ० १४८ (टुवमधातौ)]

(१३८) भागवृत्तौ तु 'वेमतुः'[3] इत्याद्यप्युदाहृतम्।

[सिद्धान्तकौमुदी-पृ० २६० (टुवमधातौ)]

९६-अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। (७।१।५१)

अश्ववृषयोर्मैथुनेच्छायाम्। (७।१।५१ वा०)

(१३९) अश्वस्यति वडवा ....। [4]वृत्तिकृतोऽभीष्टमेतदुदाहरणम्। वामनभागवृत्तिकाराभ्यामपि दर्शितम्। [संक्षिप्तसारटीका-तिङन्त० ५१२]

---

१ यत्तु भागवृत्तिकृता-"देभतुः, देभुः, श्रेथतुः, श्रेथुः, ग्रेथतुः, ग्रेथुः" इत्यादिप्रयोगाणामनार्षत्वमुक्तं तदयुक्तम्। 'देभतुः, देभुः'इति प्रयोगार्थम्-"दम्भ एत्वम्, नलोपस्यासिद्धत्वात्" इति वार्त्तिकस्य भाष्ये पठ्यमानत्वात्। वार्त्तिके-'नलोपस्यासिद्धत्वात्' इति यो हेतुरुक्तः स तदैव समर्थो भवितुमर्हति यदा-'श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम्' [१।२।६] इति जयादित्योक्तं व्याकरणान्तरीयं वचनमभिप्रेतं स्यात्। अन्यथा दम्भेः परस्य लिटः कित्त्वाभावात् 'अनिदिताम्' [६।४।२४] इति नलोपस्य प्राप्तिरेव नास्ति, कुतस्तस्यासिद्धत्वं स्यात्? अतो भाष्यकारस्य व्याकरणान्तरीयं सकलमपि वचनमभिप्रेतमित्येकदेशस्वीकृत्या सूचितम्। एकदेशस्वीकृत्या सकलमपि प्राचां लक्षणं स्वीकृतं भवतीति भाष्यकृता—"एवं तर्हि सिद्धे सति यदतिङ्ङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः-अनयोर्योगयोर्निर्वृत्तं सुप्सुपेति। किमेतस्य ज्ञापने प्रयोजनम्? गतिकारकोपपदानां कृद्भिः सह समासो भवतीत्येषा परिभाषा न कर्तव्या भवति" इत्यादिना ज्ञापितम्। अन्यथा 'उपपदमतिङ्' [२।२।१९] इत्यत्रोपपदस्यैव श्रवणाद्गतिकारकयोर्विषये ज्ञापकमनुपपन्नं स्यात्। २ 'एत्वाभ्यासलोपयोः' इत्यर्थः।

३ "वेमुश्च केचिद् रुधिरम्' [सप्तशती २।५७] इत्यादिप्रयोगानुरोधेन तथोदाहृतमित्याहुः" इति तत्त्वकौमुदी। 'वेमुश्च रुधिरं वीराः' [महाभारते भीष्म० ५७।१५] इति च।

४ संक्षिप्तसारवृत्तिकृतो जुमरनन्दिन इति शेषः।

३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

९७–युजेरसमासे। (७।१।७१)

(१४०) [1]'युनक्ति' इति निर्देशः 'युज समाधौ' इत्यस्य दैवादिकस्य निरासार्थः। तेन–"युजमापन्ना ऋषयः" इति भागवृत्तिकारः। केचित् सामान्यग्रहणमिच्छन्ति।

[संक्षिप्तसारटीका–सुबन्त० २३५]

९८–एकाच उपदेशेऽनुदात्तात्। (७।२।१०)

(१४१) ('शक्लृ वच घसि' इत्यादयः संक्षिप्तसारीया अनिट्कारिकाः) 'शक्लृ शक्तौ' स्वादिः। लृकारान्तनिर्देशात् 'शक मर्षणे' इति दैवादिकस्योभयपदिनो न ग्रहणम्। वामनभागवृत्तिकाराभ्यां चायं विशेषो न व्याख्यातः[2]। [संक्षिप्तसारटीका–तिङन्त० ७०४]

(१४२) ज्ञानार्थलाभार्थविदो इङ् (इट्) एव भवतीति जयादित्यजिनेन्द्रविनीतकीर्तीनां मतम्। तत्र वामनभागवृत्तिकृतोः स्वरसः[3]।

[संक्षिप्तसारटीका–तिङन्त० ७०४]

९९–घुषिरविशब्दने। (७।२।२३) (?)

(१४३) ....भागवृत्तिकारा घुषिं शब्दार्थे [4]पेठुः।

[धातुवृत्तिः–पृ० ११६ (घुषिर् धातौ)

(१४४) घुषिर्....शब्दार्थे इति तु क्षीरस्वामिधनपालभागवृत्तिकाराः।

[दैवं पुरुषकारश्च–पृ० ११०]

१००–स्नुक्रमोरनात्मनेपदनिमित्ते। (७।२।३६)

क्रमेः कर्तर्यात्मनेपदविषयात् कृति प्रतिषेधः। (७।२।३६ वा०)

(१४५) कथम्–'चिक्रंसया कृत्रिमपत्त्रिपङ्क्तेः' इति माघः [३।५१], क्रमेरनात्मने-

---

१ संक्षिप्तसारे–'युनक्तेरसमासे' इति सूत्रपाठः। तत्पदं निर्दिशति–'युनक्ति' इति।

२ 'शकिस्तु कान्तेष्वनिडेक इष्यते' इत्यनिट्कारिकाव्याख्यान इति शेषः।

३ 'विद्यति विन्त इत्यपि' इत्यनिट्कारिकाव्याख्यान इति शेषः। अत्र श्यना श्नमा च निर्देशाद् ज्ञानार्थकस्य वेत्तेर्लाभार्थकस्य विदन्तेरिट्प्रतिषेधो न भवति।

४ ".....भागवृत्तिकाराः–'घुषिरविशब्दनार्थः' इति पेठुः" इति पाठान्तरं मैसूरमुद्रितायाम् [धा० वृ० मा० २ पृ० ३७०]। तन्नासम्यक्, क्षीरतरङ्गिण्यां 'घुषिर् शब्दार्थः' इत्यस्यैव पाठस्य दर्शनात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पदनिमित्तत्वादिट्प्रसंगात्। उच्यते, तद्वयमनित्यत्वान्नेट्। "ग्रहे [1]जिघृक्षयेति पाठः" इति भागवृत्तिः। जिघांसयेति वा पाठः। [दुर्घटवृत्तिः–पृ० ११३]

(१४६) कथम्–'चिक्रंसया कृत्रिमपत्त्रिपङ्क्तेः' इति माघः [३।५१], आत्मनेपदस्य कर्तरि कृतश्चाभावाद् इङा (इटा) भवितव्यम्। अनन्तरमयं नाटीनां (?) प्रमादपाठः। "प्राच्यास्तु [1]'जिघत्सया' इति पठन्ति" इति भागवृत्तिः। [संक्षिप्तसारटीका–तिङन्त० ७१७]

१०१–किरश्च पञ्चभ्यः। (७।२।७५)

(१४७) 'वृतो वा' [७।२।३८] इत्यस्येटो दीर्घो नेहास्तीति वामनवृत्तिः। "अस्तीति" भागवृत्तिः। [भाषावृत्तिः–पृ० ४८२]

(१४८) भागवृत्तौ त्वत्रापि दीर्घविकल्पो दृश्यते।

[धातुवृत्तिः–पृ० ३३८ (कृधातौ)]

१०२–त्यदादीनामः (७।२।१०२)

(१४९) स्यश्छन्दसि बहुलम्' [६।१।१३३] इति पाणिनिलक्षणे छन्दोग्रहणादनुमीयते भाषायामपि स्यो भवतीति। तथा हि–'त्यदादीनाम् अ विभक्तौ' इति सर्ववर्मा, [2]'त्यदादीनामच्छन्दोविहित आदेशः' इति चन्द्रः। तस्मात्–"स्य इति छान्दसम्" इति भागवृत्तिकारस्य भ्रमः। [संक्षिप्तसारटीका–सुबन्त० २८५]

१०३–नोदात्तोपदेशस्य मान्तस्यानाचमेः। (७।३।३४)

(१५०) विश्रामः—चन्द्रोऽत्र नित्यां [3]वृद्धिमाह। भागवृत्तिकारस्तु नित्यं वृद्ध्यभावः (इत्याह)। [संक्षिप्तसारटीका–सन्धि० ६]

(१५१) "यथालक्षणमप्रयुक्ते' [महाभा० १।१।२४] इति 'उपराम उद्यामः' इत्येव भवतीति" भर्तृहरिणा भागवृत्तिकृता चोक्तम्। [दुर्घटवृत्तिः–पृ० ११७]

---

१ दुर्घटवृत्तिकारो भागवृत्तेर्मते 'जिघृक्षया' इति पाठमाह, संक्षिप्तसारटीकाकृत्तु 'जिघत्सया' इति। कोऽत्र शुद्धः पाठ इति न शक्यते निश्चेतुम्।

२ 'त्यदां तसादिषु चा द्वे रः' इति चान्द्रं सूत्रम् [५।४।६८]।

३ 'मः सेटो नावम्यमिकमाचमविश्रमः' [६।१।४२] इत्यत्र विश्रमः पर्युदासात्। वामनस्तु–'सूर्यविश्रामा भूमिः' इत्यादिकमन्याय्यं मन्यते। 'वेः श्रमेर्वा' इति वर्धमानः। विश्रमः, विश्रामः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१०४–यङो वा। (७।३।९४)

(१५२) [१]"यङ्लुक् छान्दसः" इति भागवृत्तिः [भाषावृत्तिः–पृ० ५०३]

१०५–ह्रस्वस्य गुणः। (७।३।१०८)

(१५३) कथम्–'सुतनु, सत्यमलङ्करणाय' इति माघः [६।१७], 'सुतनु, जहिहि कोपम्', तथा–'वरतनु, संप्रवदन्ति कुक्कुटाः' इति च ? अनेन गुणप्राप्तेः।....उच्यते—'कृषि-चमितनिधनिसर्जिखर्जिभ्य ऊः' [उ० १।७८] इति ऊप्रत्ययान्तस्तनूशब्दोऽप्यस्ति। 'स्त्रियां मूर्तिस्तनुस्तनूः' [२।६।७१] इत्यमरः। तत्प्रयोगे–'अम्बार्थनद्योर्ह्रस्वः' [७।३।१०७] इति ह्रस्वविधानसामर्थ्यान्न गुण इति। यदि हि स्यात्, 'अम्बार्थानां ह्रस्वः' इत्युक्त्वा 'नदीह्रस्वयोर्गुणः' इति कृतं स्यात्" इति भागवृत्तिः। [दुर्घटवृत्तिः–पृ० ११६]

(१५४) 'हे कर्तृकुलम्' इत्यत्र गुणो न भवतीति[२] भागवृत्तिः।

[संक्षिप्तसारटीका–सुबन्त० ८]

१०६–प्रकारे गुणवचनस्य। (८।१।१२)

(१५५) [३]'प्रकारवति जातीयः' इत्यत्र प्रकारशब्देन भेदः सादृश्यं चोक्तम्। तत्र भेदे कृतार्थो जातीयः सादृश्ये [४]त्वनेन बाध्यते। अत एकविषयविहितत्वाद्बाध्यबाधकशङ्कायामाह–'जातीयश्चेष्यते' इति। भागवृत्तिकारस्त्वाह–"जातीयोऽपि सादृश्य एव भवति" एतेन [५]विधि-द्वयसमावेश उक्तः। [संक्षिप्तसारटीका–तिङन्त० ३२२]

१०७–दादेर्धातोर्घः। (८।२।३२)

(१५६) दामलिहमिच्छतीति ईयन्तात् (क्यजन्तादित्यर्थः) क्विप्, दामलिहो धातुत्वेऽपि घो न भवति, गणपठितधातोरेवात्र ग्रहणादिति वामनचन्द्रादीनां मतम्। सनाद्यन्त-धातोरपि ग्रहणमिति भाष्यकारसंमतम्, तस्माद् घत्वेऽपि 'दामलिग्' इति भवितव्यमिति भागवृत्तिः। [संक्षिप्तसारटीका–सुबन्त० १३६]

---

१ कदाचिदयं पाठः 'यङोऽचि च' [२।४।७४] इति सूत्रादुद्धृतः स्यात्। तत्सूत्रं द्रष्टव्यम्।
२ द्रष्टव्या भाषावृत्तिः—कथं हे कर्तृकुलम् ? नद्यपेक्षस्य ह्रस्वस्य ग्रहणात् [७।३।१०८]।
३ संक्षिप्तसारसूत्रमेतत्। पाणिनीयानां तु–'प्रकारवचने जातीयर्' [५।३।६९] इति।
४ द्विर्वचनेनेत्यर्थः।
५ जातीयर्प्रत्ययो, द्विर्वचनं च।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१०८–क्विन् प्रत्ययस्य कुः। (८।२।६२)

(१५७) कथं दृग्भ्याम्, दृशेः क्विपि कुत्वम् ? "प्रत्ययग्रहणसामर्थ्यात् क्विन्प्रत्ययो यस्माद्दृष्ट इति बहुव्रीहावन्यप्रत्ययान्तादपि पदान्ते कुत्वम्" इति भागवृत्तिः।

[दुर्घटवृत्तिः–पृ० १२५]

१०९–ऊवि च पदे। (८।३।२१)

(१५८) भर्तृहरिणा चास्य नित्यार्थतैवोक्ता। तथा च भागवृत्तिकृता प्रत्युदाहरणमुपन्यस्तम्—"तन्त्रे उतम्, तन्त्रयुतम्" इति।

[तन्त्रप्रदीपः-८।३।२१ (द्र० न्यासभूमिका–पृ० १४)]

११०–तिरसोऽन्यतरस्याम्। (८।३।४२)

(१५९) 'तिरस्कृत्वा कष्टं (? काष्ठं) गतः' इत्यत्रापि कस्कादित्वम्[1]। अत्र तिरसस्तिर्यगर्थत्वेनान्तर्धानार्थाभावात्तिरोऽन्तर्धाने न श्रदादित्वम्[2], अतो न यच्[3]। भाष्यकारमतानुसारेण सूत्रकृत इदमेवाभीष्टम्। भागवृत्तिकृताऽप्येतादृशमेव व्याख्यातम्। वामनादिस्वरसेन त्वन्तर्धान एव कस्कादित्वम् (सत्वमित्यर्थः)। [संक्षिप्तसारटीका–सन्धि० १५०]

१११–सहेः साडः सः। (८।३।५६) (?)
सहेः पृतनर्ताभ्यां च। (८।३।१०९) (?)

(१६०) भागवृत्तिकारस्तु पृतनासाहमित्यत्रापि मूर्धन्यं नेच्छति।

[संक्षिप्तसारटीका-सन्धि० २४०]

११२–अभिनिसः स्तनः शब्दसंज्ञायाम्। (८।३।८६)

(१६१) 'विसर्गे वाच्ये' इति [4]भागवृत्तिकृतो मतम्। 'विसर्गे वर्णे च वाच्ये' इति वामनस्य मतम्। 'अभिनिष्टानो वर्णे' [६।४।७३] इति चन्द्रमतम्।

[संक्षिप्तसारटीका–सन्धि० २७३]

---

१ सत्वमित्यर्थः। यत् पाणिनीयानां सत्वं तत् संक्षिप्तसारे कस्कादिपदेनोच्यते।

२ गतिसंज्ञेत्यर्थः।

३ ल्यब् इत्यर्थः।

४ भागवृत्तिकृतो मतमेवात्र युक्तम्। तथा हि–"विसर्जनीयोऽभिनिष्टानः" इति चतुरध्याय्याः सूत्रम्। आश्वलायनगृह्येऽपि–"नाम दध्युर्घोषवदाद्यन्तरन्तस्थमभिनिष्टानान्तं द्व्यक्षरं चतुरक्षरं वा" [१।१३।५] इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

११३–अट्कुप्वाङ्नुम्व्यवायेऽपि । (८।४।२)

(१६२) भागवृत्तिकृता प्रतिपादितं नुमः पूर्वनिपातलक्षणव्यभिचारचिह्नात्[1] प्रेन्वनमित्यत्र णत्वाभावः, [2]क्षुभ्नादित्वाद्वा । [परिभाषावृत्तिः–पृ० १२]

११४–प्रातिपदिकान्तनुम्विभक्तिषु च । (८।४।११)

(१६३) "तत्र च पूर्वपदाधिकारः, समासे च पूर्वोत्तरपदव्यवहारः । तत्कथमिह (प्राह्णिण्वदित्यत्र) णत्वमिति न [3]व्यक्तीकृतम्" इति भागवृत्तिकृतोक्तम् ।

[परिभाषावृत्तिः–पृ० १२]

(१६४) प्राह्णिण्वनम् । भर्तृहरिसंमतमिदमुदाहरणम्, भागवृत्तिकृताऽप्युदाहृतम् । अत्र णत्वं वामनादीनामसंमतम्[4] । [संक्षिप्तसारटीका–सन्धि० ३२८]

११५–कुमति च । (८।४।१३)

(१६५) भागवृत्तौ तु–"'....युजाक्रीड०' [३।२।१४२] इति घिनुणन्तमुदाहृतं वस्त्रयोगिणाविति ।" [तन्त्रप्रदीपः–८।४।१३ (द्र०–न्यासः, भा० २, पृ० १११३ टि०)]

११६–अनितेरन्तः । (८।४।१९–२०)

(१६६) परेश्च । परस्य न भवतीत्येके (पर्यनिति) । अस्मिन् व्याख्याने 'हे प्रान्' इति रूपम् । अयमेव मुख्यः सूत्रार्थः । भागवृत्तिकृताऽप्येतदेवैकदेशीयमतं [5]व्याख्यातम् ।

[संक्षिप्तसारटीका–सन्धि० ३१५]

---

१ 'प्रातिपदिकान्तनुम्विभक्तिषु च' [८।४।११] इति सूत्रेऽल्पाच्तरस्य नुमः पूर्वनिपाते प्राप्ते तदभावलक्षणचिह्नादित्यर्थः ।

२ 'क्षुभ्नादिषु च' [८।४।३९] इति सूत्रेण ।

३ भर्तृहरिणेति शेषः । [द्र० परिभाषावृत्तिः–पृ० १२]

४ यथा त्वत्र परिभाषावृत्तेः पाठस्तथा भागवृत्तिकारः–'प्राह्णिण्वनम्' इत्यत्र णत्वं नानुमनुते । यथा च संक्षिप्तसारटीकाकृतः पाठस्तथा भागवृत्तिकारमतेऽपि णत्वमिष्यते । एवमुभयविधमतभेदे कतमन्मतं भागवृत्तिकारस्येति न वयं विद्मः । महाभारते कर्णपर्वणि-'मानुष्यवाजिमातङ्गान् प्राह्णिण्वन्तं यमक्षयम्' [७३।७५] इति प्रयोगदर्शनाण्णत्वं त्विष्यत एव ।

५ अयमभिप्रायः–'अनितेरन्तः' इति पाणिनीयमेकमेव सूत्रम् । भाष्यकृता सूत्रमेतद् द्विधा व्याख्यातम्—"अनितेरन्तर्ग्रहणं क्रियते सम्बुद्ध्यर्थम्, हे प्राण्" । अस्मिन् व्याख्यानेऽनितेर्धातोर्नकारो योऽन्ते (सामर्थ्यात् पदान्ते) वर्तते तस्य णत्वं भवतीति सूत्रार्थः । अपरम्–"यो वा तस्मादनन्तरः । अनितेः समीपे यो यो रेफस्तस्मान्नस्य (णत्वं) यथा स्यात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

११७–अणोऽप्रगृह्यस्यानुनासिकः। (८।४।५७)

(१६७) 'अण् सानुनासिकः' इति वक्तव्यम्। अवसाने वर्तमानोऽण् सानुनासिको वा भवति–दधिँ दधि, मधुँ मधु, नदीँ नदी। व्यवस्थितविभाषयाऽत्रासन्धिविषये न स्यात्–अग्नी, वायू, अमी। 'द्विवचनसिद्धानामीदूदेताम्' इति,'अदसो माद् इणः' इत्यसन्धेरयं विषयः। अथवा, एतन्न वक्तव्यं छान्दसत्वात्। अत एव भागवृत्तौ भाषाभागे [1]नास्त्येतत्।

[संक्षिप्तसारटीका–सन्धि० १६०]

अनिश्चितस्थानानि

(१६८) भागवृत्तिकृता तु–'पक्तामूलत्यपान्तनमीषाते' (?), तन्मतेन शेषविवक्षायां षष्ठ्यत्र। [दुर्घटवृत्तिः–पृ० ४७]

(१६९) "उष्ट्रो राष्ट्रो भ्राष्ट्रः" इति भागवृत्तिः। [उज्ज्वदत्तस्य–उ० वृ० पृ० १८६]

(१७०) "पृषोदरं मेदुरं पृषत्" इति भागवृत्तिः।

[उज्ज्वलदत्तस्य–उ० वृ० पृ० २०६]

(१७१) "'तन्द्री प्रमिला' इति [2]त्रिकाण्डीपाठात् साधुत्वम्" इति भागवृत्तिकारः।

[श्वेतवनवासिनः–उ० वृ० पृ० ६३]

प्राणिति। इह मा भूत्–'पर्यनिति" इति। अस्मिन् व्याख्याने 'हे प्रान्' इत्येव प्राप्नोति, 'पदान्तस्य' [८।४।३७] इति णत्वस्य प्रतिषेधो भवति। वृत्तिकृता वामनेन सूत्रमेतद् विसृज्य व्याख्यातम्। तेन तन्मते 'हे प्राण्' इति णकार एव भवति। भागवृत्तिकारस्तु भाष्यकारीयमपरं व्याख्यानमनुसृतवान्। केशववृत्तौ तु विकल्प उक्तः–'हे प्राण्, हे प्रान् वा' [द्र०–भाषावृत्तिः ८।४।२०]।

1 'अणोऽप्रगृह्यस्यानुनासिकः' इति सूत्रमित्यर्थः।

2 अयममरकोशाद्भिन्नः कश्चित्त्रिकाण्डीकोशः। अमरकोशे तु–'तन्द्री प्रमीला' [१।७।३८] इति पाठः। 'यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि' इति टीकासर्वस्वकारवचनादासीदमराद्भिन्नः कश्चित् त्रिकाण्डकोश इति सम्भाव्यते।
कश्चित्त्रिकाण्डकोशो भागुरिकृतोऽप्यासीदिति पुरुषोत्तमदेववचनाज्ज्ञायते। तदुक्तम्— "शिवतातिः, शन्तातिः, अरिष्टतातिः' अमी शब्दाश्छान्दसा अपि क्वचिद्भाषायां प्रयुज्यन्त इति त्रिकाण्डे भागुरिनिबन्धनाद्वाऽव्युत्पन्नसंज्ञाशब्दत्वाद्वा सर्वथा भाषायां साधवः" [भाषावृत्तिः– पृ० २८९] इति। विवृतं च सृष्टिधरेण—"त्रिकाण्डे कोशविशेषे भागुरेरेवाचार्यस्य यदेषां निबन्धनं तस्माच्च" इति [द्र०–भा० वृ० पृ० २८९ टि०]।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(१७२) ततः-"धराधरेन्द्रं व्रततीततीरिव' [माघ० १।५] इत्यसाधुः" इति [1]भावबृत्तिः।
[अनिर्ज्ञातकर्तृकाऽमरटीका–मद्रास ओरियण्टल जर्नल, सन् १६३२, पृ० २५३]

(१७३) भागवृत्तिकार विमलमति बलिया छेन (= आह)—

विशेष्यस्य विशेषेण मिलितं युक्तमुच्यते।
समासाख्यं तदेव स्यात् तद्धितोत्पत्तिरेव च॥

[व्याकरण दर्शनेर इतिहास–पृ० १७६ पादटिप्पणी]

इति शम्॥

---

१ अत्र कदाचित् 'भागवृत्तिः' इति पाठः स्यात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वेदान्तावतारः

श्रीशान्तिभिक्षुशास्त्री, शान्तिनिकेतनम् ।

वेदान्तावतारनामा लघुतमोऽयं प्रबन्धः सकलस्याद्वैतवेदान्तस्वरूपस्य परिचयायाभिनवादर्शभूतः[1] क्रियते । अङ्गुलिमेये ह्यादर्शे यथा विशालाकृतिर्गजो मुष्टिमेयो भवति, तथैवास्मिन् प्रबन्धादर्शे विशालवेदान्तगजोऽपि सुखेन सर्वेषां मतिग्राह्यो भवितव्यः । षट्प्रकरणोऽयं प्रबन्धश्चतुश्चत्वारिंशदनुच्छेदात्मकः । अयमस्ति तत्र मातृकोद्देशः—

१ जीवब्रह्माभेदः ।
२ अभेदस्यानुभवविरुद्धता ।
३ अभेदस्य कर्मविरोधित्वम् ।
४ अविद्या विद्या च ।
५ विद्यायाः श्रुतिगम्यत्वम् ।

इत्यनुबन्धो नाम प्रथमं प्रकरणम् ॥

६ परा विद्या, अपरा विद्या च ।
७ परं ब्रह्म, अपरं ब्रह्म च ।
८ परापरब्रह्मणोर्विवेकः ।
९ परब्रह्मणो ह्यविज्ञेयता ।
१० परब्रह्मणो लक्षणम् ।
११ परब्रह्मणः समाधावभिसमयः ।
१२ अपरं ब्रह्म ।
१३ अपरब्रह्मणो विश्वात्मत्वम् ।
१४ अपरब्रह्मणः शरीरात्मत्वम् ।
१५ अपरब्रह्मणः पुरुषविधेश्वरभावः ।

इति ब्रह्मविद्या नाम द्वितीयं प्रकरणम् ॥

१६ व्यवहारसत्यं परमार्थसत्यं च ।
१७ परापरविद्ययोः सत्यद्वयेन संबन्धः ।
१८ सर्गः ।
१९ अनादिः संसारः ।

---

१ डायसनकृतिरेव (Paul Deussen: The System of the Vedanta, pp. 453–78) क्वचिदविकलभावेन क्वचित्संग्रहभावेन चात्रोपजीव्यभूता । सोऽयं निबन्धश्चिराय केवलसंस्कृतपरायणानां कृते कुतोऽपि सम्प्रति मन्ये प्रकाशं लभेत । सरलात्र रीतिर्विषयोपस्थापने स्फीतिश्च वेदान्तसारादिभ्योऽपि हृद्यतरे इति पदे पदेऽनुभविष्यन्ति सुधियः । यूरोपदेशे डायसनकृतिः परमप्रमाणभूता वेदान्तविषये प्रसिद्ध्यति । तस्या महाकृतेर्बिन्दुलेश एवात्रोपहारीकृतः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२० शुभाशुभकर्ममूलकः संसारः ।
२१ भूतग्रामः ।
२२ जीवनिकायः ।
२३ जगतः परमार्थत्वप्रतिषेधः ।

इति सर्गो नाम तृतीयं प्रकरणम् ॥

२४ जीवस्य सत्यता ।
२५ जीवो ब्रह्मैव ।
२६ परमार्थतो जीवस्वरूपम् ।
२७ व्यवहारार्थतो जीवस्वरूपम् ।
२८ उपाधिः
२९ मनः, इन्द्रियाणि च ।
३० मुख्यः प्राणः ।
३१ सूक्ष्मशरीरम् ।
३२ धर्माधर्मौ ।
३३ जीवावस्थाः ।

इति जीवात्मा नाम चतुर्थं प्रकरणम् ॥

३४ उत्क्रान्तिः ।
३५ पितृयानम् ।
३६ तृतीयं स्थानम् ।
३७ देवयानम् ।

इति प्रेत्यभावो नाम पञ्चमं प्रकरणम् ॥

३८ ज्ञानान्मोक्षः ।
३९ ईश्वरानुग्रहलभ्यं भवति ज्ञानम् ।
४० ज्ञानमुखानि ।
४१ कर्मक्षयः ।
४२ कर्तव्याभावः ।
४३ मुक्तस्य शरीरधारणम् ।
४४ ज्ञानिनो ब्रह्मणि लयः ।

इति मोक्षो नाम षष्ठं प्रकरणम् ॥

आसां मातृकाणामुपरिष्टाद्यथाक्रममुपपादनं भविष्यति ।

१ य एव विश्वात्मा स एव शारीरिक आत्मा न तु तद्भिन्न इति प्रतिपादयितुमेव वेदान्तानां प्रस्थानम् । तथा चात्मैकत्वविद्या नाम वेदान्तानां प्रतिपादनीयो विषयः । विश्वात्मा नाम ब्रह्म । तत एव—"इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" [द्रष्टव्यमत्र–तैत्तिरीय० ३।१]। तद्ब्रह्मैव ह्येष शारीरिक आत्मा । तथा च ब्रह्मात्मनोरभेदपरा श्रुतिः–"अहं ब्रह्मास्मि" [बृहदारण्यक० ४।१०] इति । "तत्त्वमसि" [छान्दोग्य० ६।८।७] इति च ।

२ ब्रह्मात्मनोरेषोऽभेदः, एषोऽद्वैतभावः, एतदैक्यं नास्माभिरनुभूयते । वैदिके लौकिके च व्यवहारे सर्वत्रैव नानात्वभावो नामरूपभेदभिन्नो विविधाकारः प्रपञ्चः सविकार एष शारीरिकात्मभावो भवति सर्वेषामस्माकमनुभवगोचरः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३ किञ्च, कर्मस्वकाः प्राणिनो हीनप्रणीतयोनिषु संसरन्तः स्वकृतानां कर्मणां फलमनुभवन्ति—सुखं वा, दुःखं वा, अदुःखमसुखं वेति न केवलं श्रुतीनामेव नयः प्रत्युत श्रुतिविप्रतिपन्नानां केषाञ्चनाध्यात्मपरायणानामपि नयः। तत्र संसरतामेतेषां प्राणिनां नानात्वख्यातिरेव सिद्ध्यति न त्वेकत्वख्यातिः।

४ नानात्वख्यातिरेषा प्रत्यक्षानुमानागमाश्रया श्रुतिस्मृतिसंनिश्रया भ्रान्तिरेव। सेयं भ्रान्तिर्मिथ्याज्ञानम् 'अविद्या' इत्युच्यते। अविद्यया मोहितो नायमात्मा विजानाति स्वं निरुपाधि स्वरूपम्। स तु कर्मक्लेशकायोपाधिसहितं स्वं रूपं मन्यमानो विषीदति, नात्मैकत्वं पश्यति। यदा ह्येष सम्यग्दर्शनलक्षणया विद्यया स्वं रूपम् उपाधींश्च विवेकेन पश्यति, पश्यति यदुपाधयोऽविद्याश्रया मायाश्रया अभिमानाश्रया इति, पश्यति यदयमात्मा भवेत्येकोऽद्वितीय इति; तदा खल्वेष ब्रह्मैव भवति। अविद्या भवति स्वप्नोपमा, विद्या तु प्रबोधोपमा। भ्रान्तमपि मिथ्यापि स्वप्नदर्शनं तावत्पीडयत्येव यावन्न सुप्तः प्रबुध्यति, मिथ्यापि तथैवाविद्या नानात्वभावेन मोहयन्ती बहुतरमायासयत्येव। सा खल्वविद्या विद्यया ह्यात्मैकत्वप्रबोधिन्या नश्यति।

५ सेयं सम्यग्दर्शनलक्षणा विद्या वेदान्तश्रुतिगम्या वेदितव्या। न तां गमयितुं लौकिकानां प्रत्यक्षानुमानादिप्रमाणानां गतिः। नापि चोदनालक्षणाः श्रुतयो भवन्ति तद्बोधनप्रतिबलाः। नापि वा तर्कस्मृतिभ्यां तदवगतिः। अविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च। तत्कथं तानि विद्याप्रतिपादने क्षमाणि स्युः। श्रुतिर्हि वेदः। ब्रह्मनिःश्वसितमेतद् वेदशास्त्रम् ऋषिभिर्दृष्टम्। सदेवकमिदं जगद् अनित्यम्। वेदस्तु नित्यः। प्रलयान्ते वेदशब्देभ्य एव ब्रह्मणा कृतो भवति सर्गः। प्रतिसर्गं महर्षयस्तपसा सेतिहासान् वेदान् प्रतिलभन्ते। वेदो द्विविधः—कर्मकाण्डात्मको ज्ञानकाण्डात्मकश्च। कर्मकाण्डात्मको भवत्यभ्युदयसाधनः। ज्ञानकाण्डात्मको भवति निःश्रेयससाधनः। सोऽयं वेदो भवति स्वतःप्रमाणम्। स्मृत्यादीनि तु परतःप्रमाणानि। मन्त्रब्राह्मणयोर्वेदनामधेयम्। तदन्ते स्थिताः श्रुतयो वेदान्ताख्याः। ताः खलु निःश्रेयससाधनभूतस्य सम्यग्दर्शनलक्षणस्य ज्ञानस्योपाया भवन्ति ॥

इति वेदान्तावतारप्रबन्धेऽनुबन्धो नाम प्रथमं प्रकरणम् ॥ १ ॥

६ संसारनिवृत्तिलक्षणो मोक्षो नाम पुरुषार्थः। जीवात्मपरमात्मनोरेकत्वप्रतिपत्त्या भवति तदधिगमः। एषा ह्येकत्वप्रतिपत्तिर्नाम विद्या या खलु भवत्यात्मपरा भवति ब्रह्मपरा। न च तस्या ब्रह्मात्मभिन्नं भवति किञ्चित् प्रतिपादनीयम्। सेयं द्विविधा। तत्राद्या परा विद्या नाम। या सम्यग्दर्शनाय कल्पते, भवति च मोक्षफलाय। अथान्या विद्या नाम्ना भवत्यपरा। या खलु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ब्रह्मोपासनलक्षणा सती कर्मसमृद्धयभ्युदयफला क्रममुक्तये कल्पते। एवं परब्रह्मविषया भवति परा विद्या। अपरा विद्या त्वपरब्रह्म विषयीकृत्य प्रवर्तते।

७ परं ब्रह्म भवति निर्गुणं निर्विशेषं निराकारं निरुपाधि। अपरं ब्रह्म तु भवति सगुणं सविशेषं साकारं सोपाधि। तदिदं द्विरूपं ब्रह्म श्रुतिप्रतिपाद्यं प्रसिद्धयति प्रविभक्तम्।

८ न ह्येकमद्वितीयं ब्रह्म गुणविशेषाकारोपाधिभिर्युगपत् सहितं रहितं च कल्पयितु शक्यम्। तस्माद् ब्रह्म स्वतो भवति गुणविशेषाकारोपाधिविरहितमेव। एतादृशं ब्रह्म अविद्यारोपितोपाधिकं सद् भवत्यपरं ब्रह्म। यथा स्वभावतो विशुद्धः स्फटिकमणी रक्तः प्रतिभाति रक्तवस्तुयोगेन तथैव विशुद्धमपि ब्रह्म तत्तदुपाधिसंसर्गेण तथा तथा प्रतिभाति। वस्तुतस्तु स्फटिके यथा रक्तादीनां भ्रान्तिरेव तथैव ब्रह्मण्यपि भ्रान्तिमात्रमेव ते त उपाधयः।

९ यदिदं परं ब्रह्म निर्गुणं निराकारं निर्विशेषं निरुपाधिकं तदेवं श्रुत्याऽऽख्यायते—"अस्थूलमनण्वह्रस्वमदीर्घम्" [बृहदारण्यक० ३।८।८] इति, "अशब्दमस्पर्शमरूपमव्ययम्" [कठ० ३।१५] इति, "नेति नेति" [बृहदारण्यक० २।३।६] इति च। तस्मात्—"अन्यदेव तद्विदितादथो अविदितादधि" [केन० १।३] इति ततः—"वाचो निवर्तन्ते अप्राप्य मनसा सह" [तैत्तिरीय० २।४]। अत एव बाष्कलिनाऽनुयुक्तो बाध्वः (बाह्वः) केवलं तूष्णीं बभूव, मौनेनैव ब्रह्म प्रोवाच। द्वितीयमप्यनुयुक्तस्तथैव तूष्णीं तस्थौ। तृतीयमनुयुक्त उवाच—"ब्रूमः खलु त्वं तु न विजानासि, उपशान्तोऽयमात्मा" [ब्रह्मसूत्रे ३।२।१७ इत्यत्रोद्धृता श्रुतिः] इति[1]।

१० तदेतन्निर्गुणं ब्रह्म नासदित्यस्मिन्नर्थे सदित्युच्यते। तदेतत् सद् ब्रह्म नार्थक्रियाकारिलक्षणं व्यवहारसत्, प्रत्युत सर्वथा व्यवहारसद्विरोधि परमार्थसत्। व्यवहारदृष्ट्या तु तदेतदसदेव। न केवलं परमार्थसल्लक्षणं ब्रह्म, प्रत्युत चिल्लक्षणमपि तद्भवति। यथा लवणपिण्डो यतो यतो रस्यते लवणरसो हि स भवति। तथैव ब्रह्म यतो यतो स्पृश्यते चिद्घन एव स्पृष्टो भवति। आभ्यां सच्चिद्विशेषणाभ्यां निर्गुणं ब्रह्म न सोपाधिकं भवति। यतः सच्चिदोरन्यत्वं वा

---

१ अत्र तुलनीयानीमानि बौद्धशास्त्रवचनानि—
"परमार्थो हि आर्याणां तूष्णींभावः" [माध्यमिकवृत्तिः—पृ० ५६]।
"न मौनैस्तथागतैर्भाषितम्। मौना हि भगवन्तस्तथागताः" [लङ्कावतारसूत्रम्]।
"यस्यां च रात्र्यां धिगमो यस्यां च परिनिर्वृतः।
एतस्मिन्नन्तरे नास्ति मया किञ्चित्प्रकाशितम्॥" [लङ्कावतारसूत्रम्—पृ० १४४]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वैतं वा भेदो वा नास्ति । सच्चिल्लक्षणमिदं ब्रह्म 'आनन्दम्' अपि भवति । स चायमानन्दो यदा शान्तिरिति विवक्ष्यते तदा सच्चिद्विशेषणवदानन्दविशेषणमपि न तदुपाधिर्भवति । सर्वविध-दुःखादिविक्षेपाभावद्योतकमेव तद्भवति । यदा त्वानन्दपदेन समृद्धेर्विवक्षा भवति तदैत-दानन्दपदं भवति ब्रह्मण उपाधिः । ब्रह्मणो हि स्वरूपलक्षणेऽभिप्रेतमानन्दपदं दुःखाद्यभावरूपायाः शान्तेर्द्योतकं भवति । तथा च श्रुतिः—"अतोऽन्यदार्तम्" [बृहदारण्यक० ३।४।२] इति ।

११ निर्गुणं हीदं ब्रह्म भवति सर्वेषामन्तरात्मा । सर्वो हि खल्वात्मास्तित्वं प्रत्येति । न च कस्यापि 'नाहमस्मीति' भवति प्रत्ययः । एवं सत्यपि न तस्य भवति प्रत्यक्षम् । न हि सर्वेषां साक्षिणो ब्रह्मणः कथमपि गोचरता भवति । योगिनस्तु तदिदं संराधने पश्यन्ति [ब्रह्मसूत्रे ३।२।२४] । तदेतादृशस्य निर्गुणस्य ब्रह्मणो ज्ञानान्नामरूपात्मकद्वैतप्रपञ्चस्य मिथ्यात्वप्रत्ययाद् भवति मोक्षः ।

१२ परब्रह्म विशुद्धेन निरतिशयेन वोपाधिना प्रतिसंयुक्तं सद् भवत्यपरब्रह्म । यत्र ब्रह्मणि उपाधिर्वा, विशेषो वा, आकारो वा भेदो वा समारोपितो भवति तत्र शास्त्रमपरब्रह्मपरं भवत्युपासनार्थम् । उपासनाऽभ्युदयार्था स्वर्गसुखार्था कर्मवदेव न भवति निःश्रेयसाय मोक्षाय । न च विरुणद्धि संसारं जन्ममरणपरम्पराम् । तथापि सेयं न कर्मवद्भवति बन्धाय । प्रत्युत तया द्वारभूतयाऽपरब्रह्मोपास्य देवयानपथा स्वर्ग्यमैश्वर्यं क्रममुक्तये कल्पमानं भवति ब्रह्मज्ञानाय मोक्षफलाय । तथा चोपासना चिरेण ब्रह्म गमयति । अपरब्रह्मोपासकस्या-विद्या सावशेषा तिष्ठति । उपाधिसमारोपद्वारा सेयमविद्या परमपरं विदधातीति सावशेषाविद्यस्य यावत् सा न नश्यत्यविद्या तावच्चिरायितो भवति मोक्षः । तदेतदपरब्रह्म यद्यपि परब्रह्मैव तथापि रक्तकुसुमयोगेन स्फटिकवत् , जलतरङ्गेषु सूर्यबिम्बवत् विकृतमनुभूयते । अस्यापरब्रह्मणो भवति त्रिविधो विभागः—विश्वात्मा, शरीरात्मा, पुरुषविधमहेश्वरश्च ।

१३ तत्रेमा अपरब्रह्मपराः श्रुतयः—"सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाकी (= मौनः) अनादरः (=अभयः)" [छान्दोग्य० ३।१४।२] इति, "अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ।" [मुण्डक० २।१।४] इति, "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥" [मुण्डक० २।२।१०, कठ० ५।१५, श्वेताश्वतर० ६।१४; अत्र द्रष्टव्यम्—ब्रह्मसू० १।३।२२-२३] इति, "अथ यदतः परो दिवो ज्योतिर्दीप्यते……यदिदमस्मिन्नन्तःपुरुषे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्योतिः" [छान्दोग्य० ३।१३।७] "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति, आकाशो ह्येवैभ्यो ज्यायान्, आकाशः परायणम्" [छान्दोग्य० १।६।१] इति, "आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा" [छान्दोग्य० ८।१४।१] इति, "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" [छान्दोग्य० १।११।५] इति, "यदिदं किञ्च जगत् सर्वं प्राण एजति" [कठ० ६।२] इति, "अन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः" [बृहदारण्यक० ३।७।३] इति, "य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय····अपहतपाप्मा ह्येष ब्रह्मलोकः····तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति" [छान्दोग्य० ८।४।१-३] इति, "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः, एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति" [बृहदारण्यक० ३।८।९] इति, "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥" [कठ० २।२४] इति च। इत्येवमाद्याः सन्ति विश्वात्मनिरूपणपराः श्रुतयः।

१४ "अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः। तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथाः ॥" [प्रश्न० ६।६] इति, "यः पुनरेतं त्रिमात्रेण···अक्षरेण परं पुरुषमभिध्यायीत ····स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" [प्रश्न० ५।५] इति, "यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्" [छान्दोग्य० ८।१।१] इति, "ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति। मध्ये वामनमासीनं विश्वेदेवा उपासते ॥" [कठ० ५।३] इति, "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" [छान्दोग्य० ५।१८।१] इति, "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥" [कठ० ४।१२] इति, "एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा" [छान्दोग्य० ३।१४।३] इति, "वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥" [श्वेताश्वतर० ५।८] इति, "प्राणोऽस्मि प्रज्ञात्मा····यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः" [कौषीतकि० ३।२] इति। प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतः। न साधुना कर्मणा भूयान् नो एवासाधुना (कर्मणा) कनीयान्" [कौषीतकि० ३।८] इति, " द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति" [मुण्डक० ३।१।१] इति, "य एषोऽन्तरक्षिणि पुरुषो दृश्यते स··· ब्रह्म" [छान्दोग्य० १।७।५] इति, 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मा····एतदमृतमभयमेतद् ब्रह्मेति" [छान्दोग्य० ४.१५।१] इति च। इत्येवमाद्याः सन्ति **शरीरात्मनिरूपणपराः** श्रुतयः।

१५ "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥" [ईश० १] इति, "स वा एष····आत्मा····सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः" [बृहदारण्यक० ४।४।२२] इति, "एष ह्येवैनं साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवैनमसाधु कर्म कारयति तं यमधो निनीषते, एष लोकपाल एष लोकाधिपतिरेष सर्वेशः" [कौषीतकि० ३।८] इति, "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥" [कठ० २।१२] इति, "तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम्। पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम्॥" [श्वेताश्वतर० ६।७] इति च। इत्येवमाद्याः सन्ति **पुरुषविधमहेश्वरनिरूपणपराः** श्रुतयः।

उपासनार्थोऽयं पुरुषविधेश्वरो द्वैतभावे प्रवर्तमान एवानुभूतिगम्यो भवति। द्वैतभावस्य मिथ्यारूपत्वात् तद्वशादनुभूयमानः पुरुषविधेश्वरोऽपि न परमार्थसन् भवति। तथा च श्रुतिः— "अलं वा अर इदं विज्ञानाय। यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति, तदितर इतरं पश्यति, तदितर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते, तदितर इतरं जानाति; यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन कं जिघ्रेत्, तत्केन कं पश्येत्, तत्केन कं शृणुयात्, तत्केन कमभिवदेत्, तत्केन कं मन्वीत; तत् केन कं विजानीयाद् येनेदं सर्वं विजानाति तं केन विजानीयात्, विज्ञातारमरे केन विजानीयात्" [बृहदारण्यक० २।४।१३-१४] इति।

इति वेदान्तावतारप्रबन्धे ब्रह्मविद्या नाम द्वितीयं प्रकरणम्॥ २॥

१६ यथा ब्रह्मविद्या परापरभेदेन द्विधा विभज्यते तथैव जीवतत्त्वोपसंहितं सर्वमिदं जगद् द्विधा विभज्यते व्यवहारपरमार्थभेदेन। तत्र व्यवहारावस्थायां ब्रह्मसृष्टेऽत्र जगति ब्रह्मभूतोऽपि जीव उपाधिपरिच्छिन्नत्वात् संसरतीति प्रतिपाद्यते। परमार्थावस्थायां तु जीवो ब्रह्मैवेति प्रतिपाद्यते। प्रतिषिध्यते च सर्ग-स्थिति-जीव-संसरणादि सर्वविधं नानात्वम्। एवं परमार्थतया व्यवहारार्थं उपेक्षितेऽपि नानालक्षणस्य व्यवहारप्रपञ्चस्य सापेक्षसत्त्वं न प्रतिषिध्यते। अपरा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विद्या हि सर्गप्रक्रियां प्रतिपादयन्ती सर्गस्य वस्तुसत्त्वं प्रतिजानाति। किञ्च, कार्यकारणनियमस्य कार्यकारणाभेदनियमे परिणतिं विधाय तन्मुखेन सर्गस्य ब्रह्मरूपतां दर्शयति। जीवमधिकृत्य तु जीवस्य ब्रह्माभेद एव परमार्थदृष्ट्युपसंहितः प्राधान्येन शास्त्रप्रतिपादितो दृश्यते। तत्र तत्र श्रूयमाणो भेदस्तु विद्यामपरामुपजीव्योपासनार्थो वेदितव्यः।

१७ व्यवहारसत्यपरमार्थसत्ययोर्भवति परस्परं पूरकत्वम्। तथा हि–ब्रह्मैवैकं तत्त्वमिति परमार्थप्रतिपादनपरा परा विद्या जीवजगद्रूपे व्यवहारार्थद्वये यदस्ति किमपि परमार्थतस्तद् ब्रह्मैवेति वदन्ती भवति परमा विद्या, उत्तमा विद्या, लोकोत्तरा विद्या। अविद्योपसंहितं जीवजगद्रूपं व्यवहारार्थद्वयं प्रतिपादयन्त्यपरा विद्या क्रमेणोपासनाया द्वारेण ब्रह्मैकत्वप्रतिपदं गमयन्ती भवति लोकाचरितव्यधर्ममार्गः। तत्र ह्यपराविद्योपजीव्यमपरं ब्रह्मैव भवति सृष्टिकृत्, तस्य सर्वधर्मकत्वात्। न हि निर्धर्मकं किमपि कारणं भवद् दृश्यते। परं ब्रह्म च भवति निर्धर्मकम्। तेन कारणातीतं तत्। यदस्ति कारणं तत्सर्वधर्मकमपरं ब्रह्मैव। तथा च श्रूयते–"मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः" [छान्दोग्य० ३।१४।२] इति।

१८ "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" [छान्दोग्य० ६।३।२] इति, "स···इदं सर्वमसृजत····तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य····अभवद् यदिदं किञ्च" [तैत्तिरीय० २।६] इति चेत्येवमादिभिः श्रुतिभिर्विज्ञायते यज्जगदिदं ब्रह्मणा सृष्टं सृष्ट्वा तदेवात्र जीवरूपेणानुप्रविष्टम्। तथा च जीवब्रह्मणोरभेदो यदस्ति पारमार्थिकं तत्त्वम्, ब्रह्मकृतः सर्गो योऽस्ति नामरूपप्रपञ्चात्मको व्यवहारार्थ इति द्वावपि परमार्थव्यवहारार्थौ शास्त्रसंमतौ। तज्जलानिति [छान्दोग्य० ३।१४।१]-पदेन नामरूपात्मकस्य सर्वस्यास्य प्रपञ्चस्य ब्रह्मणो जातत्वं ब्रह्मणि प्रलयभावो ब्रह्मण्येव च तस्य स्थितिं प्रतिपादयति। सा चैषा सर्गस्थितिलयपरम्पराऽविच्छेदेन प्रवर्तमाना संसारः।

१६ अनादिः संसारः। संसारे ब्रह्मभूतोऽपि जीव उपाधिवश उपाधिपरिच्छिन्नः संसरति। उपाधयो नाम कर्म कुशलाकुशलमिन्द्रियाणि मनो मुख्यप्राणः सूक्ष्मशरीरं च। तान्येतान्यासंसारं जीवानुबन्धीनि। स्थूलशरीरोपाधिस्तु संसरणे जातौ जातौ जायते। च्युतौ च्युतौ परिच्यवते। कुशलाकुशलानां कर्मणां विपाकमनुभवितुमेवाब्रह्मस्तम्बो जीवराशिर्भूत्वा भूत्वा प्रैति। प्रेत्य प्रेत्य भवति। ज्ञानेन कर्मबीजे दग्धे तु सोऽयं प्रेत्यभावो विनिवर्तते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२० नामरूपात्मकप्रपञ्चोऽयं जीवेऽध्यारोपितस्य [बादरायण० ४।१।२, ३।१४] कर्मणो विपाक एव। स एष प्रपञ्चः क्रियाकारकफलात्मकः [शाङ्कर० १।३।२२, ३।१८; २।१।१४; ३।४।१६] भोग्यरूपः। जीवस्तु भोक्ता च कर्ता च। पौर्विककर्तृत्वानुकूलोऽयं भवति भोक्तृभोग्यभावः। कर्मणो विपाकफलं कः प्रयच्छति ? अचेतनमदृष्टं तु तत्फलं दातुं न प्रभवति। तेन चेतन ईश्वरः पुरुषविधं ब्रह्म फलं प्रयच्छतीति स्वीक्रियते। चेतनोऽयमीश्वरो व्यवहारार्थ एव न तु परमार्थः। अयमेव जीवान् तत्तत्कर्मानुसारं तेषु तेषु योनिषु जात्यायु-र्भोगादिफलैः संयोजयति। एवं शुभाशुभकर्मानुसारं जीवा ईश्वरायत्ताः संसरन्ति। प्रलये कर्मबीजसहितानां जीवानां ब्रह्मणि विलयः। कर्मबीजानि तानि यदा फलदानोन्मुखानि भवन्ति तदेश्वरप्रेरणया पुनः सर्गः प्रवर्तते। पुनश्च प्रलीना जीवाः कर्मबीजबलात् तत्तद्योनिषु संसरन्ति।

२१ सृष्टौ पूर्वं ब्रह्मण आकाशं जायते। आकाशाद् वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। एवं ब्रह्म पञ्चभूतरूपेण परिणमते। प्रलये तु पृथिव्यप्सु लीयते। आपोऽग्नौ लीयन्ते। अग्निर्वायौ लीयते। वायुराकाशे लीयते। आकाशं ब्रह्मणि लीयते। तत्र शब्देनाकाशस्य प्रत्ययो भवति। शब्दस्पर्शाभ्यां वायोः। शब्दस्पर्शरूपैरग्नेः। शब्दस्पर्शरूपरसैरपाम्। शब्दस्पर्श-रूपरसगन्धैः पृथिव्याः। तान्येतानि तत्त्वानि सृष्टौ न स्वकीयेन परिशुद्धेन रूपेणोपलभ्यन्ते प्रत्युत तत्त्वान्तरसंकीर्णेनैव रूपेणोपलभ्यन्ते। संकीर्णभावप्रक्रियेयं श्रुतिषु त्रिवृत्करणमिति व्यपदिश्यते। परस्तात् सेयं पञ्चीकरणप्रक्रियारूपेण विकासमुपगता वेदान्ते प्रसिद्ध्यति।

२२ तत्त्वगणं सृष्ट्वा तद् ब्रह्म तेषु जीवात्मनानुप्रविष्टं भवति। स एषोऽस्ति संसारी जीवः। प्रलयेऽप्येष शक्त्यात्मना ब्रह्मणि वर्तते। स एष सर्गे संप्रवृत्ते लयाभिधानां मायामयीं महासुषुप्तिं परित्यज्य प्रबुध्यति। स्वपूर्वकर्मविपाकभूतान् देवमनुष्यतिर्यग्वनस्पत्यादिनिकायानुपादत्ते। तत्तद्योनिनिकायोपादाने सूक्ष्मशरीरं तत्त्वबीजभूतं संसरद्भिस्तत्र तत्र जीवैरनुगतं भवत्यङ्गं हेतु-र्निमित्तम्। तदित्थमुपात्तेषु तत्तद्योनिनिकायेषु सूक्ष्मशरीरे संपिण्डितानि मुख्यप्राणमनइन्द्रियाणि ह्येकतो विवृतानि भवन्ति। अन्यतस्तदेव सूक्ष्मशरीरमालम्ब्य स्थूलभूतसंयोगेन निर्वर्ततेऽयं कायश्चर्ममांसास्थिरुधिरमज्जामयः। तस्यैतस्य तत्त्वेभ्यो विनिर्वृत्तस्य नामरूपकृतकार्यकारणसंघातस्य शरीरस्य स्वामी जीवः। शरीरमेतत् तत्त्वान्युपजीव्योपचयं प्राप्नोति। शरीरे मलमांसमनसां हेतुर्निमित्तं कारणं पृथिवी। मूत्ररुधिरप्राणानामापः। अस्थिमज्जावाचामग्निः। यद्यपि सूक्ष्म-शरीरस्य सर्वदैव जीवानुगतत्वात् सूक्ष्मशरीरान्तर्गता मनःप्राणवाचोऽपि सर्वदा जीवानुगता एव भवन्ति, तेन न तत्त्वेभ्यस्तासामियं नूतनाभिनिवृत्तिः प्रत्युत बीजरूपेण सूक्ष्मशरीरान्तर्गता-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नामेव तासामेषा भवत्युद्भूतिरुपचितिः। शरीरस्थानि सर्वाणि तत्त्वान्याहारात् स्वं स्वं तत्त्वं समाहृत्य यदोपचितानि भवन्ति तदा शरीरमुपचितमित्युच्यते। शरीरिणः सत्त्वनिकाया उद्भिज्जाः संस्वेदजा अण्डजा जरायुजा वा भवन्ति। आहारद्वारानुप्रविष्टः पितृवीर्ये संश्लिष्ट उत्पत्तिबीज-रूपसूक्ष्मतत्त्वपरिगतो जीवो मिथुनभावकाले मातुर्गर्भे संप्रविष्टस्तस्या रुधिरेणोपचितेन स्थूल-शरीरेण सहगतो भवति। मरणं नाम च्युतिः, जीवस्य शरीराद्वियोग। पूर्वकर्मविपाकानुकूलमेव सत्त्वनिकाया दीर्घायुष्का अल्पायुष्का वा भवन्ति। कर्मफलभोगार्थमेव भवति पुनः पुनः प्रेत्यभावः। यावत्कर्माणि तिष्ठन्ति तावत्प्रेत्यभावपरम्परापि प्रवर्तते। तत्र मनुष्यपशुवनस्पत्यादिषु जायमाना मर्त्या यद्यपि सन्तोऽल्पायुष्का एकस्मिन्नपि सर्गेऽनेकशः प्रेत्य प्रेत्य भवन्ति तथापि सन्ति देवनिकाया अमर्त्या अधिकारिणो जीवा यावत्प्रलयं स्थिताः पुनः संसरन्ति। तेषामधि-कारपदेऽन्ये सत्त्वनिकाया विनियुक्ता देवा भवन्ति।

२३ यथा मृण्मयेषु द्रव्यनिकायेषु—"मृत्तिकेत्येव सत्यम्" [छान्दोग्य० ६।१।४] भवति। अन्यत्तु सर्वं केवलं भवति—"वाचारम्भणं विकारो नामधेयम्" [छान्दोग्य० ६।१।४]। एवमेव जगदिदं ब्रह्मव्यतिरेकेण 'असत्' एव भवति। तथा च श्रुतिः—"सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन" [बृहदारण्यक० ४।४।१९] ! इति। किञ्च, सर्वोऽयं नामरूपप्रपञ्चः सर्वोऽयं रूपभेदः सर्वोऽयं नानात्वभावो भवत्यविद्याकल्पितः, अविद्याप्रत्युपस्थापितः, अविद्याध्यारोपितः, मिथ्याज्ञानविजृम्भितः, केवलोऽभिमानः, सम्यग्दर्शनविहेयः; यथा नाम सर्पो रज्ज्वाम्, पुरुषः स्थाणौ, जलं मरीचिकासु भवति केवलो भ्रमः सुपरीक्षणेन प्रत्याख्येयः। असतोऽप्यस्य जगत उत्पत्तिकारणं ब्रह्म। तथा हि—मायावी यथेन्द्रजालं प्रसारयति तथैव ब्रह्म प्रसारयति जगदिदं 'असत्' एव वस्तुतः। तत्र वस्तुसद्रूपेण प्रत्ययो भ्रम एव। यथैन्द्रजालिको मायावी वितन्वन्न-पीन्द्रजालं नात्मना विक्रियते, तथैव मायीदं ब्रह्म जगत्प्रसारणपरमपि न भवति विकृतम्। यथेन्द्रजालात्मिकां मायां प्रतीत्यैन्द्रजालिको मायावी बहुरूपः प्रतिभाति, तथैवाविद्यां प्रतीत्य ब्रह्म विभाव्यते बहुरूपम्। यथेन्द्रजालस्यैन्द्रजालिकं विना न स्थितिः, तथैव जगतोऽस्य स्थिति-रपि नान्तरेण ब्रह्म भवतीति जगत्स्थितिकारणं ब्रह्म। अस्य जगतो ब्रह्मणि लयो भवति नान्यत्र। यथा पृथिवी स्वात्मन्येव वृक्षवनस्पत्यादीन्युपसंहरति, एवं भवति ब्रह्म स्वात्मन्येवोपसंहारकारणम्। स्थिते जगति सर्वोऽयं भेदव्यवहारोऽविद्यानिर्मित्तो मिथ्याज्ञानहेतुकः। भेदशक्तिरपि जगतः पूर्वम्, जगतः परतश्च भवत्यविद्यानिश्रितैव मिथ्याज्ञानहेतुकैव। न हि मिथ्याज्ञानस्य, अविद्याया वा किमपि मूलं ज्ञायते। कथं वा ज्ञायेत नाम। यामाश्रिता वयमसदपीदं जगत्पश्यामः, यथा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेत्रातुरा असदपि चन्द्रद्वयम् , तां सर्वव्यवहारप्रपञ्चस्य प्रवृत्तिनिमित्तभूतां विहाय कथं प्रवृत्तिपरायणा अवगन्तुं पारयामो वयं किञ्चिदपि तदुत्तरम् । नानाभावो योऽयं नामरूपप्रपञ्चः स माया । सेयं तत्त्वान्यत्वाभ्यां भवत्यनिर्वचनीया । यथा स्वप्ने नामरूपप्रपञ्चस्तावत्कालं सत्यो भवति यावत्काल स्वप्नावस्था तिष्ठति, प्रबोधे तु तस्य मिथ्यात्वप्रत्ययो भवति; एवं व्यवहारार्थोऽयं नामरूपप्रपञ्चो नापि ब्रह्म नापि च ब्रह्मेतरत् तिष्ठत्येवाविज्ञाते परमार्थे । ज्ञाते परमार्थे तु तस्य मिथ्यात्वप्रत्ययो भवति । केवलमेकमद्वितीयं ब्रह्मैवावभासते । तस्य केवलस्यैव ब्रह्मण एष परिणामो वा विवर्त्तो वा यदेष व्यवहारार्थो नामरूपप्रपञ्चो जगदाख्यः । तस्य प्रपञ्चस्य ब्रह्मानन्यत्वं ब्रह्मतादात्म्यं कार्यस्य कारणात्मकत्वात् सिद्ध्यति । दृश्यते हि कारणस्य मृत्तिकाया बहुधा विकृतेषु मृण्मयेषु भाण्डेषु मृत्तिकेति सत्यं रूपमव्याहतम् । एवमेव कारणस्य ब्रह्मणो विकृतेऽपि प्रपञ्चे ब्रह्मेति सत्यं रूपं न व्याहन्यत इति द्रष्टव्यम् ॥

इति वेदान्तावतारप्रबन्धे सर्गो नाम तृतीयं प्रकरणम् ॥ ३ ॥

२४ यद्यपि जगदिदं मिथ्या तथाप्यत्र संसरन्नात्मा सत्य एव । एष आत्मा न प्रमाणगम्यः । प्रमाणजातमेनमात्मानमाश्रित्य वर्तते, न त्वेष प्रमाणजातमाश्रित्य वर्तते [ब्रह्मसू० २।३।७ शाङ्कर०] । नापि चायमात्मा प्रतिषेद्धुं शक्यम् । प्रतिषेध्यस्यात्मनो भवत्येव यस्मात् प्रतिषेधात् पूर्वमवस्थानम् [ब्रह्मसू० २।३।७ शाङ्कर०] ।

२५ ब्रह्मणोऽविकृतत्वान्नायमात्मा ब्रह्मविकृतिः । ब्रह्मणोऽनवयवत्वान्नायमात्मा ब्रह्मावयवः । प्रत्युतैष ब्रह्मैव । ब्रह्मैवेदं सर्वम् । सदात्मकं ब्रह्म : सदात्मक एष आत्मा । ब्रह्मव्यतिरिक्तस्यासत्त्वात् ।

२६ चैतन्यं ब्रह्म । चैतन्यमात्मा । तदिदं परिशुद्धं चैतन्यं भवति—विभु, सर्वगतम् , सर्वज्ञम् , सर्वशक्ति, अकर्तृ, अभोक्तृ ।

२७ परिशुद्धमिदं चैतन्यं मिथ्याज्ञाननिश्रितोपाधिवशात् संसारि भवति । अपरिशुद्धमिदं यदिदं संसारि चैतन्यं तदिदमविभु भवति हृदयाकाशवर्ति । असर्वत्रगमिदं भवत्यणु, यथा मनः । उपाधिपरिच्छिन्नज्ञानशक्ति न भवति सर्वज्ञम् । तत एव न च सर्वशक्ति । उपाध्यावरणादेव भवति कर्तृ । तत एव च भोक्तृ । अयं संसारी चैतन्यात्मा यथा करोति तथा भुङ्क्ते । भोगार्थं पुनः पुनर्जायते । जायमानो न केवलं भुनक्ति करोति चापि । कुर्वाणः पुनः कर्मफलभोगाय जायते । सोऽयं प्रेत्य प्रेत्य पुनः पुनर्भावो जन्म = उत्पत्तिर्नाम संसारो भवचक्रम् । स चायमनादिः संसार आमुक्तेः प्रवर्तते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२८ अविद्यानिश्रितोपाध्यालम्बन एषोऽनादिरनन्तः संसारः। उपाधिवशादेव भवति संसारी पुरुषः कर्ता भोक्ता शरीरी। शरीरं प्रतिजन्म नूतनं स्थितिवृद्धिशालि च्युतौ विशीर्णं सद् भूतेषु लीयते। उपाधयो नाम मन इन्द्रियाणि मुख्यप्राणः सूक्ष्मशरीरं कर्माशयश्च।

२९ कार्यकरणसंघात्मके स्थूलदेहे परिच्युतेऽपि करणानां वृत्तयो नात्मना वियुज्यन्ते। यथोर्णनाभस्तन्तुसन्ततिं विसृजति संहरति च तथैवात्मा सृजतीन्द्रियगणं च्युतिकाले त्वात्मन्येव संहरति। इन्द्रियाश्रयं हि भवति ज्ञानं कर्म च। जीवाख्यस्यात्मनो भवन्ति पञ्च ज्ञानेन्द्रियाणि—दर्शनश्रावणघ्राणरसनस्पर्शनाख्यानि। पञ्च कर्मेन्द्रियाणि—ग्रहणगमनवचनजननविसर्जनव्यापारपराणि। दशेमानीन्द्रियाणि स्थूलशरीरान्वयलब्धप्रवृत्तिनिमित्तनामानि मनसैव व्यापारवन्ति भवन्ति। तथा च श्रूयते—"मनसा ह्येव पश्यति मनसा शृणोति" [बृहदारण्यक० १।५।३] इत्येवमादि। शरीरव्यापीनि हि भवन्तीन्द्रियाणि। मनस्त्वेकदेशि। अणुपरिमाणमिदं मनो हृदयाकाशे वर्तते। तदिदं मनोऽभिव्याप्य सर्वतो वर्तमानो जीवात्मा केवलं मोक्षकाले तेन मनसा विरहितो भवति। मनःसहित इन्द्रियगण एव करोति भुङ्क्ते च। जीवात्मा तु तत्र बद्धोऽपि न करोति न भुङ्क्ते। केवलमुदासीनवदासीनस्तिष्ठति। कर्तृत्वभोक्तृत्वव्यवहारस्तु मनइन्द्रियाश्रयोऽपि जीवात्मन्यज्ञानकृताभेदाध्यवसायमूलक एव, न तु वास्तविकः।

३० जीवात्मनो यथा मनइन्द्रियाभ्यामैकात्म्य न तथा मुख्येन प्राणेन। मुखे भवः प्राणो मुख्यः प्राण इत्यस्मिन्नर्थ उपनिषत्सु प्रयुक्तोऽप्येष शब्दः सुप्रतिष्ठितायां वेदान्तपद्धतौ विकासमुपगतः प्रधानं स्वामिभूतं प्राणमाह। यथा मन इन्द्रियाणि च प्रत्यक्षकृद्वृत्तयो मुख्यप्राणाश्रिता वृत्तिभेदेन भिन्नाः पदार्था भवन्ति, तथा मुख्यप्राणो देहाधारभूतः पञ्चशाखो वृत्तिभेदेन विभज्यते। तत्र प्राण उच्छ्वासं नियमयति। अपानः श्वासम्। व्यानः श्वासोच्छ्वासविरामे शरीरं धारयति। समानो जठराग्निदीपकः। त एते चत्वारः प्राणा जीवनधारकाः। उदानश्च्युतिकाल एकशतनाडीनामन्यतमया जीवात्मानं शरीराद् बहिर्नयन् भवति जीवनस्यैहिकस्यान्तकरः। जीवात्मना सह मन इन्द्रियाणि मुख्यः प्राणश्चेति सर्वाणि शरीरमुत्सृजन्ति। यथा भवे जीवनकाले शरीरधारणेनैतानि जीवात्मानं न कदापि त्यजन्ति, तथा मरणानन्तरमपि बीजरूपेण जीवात्मानुगानि भवन्ति। बीजरूपैस्तैस्तत्र तत्र भवे जीवात्मा लभते शरीरम्।

३१ यथेन्द्रियरूपेण भौतिकानि करणानि जीवात्मानमनुगच्छन्ति, तथैव भौतिको देहः सूक्ष्मशरीररूपेण जीवात्मानमनुगच्छति। सूक्ष्मशरीरं नाम भूतसूक्ष्माणि देहबीजानि। तदिदं सूक्ष्म-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शरीरं प्रतनु च भवति स्वच्छं च । तत एवोत्क्रमणकाले न दृश्यते । एतत्सूक्ष्मशरीरं यावत्पर्यन्तं स्थूलशरीरेण न वियुज्यते तावत्पर्यन्तमेव स्थूलशरीरमुष्णं तिष्ठति । सूक्ष्मशरीरवियोगे तु तच्छीतं भवति ।

३२ सततमात्मानुबन्धीनि भौतिकानीमानि मनइन्द्रियाणि भूताशयलक्षणं सूक्ष्मशरीरं च भवन्ति धर्माधर्मलक्षणकर्माशयोपहितानि । कर्माशयो नाम कर्माश्रयः । स भूताशयेन सूक्ष्मशरीरेण सह जीवमनूत्क्रान्तो जीवस्य गतिं निर्धारयति शुभाशुभकर्मविपाकभूतानां सुखदुःखानाम्, कर्मणां च करणाय शुभाशुभलक्षणानाम् ।

३३ संसारिणो जीवस्य सन्ति चतस्रोऽवस्था जाग्रत्स्वप्नसुषुप्तिमरणाख्याः । जाग्रद-वस्थायां जीवो हृदि स्थितो मनसा संयुक्तो मनइन्द्रियद्वारा जानन् कुर्वंश्च शरीरं शास्ति । स्वप्ने इन्द्रियाणि निर्व्यापाराणि भवन्ति, केवलं मन एव सव्यापारं तिष्ठति । तत्र मनः पूर्वमिन्द्रियाणि स्वस्मिन् संहृत्य वृणोति जीवं ततो नाडीद्वारेण शरीरमभिव्याप्य जाग्रद्वासना-वशेन स्वप्नं पश्यति । सुषुप्तौ तु मनश्चेन्द्रियाणि च निर्व्यापाराणि नाडीप्रविष्टानि सव्यापारं मुख्यप्राणमाश्रित्य तिष्ठन्ति । एवं न केवलमिन्द्रियेभ्यः प्रत्युत मनसोऽपि विप्रयुक्तो जीवस्तस्मिन् क्षणे निर्वृतो निरुपाधिर्हृदयाकाशे स्वं रूपं संपद्य विहरन् जीवभावं परित्यज्य ब्रह्मैव भवति । सुषुप्तेः प्रबुद्धः पुनरपि ब्रह्मभावं विस्मृत्य संसारी भवति यथापूर्वः ॥

इति वेदान्तावतारप्रबन्धे जीवात्मा नाम चतुर्थं प्रकरणम् ॥ ४ ॥

३४ शरीराच्च्युतौ प्रविशन्तीन्द्रियाणि मनसि । मनः मुख्यप्राणे । मुख्यप्राणो धर्माधर्म-प्रभाविते जीवे । ततो जीवः सूक्ष्मशरीरं प्रविशति । एवं हृदये संहृतेष्वेतेषु हृदयाग्रं प्रदीप्तं भवत् प्रकाशयति मार्गम् । उदानश्च सोपाधिकं जीवं नयति शरीरादस्माद्बहिः । तत्र 'अपरा-विद्यावान्' जीवः सुषुम्नाभिधाया मूर्धन्यनाड्या बहिर्भवति । अज्ञानी तु सुषुम्नेतरशतसंख्याभ्यो नाडीभ्यो निष्क्राम्यति । विद्यावतस्तूत्क्रान्तिरेव न भवति । कर्मपरायणा अज्ञानिनः पितृयानेन गच्छन्ति । अपराविद्यावन्तो देवयानेन । विद्याकर्मविहीनास्तु पापा नान्यतरेण यानेन गच्छन्ति, तेऽगतिका दुर्गतिकाश्च भवन्ति ।

३५ परापरविद्याविहीनाः कर्मिणः पितृयानमार्गेण चान्द्रमसं लोकं यावद्गच्छन्ति ततो निवर्तन्ते । तत्रायं गमनक्रमः—धूमः, रात्रिः, कृष्णपक्षः, दक्षिणायनम्, पितृलोकः, आकाशम्, चन्द्रमा इति । चन्द्रमसं गत्वा देवैः सह मोदमाना जीवाः पुण्यक्षये कर्मानुशयबलात् ततः प्रति-निवृत्यात्र भूमौ जायन्ते । तत्रैष प्रतिनिवर्तनक्रमः—आकाशम्, वायुः, धूमः, मेघः, वर्षम्, ओषधि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वनस्पतयः, रेतः, गर्भ इति । गर्भमुपसंक्रम्य स्वकृतकर्मबलाद्भूयोऽस्मिन् भवे समुपजायन्ते । तत्र रमणीयाचरणा द्विजेषु जायन्ते । कपूयाचरणाः श्वशूकरचाण्डालादिहीनयोनिषु जायन्ते ।

३६ अथ सर्वथैव भ्रष्टाः केचन नरकादिषु वा पच्यन्ते । केचन सर्वथैवागतिका इहैव जायन्ते म्रियन्ते च । सेयमगतिस्तृतीयं स्थानमित्युच्यते । तदपेक्षया नरकाख्या दुर्गतिः स्थानान्तरमिति भवितव्या ।

३७ अथ कर्मिणोऽपि, अप्रतीकोपासनापरा अपि ज्ञानिनः केचनात्मैकत्वमनुपलब्धवन्तः सगुणं ब्रह्मोपास्य शरीरात् प्रच्यवन्ते । ते देवयानमार्गेण सगुणं ब्रह्म गच्छन्ति । तत्रायं गमनक्रमः अर्चिः, अहः, शुक्लपक्षः, उत्तरायणम्, संवत्सरः, [देवलोकः, वायुलोकः], आदित्यः, चन्द्रमाः, विद्युत् । विद्युद्द्वारा च क्रमेण वरुणलोक इन्द्रलोकः प्रजापतिलोकः, अन्ते ब्रह्मलोकः । ब्रह्मलोकस्यास्य प्रलयान्ता भवति स्थितिः । अस्मिन् लोके जीवो भुनक्त्यैश्वर्यम्, परन्त्वपरब्रह्मवत् तस्य स्वातन्त्र्यं न भवति । जीवस्यात्र स्थितिकालो ब्रह्मलोकस्थितिकालपरिमितो भवति । अत्र गतो जीवो न भूमौ पुनरावर्तते प्रत्युत तत्रैव सम्यग्दर्शनं लब्ध्वा यदा सलोकमपरब्रह्म परे ब्रह्मणि निलीयते, तदायमपि तेन सह तत्र निलीनो ब्रह्मभूतो भवति । क्रममुक्तिरेषा भवति ब्रह्मोपासनफला ।

इति वेदान्तावतारप्रबन्धे प्रेत्यभावो नाम पञ्चमं प्रकरणम् ॥ ५ ॥

३८ ब्रह्मणो-"ऽन्यदार्तम्" [बृहदारण्यक० ३।४।२] इति श्रुतेर्ब्रह्मोपलब्धिः परमः पुरुषार्थः । तदेवैतस्मादार्ताद् बन्धान्मोक्षः । स मोक्षः कथं भवति ? यतः कर्म सुकृतदुष्कृतलक्षणं भवति भवान्तरहेतुकं ततः कर्मणो नैव भवति मोक्षः । नापि संक्लेशानां व्यवदानात् (=शोधनात्, संस्कारात्) भवति मोक्षः । न हि सततमपरिवर्तनशीले व्यवदाते परिशुद्धे आत्मनि भवन्ति संक्लेशाः, येन तेषां व्यवदानकथा प्रवर्तेत । "तमेव विदित्वातिमृत्युमेति" [श्वेताश्वतर० ३।८] इत्येवमादयः श्रुतयो ज्ञानान्मोक्षो भवतीति विज्ञापयन्ति । तच्च ज्ञानं न कादाचित्कं कृतकारितरूपेण कृत्रिमं सान्तं भवति प्रत्युत नित्यम् "अनन्तम्" [तैत्तिरीय० २।१] भवति । तादृशं ज्ञानम्-"तत्त्वमसि" [छान्दोग्य० ६।८।७] इत्युक्तदिशा ब्रह्मैकत्वविज्ञानाद् भवति । लब्धे ज्ञाने तथाभूते जीवो ब्रह्मभूत एव भवति [शाङ्कर० १।१।४] ।

३९ आत्मज्ञानं हि मोक्षः । तद् विज्ञातृलक्षणम्, न तु विज्ञातव्यलक्षणम् [बृहदारण्यक० ३।४।२] । अत एव यश्चात्मा यच्चात्मज्ञानं तयोरभेद एव प्राप्नोति । एवमात्मैव मोक्षः । स च लब्ध एवास्ते । न तु लब्धव्यः । न ह्यात्मोपलब्धौ विहायात्मानं भवति किमपि कारणान्तरम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत एवोच्यते—नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ [कठ० १।२।२२] इति । अपरब्रह्मोपासनायां भेदबुद्धिस्तिष्ठति । उपास्योपासकभावेन तत्रात्मनो द्वैविध्यं भवति । तत्रापरस्योपास्यस्य ब्रह्मणो ज्ञानं तदनुग्रहाधीनं भवति । परायां विद्यायां त्वात्मनो विज्ञातव्यविषयाभावाद्विहायात्मानं नात्मज्ञानायान्यो हेतुप्रत्ययो भवितुमर्हति ।

४० आत्मज्ञानसाधनायां नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमादिषट्कसाधनसंपत्, मुमुक्षुत्वं चेत सन्ति चत्वार उपायाः । ते च कुशलकर्मोपासनाभ्यां भवन्त्युपकृताः । कर्म साक्षान्न ज्ञानजनकं किन्तु सहकारिमात्रम् । तदन्तरायाणां क्लेशानां व्यपोहनेन ज्ञानोत्पत्तौ साहाय्यमाचरति । तदिदं कर्म द्विविधम्—बाह्यं प्रत्यासन्नं चेति । तत्र बाह्यानि कर्माणि नाम वेदानुवचनं यज्ञो दानं तपोऽनशनं चेत्येवमादीनि [बृहदारण्यक० ४।४।२२] । प्रत्यासन्नानि नाम शान्तिर्दमनमुपरतिस्तितिक्षा समाधिश्चेत्येवमादीनि [बृहदारण्यक० ४।४।२३] । न ह्येभिर्दूरप्रत्यासन्नैः कर्मभिर्भूयान् कनीयान् वात्मा भवति । एतानि तु तदुपलब्धौ केवलमुपकारकाणि । उपासनं यद्यपि साक्षादपरब्रह्मज्ञानाय भवति, तथापि तत्त्वमसीत्यादिशब्दब्रह्मणः सततमभ्यासाच्छीघ्रं चिरेण वा ज्ञानं जायत एव । तथा च—"शाब्दे ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति" इति वचनम् । लब्धे ज्ञाने नोपासनं प्रयोजनकरं भवति । अलब्धे तु यावज्जीवनं यावदन्तिमक्षणं कर्तव्यमेव, तस्य च्युतिकाले भवान्तरनिर्धारत्वात् । परब्रह्मज्ञानप्रयोजनकं निदिध्यासनं येन केनासनेन कर्तुं शक्यम् । अपरब्रह्मोपासनार्थं तूपविश्यैव निदिध्यासनं कर्तव्यं न तु शयानेन नापि स्थितेन ।

४१ जीवब्रह्मणोऽभेदाधिगमलक्षणं ज्ञानं भवत्यपरोक्षम् । ब्रह्माधिगमे कर्माणि क्षीयन्ते [मुण्डक० २।२।८; छान्दोग्य० ४।१४।३; ५।२४।३] । ज्ञानिनः प्रक्षीणकर्मण एवं भवति—"पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि त्रिस्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि । नेतः पूर्वमपि कर्ता भोक्ता वाहमासं नेदानीं नापि भविष्यत्काले" [शाङ्कर० ४।१।१३] इति । कर्तृत्वस्य मिथ्यात्वेन प्रतिषेधात् तत्फलभूतस्य देहस्य मिथ्यात्वं भवत्येव । अत एव ज्ञानी स्वशरीरसुखदुःखाभ्यां तथैवानभिभूतो भवति यथा ज्ञानी परकीयाभ्यां सुखदुःखाभ्याम् । यश्च शरीरमात्मीयं मत्वा तत्सुखदुःखाभ्यामभिभूतो भवति तस्य ज्ञानमपरिनिष्पन्नमपरिपूर्णं च तिष्ठति ।

४२ ज्ञानिनो नास्ति संसारः, न देहः, न दुःखम्, नापि च किमपि कर्तव्यम् । सुकृत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुष्कृते समतिक्रान्तस्य तस्य शुभमपि करणीयं न भवति । अशुभस्य तु कथैव का । सर्वथैवोदासीनस्य ज्ञानिनः कर्माणि कुर्वतोऽपि कर्मबन्धो न भवति ।

४३ ज्ञानाग्निना दग्धेषु कर्मसु न भवति प्रेत्यभावप्रसङ्गः । इदं शरीरं तु प्रारब्धकर्मविपाकभूतं ज्ञाने लब्धे प्रबुद्धस्यापि तथैव ध्रियते यथा निष्पन्ने पात्रे भ्रमच्चक्रम् । यथा वा नेत्रदोषेण पश्यन्नपि धीमान् चन्द्रद्वयं तदपनोदनायामसमर्थोऽपि द्वयं न निश्चिनोति तथैवोद्वहन्नपि शरीरं ज्ञानी तदपनोदनायामसमर्थोऽपि न तेन वञ्चितो भवति न तेन विप्रलब्धो भवति ।

४४ ज्ञानिनोऽनारब्धकर्मणां ज्ञानेन प्रहाणे, प्रारब्धकर्मणां च भोगेन विप्रणाशे सत्यस्य शरीरस्य च्युतौ–"न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" [बृहदारण्यक०।४।४।६] । किञ्च,

यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥ इति ।
[मुण्डक ०।३।२।८]

इति वेदान्तावतारप्रबन्धे मोक्षो नाम षष्ठं प्रकरणम् ॥६॥

परिनिष्ठितोऽयं प्रबन्धः ॥ कुशलम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साक्षिस्वरूपविचारः

श्रीमुरलीधरमिश्रः, राजकीयसंस्कृतमहाविद्यालयः, काशी ।

सर्वेषां मनसि विचिकित्सेयं जायते यत् कोऽहम्, किञ्चेदं जगत्, कुत आयातम्, केनेदं निर्मीयत इति। तत्र मीमांस्यमाने स्वभाववादः, आरम्भवादः, परिणामवादः, विवर्तवादश्चेति चत्वारो वादाः समुपलभ्यन्ते। तत्र स्वभाववादे स्वीक्रियमाणे न हि कश्चित् किञ्चित्प्रयोजनमुद्दिश्य कुत्रचित् प्रवर्तेत, सर्वेषां कार्यमात्राणां स्वभावसिद्धत्वात् तत्तत्कारणसंघटनाय प्रवृत्त्यादेर्वैयर्थ्यात्। तस्मात्कारणादेवासतः कार्यस्योत्पत्तिरिति तत्तत्कार्यार्थं कारणविषयिणीं पुरुषाणां प्रवृत्तिं दृष्ट्वाऽनुमीयते। तत्रापि सतः कारणसमवायादसतः कार्यस्योत्पत्तिस्वीकारे सर्वतः कारणेभ्यः सर्वे पदार्था उत्पद्येरन्, अविशेषात्। ततो घटार्थी तन्तूनपि गृह्णीयात्। स्वभाव एष केषाञ्चित्कारणानां यत्केषाञ्चिदेव कार्याणामुत्पादकतेति चेत्; तदा पुनरपि स्वभाववादगर्ते प्रपातः। अतोऽकामेनाप्यनायत्या सत एवोत्पत्तिं स्वीकृत्य परिणामवाद एष्टव्यः।

तत्र परिणामस्य भावविकाररूपत्वाद् विकारवतां च पदार्थानामनित्यत्वाद् अनित्यानां च नाशदर्शनात् कार्यकारणसमुदायस्य विनाशित्वेन स्वत एव संसारोच्छेदात्तदर्थं मुमुक्षुरेव न स्यादतो विवर्तवादः सुदृढमास्थेयः सर्वैः। तत्र वादे नित्यस्यैकस्य स्वभावतश्चितः स्वाधिष्ठितानिर्वचनीयाज्ञानमायादिशब्दवाच्यस्योपाधेराश्रयणेन सर्वस्य प्रपञ्चस्य भासनाद् रज्जुतत्त्वज्ञानादज्ञानवशेन भातस्य सर्पादेरिव तत्तच्छास्त्रद्वारा ज्ञाते वस्तुतत्त्वेऽज्ञानवशेन सतामिवेतस्ततो लोलुठ्यमानानां प्रपञ्चभूतानां पदार्थानां नाशान्न शास्त्रोपदेशानामानर्थक्यम्।

तत्र परमार्थतः सत्याया अपि प्रकाशमानायाश्चितोऽनाद्यनिर्वचनीयाविद्याया आवरणविक्षेपशक्तिविशिष्टाया आवरणशक्त्या तिरोभावादप्रकाशैव सा भवति। इन्द्रियादिसहकारेणान्तःकरणस्य विषयाकारवृत्तिरूपेण परिणामात्तदवच्छिन्नाविद्याया नाशात् संकोचाद्वा तद्देशस्थायाश्चितोऽन्तःकरणप्रतिफलिततत्तादात्म्यापन्नप्रमातृद्वारा भानम्। अविद्यावृत्तेरन्तःकरणधर्मस्य सुखादेश्च साक्षिद्वारा भानम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र साक्षी[1] कः कीदृशश्चेति विचिकित्सायाम्—"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥", "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति", "न दृष्टेर्द्रष्टारं पश्येः", "नान्योऽतोऽस्ति द्रष्टा",

---

१ साक्षाच्छब्दात् 'साक्षाद् द्रष्टरि संज्ञायाम्' इति सूत्रेणेनिप्रत्यये निष्पन्नो भवति साक्षिशब्दः । साक्षाच्छब्दश्च प्रत्यक्ष एव लोके प्रसिद्धः—साक्षाद् दृष्टः साक्षाच्छ्रुत इति । मनुनाप्युक्तम्—"समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति" इति । तत्र द्विविधः साक्षी—एको लोके राजनीतौ प्रसिद्धः, परो वेदान्तेषु तत्सादृश्याद् गौणतया प्रसिद्धिं गतः । तत्र लोके राजनीतौ स साक्षिपदेनोच्यते यः किञ्चित्कर्म पश्यति शृणोति वा, परन्तु तदर्थं व्यापारं न करोति; केवलमन्येन स्वव्यापाराप्रयत्नेन निष्पाद्यं कर्म ताटस्थ्येन पश्यन्नन्यस्मै प्रकाशयति। एवमेव वेदान्तप्रसिद्धोऽपि साक्षी कर्तृभोक्तृद्वारा कारणसूक्ष्मस्थूलशरीरैः संपृक्तात्मना कृतं भुक्तं वा कर्म प्रकाशयति ताटस्थ्येन, न तु तस्य किञ्चित्करोति । तत्र राजनीतौ प्रसिद्धः साक्षी कीदृश इति जिज्ञासायामुक्तं याज्ञवल्क्येन—"तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः । धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः । यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥" इति । असाक्ष्यपि शास्त्रेण प्रतिपादितः । यदाह नारदः—असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः । वचनाद्दोषतो भेदात्स्वयमुक्तिर्मृतान्तरः ॥" इति । तत्रासाक्षिकथनमुक्तसाक्षिभ्योऽन्येषामप्यनिषिद्धानां साक्षित्वप्रदर्शनार्थम् । तत्र वचनादसाक्षिणः—"श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः । असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः ॥" इति । दोषादसाक्षिणः—"स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा । असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते ॥" इति । भेदादसाक्षिणः—"साक्षिणां लिखितानां च निर्दिष्टानां च वादिनाम् । तेषामेकोऽन्यथावादी भेदात्सर्वे न साक्षिणः ॥" इति । स्वयमुक्तिस्तु—"स्वयमुक्तिरनिर्दिष्टः स्वयमेवेत्य यो वदेत् । सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हति ॥" इति । मृतान्तरस्तु—"योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि । क्व तद्वदतु साक्षित्वमित्यसाक्षी मृतान्तरः ॥" इति । "त्र्यवराः साक्षिणो ज्ञेयाः" इत्युक्तेऽपि यदि वादिप्रतिवादिभ्यामनुमतः स्यात्तर्ह्येकोऽपि साक्षित्वमर्हति । यदुक्तम्—"उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित्" इति । स च साक्ष्येकादशविधो भवति—पञ्चविधः कृतः, षड्विधोऽकृतः । "लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च । गूढश्चोत्तरसाक्षी च कृतः पञ्चविधः स्मृतः ॥" इति । अकृतमपि नारद आह—"ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् । कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः ॥ कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः ।" इति । तत्र प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणम्—"लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः । नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृताः॥" इति । एवमत्र प्रसङ्गाल्लोकप्रसिद्धसाक्षिविषये दिङ्निर्देश कृतः, वेदान्तप्रसिद्धसाक्षिविषये तु मूल एव विचारः प्रक्रम्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥" इत्याद्याः पारेशतं श्रुतयः कर्तृत्वभोक्तृत्वादिधर्मविशिष्टादन्यं साक्षिणमवबोधयन्ति। विवरणकारा अपि—"अज्ञाततया ज्ञाततया वा सर्वं साक्षिभाष्यम्" इत्यादिना शब्देन साक्षिणं प्राचीकटन्। वेदान्तपरिभाषायामप्यन्तःकरणस्य तद्धर्माणां च साक्षिवेद्यत्वमुक्तम्। किञ्च, साक्षिभेदेन प्रत्यक्षस्यापि द्वैविध्यमुक्तम्।

तस्य च साक्षिणः स्वप्रकाशत्वमवश्यं वाच्यम्। यदुक्तम्—"अप्रत्यक्षप्रकाशस्य नार्थदृष्टिः प्रसिद्ध्यति" इति। स्वप्रकाशत्वं नाम ज्ञानविषयत्वं विनैव संशयादिविषयत्वायोग्यविद्यमानस्वरूपत्वम्। तदुक्तं तार्किकैः—"न हि जानन्नेव जानामि न वेत्याद्यनुभवति" इति। न च प्रमातुरेव ज्ञानाश्रयस्य नित्यस्य सत्त्वाज्ज्ञानादीनां धर्माणां विकारित्वेऽपि तस्याविकारित्वं स्वीकार्यमिति वाच्यम्; धर्मधर्मिणोस्तादात्म्यस्वीकारेण धर्मस्य विकारित्वे धर्मिणोऽपि विकारित्वस्य निश्चप्रचत्वात्। तदुक्तम्—"उपयन्नपयन् धर्मो विकरोति हि धर्मिणम्" इति। अग्निपुराणेऽप्युक्तम् -"अहं साक्षी च चिन्मात्रो जाग्रत्स्वप्नादिकस्य च" इति। तथा भागवतेऽपि—"न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः" इति।

स च साक्षी न कर्तृत्वभोक्तृत्वविशिष्टः, अवभासकत्वात् सूर्यादिवत्। तदुक्तं संक्षेपशारीरके—

व्यापारं सकलस्य भासयति यो भास्वत्करो भास्करो
नासौ कर्तृतया जनस्य विदितो भूमौ द्युलोकस्थितः।
एवं स्वे महिमन्यवस्थितवतः संघातमुत्पश्यतः
स्वव्यापारसमन्वितं तव कुतः कर्तृत्वमुत्प्रेक्ष्यते॥

भूतानि पञ्च तव मोहसमुद्भवानि संघातरूपपरिणाममुपागतानि।
कुर्वन्ति कर्मफलमश्नुवते च तेषां साक्षी त्वमन्तरविलुप्तचिदेकरूपः॥

किञ्च, कर्तृत्वादिविशिष्टत्वे तस्य दृश्यवर्गपतितत्वाद् द्रष्टृत्वानुपपत्तिः, लोके दृश्यवर्गात् समुद्रपर्वतादेरतिरिक्तस्य द्रष्टुरनुभवात्। दृश्यत्वं च कर्तृत्वादेस्तेन तेन रूपेण परिणामाद्, आत्मनश्चापरिणामित्वात्। यदि च स्वाभाविकी कर्तृता स्यात् तदा स्वप्नेऽपि प्रतीयेत। यद्यपि स्वप्नेऽपि करोमीत्यादिप्रतीतिर्भवति परन्तु सा न वास्तविकी, तत्तत्कालोचितदेशकालादेरभावात्; स्वशिरश्छेदादेरपि प्रतीत्या तत्कर्तृत्वस्यापि वास्तविकत्वापत्तेः। तदुक्तं ब्रह्मसूत्रे—"मायामात्रं तु, कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" इति। यद्यपि सिद्धान्ते जाग्रत्सृष्टेरपि मायामय-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वमेव, तथापि व्यावहारिकत्वेन व्यवहारकाले सत्यमिव प्रतिभासते। स्वाप्नस्य तु व्यावहारिकत्वमपि नास्ति। अत एव सूत्रकारेण पूर्वोक्तसूत्रे मात्रशब्दोपादानं कृतम्।

लोके यद्विषये यः साक्षी स तद्विषये उदासीनस्तद्विषयकज्ञानवाँश्च गृह्यते। एवमयमपि सर्वव्यवहारातीतः सर्वव्यवहारभासकश्च। स्थूलसूक्ष्मशरीरात्मकदेहद्वयेऽन्तःकरणावच्छिन्नचैतन्यप्रतिबिम्बगस्यान्तःकरणस्य देहद्वयाकारवृत्तिभिर्भासनं भवति। सा च वृत्तिर्विच्छिद्य विच्छिद्य जायते। ततश्च मध्ये वृत्त्यभावेन यद्देहद्वयभासनं तत्साक्ष्यधीनम्। अत एवाहङ्कारादीनां सर्वदा भानम्। एकविषयकज्ञानद्वययोरनुसन्धानं च—एतावन्तं कालमिदमहं पश्यन्नेवाहमासमिति। जीवकूटस्थयोरन्योन्याध्यासेन च साक्षिभास्येनापि वस्तुना प्रमातुर्व्यवहारः प्रसिद्ध्यति। जीवस्य व्यवहारकर्तृत्वादेव न साक्षित्वम्। अत्रैव दृष्टान्तत्वेन नृत्यशालास्थदीपो दर्शितः। तथा हि—

नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीम्।
दीपयेदविशेषेण तदभावेऽपि दीप्यते ॥ इति।

एवं साक्षी चिदाभासविशिष्टाहङ्काररूपं जीवं प्रमातारं विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्वान्नृत्याभिमानिप्रभुतुल्यम्, प्रभुवद्धर्षविषादादेरभावात् सभ्यवद्विषयान्, नानापरिणामित्वादनेकरूपधारिणीं नर्तकीमिव बुद्धिम्, वादकादीनिवाक्षाणि दीपयन् तेषामभावेऽपि स्वयमपि प्रकाशते। एवं चैतन्मते शुद्धचिदेव जीवेश्वरादिभिन्नः जीवाभेदमापन्नो जीवाधिष्ठानत्वेन जीवतादात्म्यापन्नः प्रतिशरीरं भिन्नः साक्षी कूटस्थपदवाच्यः।

कौमुदीकारमते यथेदं रजतमिति ज्ञाने शुक्तेरेव रूपमिदमंशः। स च न शुक्तिरूपः किन्तु शुक्तेः पृथक्, अन्यथा शुक्तिवत्तस्याप्यज्ञातत्वप्रसङ्गात्। रजतवदध्यस्तत्वाभावेन रजताद्भिन्नोऽपि प्रतिभासतो रजताभेदेन प्रतीयमानो रजतकोटावेवान्तर्भवति। तथैवेश्वरस्य स्वरूपमपि साक्षी जगत्सृष्टिस्थितिप्रलयकर्तृत्वादिरूपादीश्वराद्भिन्नः स्वयं प्रकाशरूपो जीवगताज्ञानाद्यवभासयन् जीवस्यान्तरङ्गो जीवगतप्रवृत्तिनिवृत्त्योरनुमन्ता सुषुप्तिकाले केवलाज्ञानादेश्च भासकः प्राज्ञशब्दितः।

तत्र परमेश्वरस्योभयरूपत्वे प्रमाणं तूभयविधा श्रुतिरेव। तत्र जगत्सृष्ट्यादिकर्तृत्वे—"यतो वा इमानि भूतानि जायन्ते यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व" इत्यादिप्रश्ने—"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्याद्याः श्रुतयस्तथान्या अपि सृष्टिप्रतिपादिकाः श्रुतयः प्रमाणम्। साक्षिरूपत्वे तु—"एको देवः", "अनश्नन्नन्यो अभिचाकशीति" इत्याद्याः श्रुतयः प्रमाणम्। न च शुद्धचिद्रूपः स संभवति, देवत्वादिश्रुतिविरोधात्। "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति स्मृत्यनुसारेण सर्वभूतान्तरात्मत्वस्य तत्रैव संभवात्। स एव च साक्षी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुषुप्त्युत्क्रान्त्यवस्थयोर्जीवभेदेन परमेश्वररूपेण प्राज्ञशब्देन प्रतिपादितः—"तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्, एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्", प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याति" इति श्रुतिभ्याम्।

केषाञ्चित्खल्वेवं मतं यद्बिम्बरूप ईश्वरोऽविद्यायां प्रतिबिम्बरूपो जीवोऽप्येकस्तत्तदन्तःकरणतादात्म्यापत्त्या भेदे सति तत्तत्कर्तृत्वभोक्तृत्वादिविशिष्टभेदेन प्रतिभासते। स एवाविद्याप्रतिबिम्बो जीवः साक्षी, अकर्तृत्वात् सर्वस्य पदार्थस्य द्रष्टृत्वाच्च। नन्वेवं तत्र देवत्वादिधर्माभावात्—"एको देवः" इत्यादिमन्त्रविरोधः, इति चेन्न; ब्रह्मणः परमेश्वरस्यैव जीवभावापन्नस्य साक्षित्वरूपेण तेन मन्त्रेणाभिधानात्।

केषाञ्चिन्मतेऽविद्योपहितो जीवः साक्षी। तस्य सर्वेषां पुरुषाणामन्तःकरणसंबन्धाविशेषेण पुरुषान्तरस्यापि पुरुषान्तरान्तःकरणधर्माणां प्रत्यक्षत्वापत्तिः, अन्तकरणधर्माणां प्रमात्रादेश्च साक्षिभाष्यतयैव प्रत्यक्षत्वस्वीकारात्। अतोऽन्तःकरणोपहितो जीवः साक्षी। एवं चान्तःकरणभेदेन साक्षिणोऽपि भेदान्न पुरुषान्तरान्तःकरणधर्माणां पुरुषान्तरस्य प्रत्यक्षम्। सुषुप्त्यवस्थायामन्तःकरणस्य लीनत्वेऽपि सूक्ष्मरूपेणावस्थानान्न साक्ष्यभावः। अत एव तस्यामप्यवस्थायां साक्षिणाऽज्ञानप्रतिभासः। प्रमाणमत्र सुषुप्तोत्थितस्य मूढोऽहमस्वाप्सं न किञ्चिदवेदिषमिति परामर्श एव। सुषुप्तावन्तःकरणस्य साक्षिणः सत्त्वेऽपि तद्विशिष्टस्य प्रमातुरभावान्न विशेषरूपेण ज्ञानम्। अन्तःकरणस्य विशेषणोपाधिभ्यामेव तयोर्भेदादिति।

अस्तु तावत् साक्षी। परन्तु चैतन्यमात्रमज्ञानेनावृतम्, अन्यथा सर्वस्य सर्वदा प्रमाणमन्तराऽपि सर्वज्ञामं स्यात्। तच्चाज्ञानावरणं प्रमाणद्वाराऽन्तःकरणवृत्त्याऽपोह्यते। तथा च साक्षिणो वृत्तिविषयत्वाभावेनावरणाभावस्य विद्यमानत्वेन कथमविद्याहङ्कारादीनां साक्षिवेद्यत्वमिति चेच्छृणु। यथा राहुणावृतस्य सूर्यस्यान्यानवभासकत्वेऽपि राहोर्भासकत्वम्, तथैवाज्ञानेनावृतेन साक्षिणा प्रमाणद्वारा वृत्तिमन्तरेण घटादीनामनवभासकत्वेऽप्यनाद्यनिर्वचनीयाविद्याहङ्कारादीनां भासकत्वे न काचित्क्षतिः। न चैवमपि राहुवदविद्यावभासकत्वेऽप्यहङ्कारादीनामवभासकत्वं कथमपि न स्यादिति वाच्यम्; तथा सति साक्षिणोऽज्ञानानावृतत्वस्यैव युक्तत्वात्। अन्यथाऽहं जानाम्यहं सुखीत्यादिनिर्विचिकित्सप्रत्ययो न स्यात्। तदुक्तं वेदान्तसूक्तिमञ्जर्याम्—

अविद्याबुद्धितद्धर्मभासकांशेतरावृतिः।
कल्प्यते वस्तुतस्तेषु संशयादेरदर्शनात्॥ इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न चैवं साक्षिणोऽनावृतत्वे चैतन्यमिवानन्दत्वस्यापि भानं स्यादिति वाच्यम्; आत्मनि परप्रेमास्पदत्वरूपसुखस्य भासनं सर्वदा भवतीति प्रमाणमूर्धन्याभिः श्रुतिभिरपि स्वीकारात्। तथा च श्रुतिः—"आत्मनस्तु कामाय सर्वं प्रियं भवति" इति, "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरम्" इति च। विवरणकारा अप्याहुः—"भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्" इति।

नन्वेवमपि संसारदशायामप्यानन्दप्रकाशे मुक्तसंसारिणोरविशेषप्रसङ्गः, तदर्थं मुक्तिप्रतिप्रतिपादकवेदान्तज्ञानस्यापि वैयर्थ्यमिति चेन्न; संसारदशायामानन्दस्य सातिशयत्वेन परिच्छिन्नत्वेनातृप्तत्वात्, मुक्तावस्थायां च निरतिशयानन्दस्यापरिच्छिन्नत्वेन नित्यतृप्तत्वाद्विशेषोपपत्तेः। तथा हि—एकस्यैव सूर्यादिकस्य मालिन्यतारतम्ययुक्तेष्वनेकेषु दर्पणेषु प्रतिबिम्बे उपाधितारतम्येन प्रतिबिम्बतारतम्यम्, एवं वस्तुतो निरतिशयस्याप्येकस्यानन्दस्यान्तःकरणप्रतिबिम्बतया साक्ष्यानन्दभावे तत्तद्विषयविशेषसंपर्कजन्यशुद्धितारतम्यवदन्तःकरणप्रतिबिम्बतया संसारदशायां प्रकाशमानेऽप्यानन्दे उपाधिगतापकर्षाद्यध्यस्ततातारतम्ये सातिशयत्वम्; मुक्तिदशायां च निखिलापकर्षाध्यासनिवृत्तेर्निरतिशयत्वम्। केषाञ्चिन्मते मय्यानन्दो नास्ति न प्रकाशत इत्याद्यनुभवबलात् साक्ष्यंशं विहाय चैतन्यांशवत् तत्तत्सुखरूपवृत्तिकवलितं विहायानन्दमप्यावृणोति। एवं च न संसारदशायां ब्रह्मानन्दाविर्भावः, वृत्त्या तत्तद्विषयानन्दस्यैव भानात्। तथा च पूर्वोक्तरीत्या साक्षिणोऽनावृतत्वं सिद्धम्।

नन्वेवमपि ज्ञाननाशस्यैव संस्काराधायकत्वेन संस्कारस्य ज्ञाननाशरूपत्वेनाहमाकारान्तःकरणवृत्तिरूपस्य ज्ञानस्याभावात् साक्षिणश्च नित्यत्वात् संस्काराधानाभावेनाहङ्कारस्य सुखादीनां च स्मृतिर्न स्यादिति चेन्न; स्वगोचरवृत्त्यैव स्वगोचरसंस्काराधानमिति नायं नियमः, अपि तु यद्वस्तुगोचरवृत्त्यवच्छिन्नचैतन्ये यावन्तः पदार्थाः प्रकाशन्ते तद्वस्तुगोचरवृत्त्या तावत्सु पदार्थेषु संस्काराधानमित्येव नियमः। तथा च घटादिज्ञानेऽहङ्कारस्यापि भासनात् तद्विषयकसंस्काराधानस्य निर्विवादत्वात्। ज्ञानसुखादिस्थले ज्ञानरूपवृत्तेरभावेऽपि क्रियारूपवृत्तेस्तप्तायःपिण्डाद् विस्फुलिङ्गा इव सत्त्वेन स्वावच्छिन्नेन वह्निनेव साक्षिणो नित्यत्वेऽपि स्वस्वावच्छिन्नेनानित्येन साक्षिणा तेषां भासनात्, तेषामनित्यतया तदवच्छिन्नसाक्षिणोऽप्यनित्यतया संस्काराधानस्य सुष्ठूपपादनीयत्वात्।

ननु जीवचैतन्येनैव घटादीनामवभासादन्तःकरणवृत्तेर्भ्रमस्थलेऽविद्यावृत्तेश्च किं प्रयोजनमिति चेन्न; जीवचैतन्यस्याविद्योपाधिकत्वमते तस्य व्यापकत्वेऽप्यसङ्गित्वेन घटादेः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संबन्धाभावात् तेन तस्यावबोधासंभवात्। गोत्वस्य व्यापकत्वेऽपि गोव्यक्तावेव यथा संसर्गो न महिषादिव्यक्तौ स्वभावात्, तथैव जीवचैतन्यस्यान्तःकरणेनैव संसर्गो न घटादिना। एवं चान्तःकरणद्वारा घटादिभिः संबन्धार्थं वृत्तिरावश्यिकी। जीवचैतन्यस्यान्तःकरणोपाधिकत्वपक्षे परिच्छिन्नतया विषयादिना संसर्गाभावात् तत्संसृष्टविषयावच्छिन्नब्रह्माभेदसिद्ध्यर्थं वृत्तेरावश्यकत्वात्। अथवाऽविद्योपाधिकस्य जीवस्यापरिच्छिन्नत्वपक्षेऽप्यज्ञानेनावृतत्वान्न तस्य सर्वदा भानम्। किन्त्वन्तःकरणस्य स्वच्छतया तेनावरणस्याभिभवादन्तःकरणावच्छेदेनात्मनः प्रकाशो भवति। अत एवान्तःकरणावच्छेदेनैवाहमिति प्रतीयते। एवं च विषयावच्छिन्नचैतन्यस्याप्यावृतत्वात् तदपनयनार्थमन्तःकरणसंबन्ध आवश्यकः। स च वृत्तिमन्तरा न संभवतीत्यावरणाभिभवार्था वृत्तिः। तथा च चिदुपरागार्थत्वेन विषयचैतन्याभिव्यक्त्यर्थत्वेनावरणाभिभवार्थत्वेन चान्तःकरणस्य वृत्तिरवश्यमेवापेक्षणीया।

ननु चिदुपरागार्था वृत्तिरिति पक्षे वृत्त्या विषयचैतन्ययोः कीदृशः संबन्धः स्थाप्यते? समवायस्यास्वीकारात् तादात्म्यस्य संयोगादेश्च निष्क्रिययोरेतयोरसंभवात्, इति चेन्न; विषयविषयिभावसंबन्धस्य स्वीकृतत्वात्। यद्यपि विषयविषयिभावरूपसंबन्धस्वीकारे तादृशविषयविषयिभावस्य वृत्तेः पूर्वमपि सत्त्वेन वृत्तेर्वैयर्थ्यं स्यादतो विषयसंयोगे तत्तादात्म्यापन्नचैतन्यस्यापि परम्परया संयोगात् संयोगसंबन्धस्वीकारस्यैव युक्तत्वात्। अथवा वृत्तिद्वारा कार्याकार्यवृत्तिविषयसंयोगात् कारणाकारणचैतन्यविषययोः संयोगः संबन्धः, तथा च संयोगजसंयोगः संबन्धः।

विषयचैतन्याभिव्यक्तिपक्षे विषयावच्छिन्नचैतन्यं विषयप्रकाशकम्। विषयाणां चैतन्य एव कल्पिततया कल्पितस्य चाधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावेन तद्रूपत्वात्। जीवचैतन्यस्य तु विषयप्रकाशो वृत्त्या विषयावच्छिन्नचैतन्येन जीवचैतन्यस्य तादात्म्यापन्नत्वात्। केषाञ्चिन्मते बिम्बप्रतिबिम्बभूतयोर्जीवब्रह्मणोरैक्यासम्भवः, किन्तु विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टवृत्तौ प्रतिबिम्बं समर्पयति। प्रतिबिम्बेन सह जीवचैतन्यस्यैकीभावः।

वस्तुतो बिम्बप्रतिबिम्बयोर्भेदेन बिम्बेन विषयस्य संबन्धे प्रतिबिम्बेनापि संबन्धः स्यादित्युक्तिर्न समीचीनतामर्हति। अतः केचिदेवमभेदाभिव्यक्तिं स्वीकुर्वन्ति यद् विषयाधिष्ठानचैतन्यमेव बिम्बप्रतिबिम्बभावेन स्थितम्। तत्र बिम्बभूतचैतन्येन न विषयस्य संबन्धः संभवति, तस्य कल्पितत्वात्। किन्त्वाध्यासिकः संबन्धः। तत्रोपाधिविशिष्टबिम्बप्रतिबिम्बचैतन्ययोर्भेदेऽपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुपहितस्याभेदेन तेनापि संबन्ध उपपद्यत एव । न चात्र जीवब्रह्मणोः सांकर्यम्, उपाधिविशिष्टयोस्तयोर्भेदस्य सर्वैः सिद्धान्तितत्वात् । बिम्बात्मना तस्य सर्वज्ञत्वादिसिद्धेः ।

अथावरणाभिभावार्था वृत्तिरिति पक्षे को नामावरणाभिभव इति प्रश्ने केषाञ्चिन्मते साक्ष्यतिरिक्तचैतन्यमात्रमावृणोत्यज्ञानम् । तत्र विषयदेशे वृत्त्या ज्ञानेनाज्ञानाभिभवे प्रदीपादिप्रकाशेन महान्धकारस्यैकदेशनाश इवाज्ञानस्यापि नाशः । अथवा यथा विस्तृतः कटः समये संवेष्ट्यते हस्तादिना तदा कटस्य संकोचो भवति, पुनरपि प्रसारणे विस्तारो भवति तथैव ज्ञानेनाज्ञानरूपस्य महान्धकारस्य संकोचविस्तारौ । किं वा, यथा प्रतिभटमतिबलवन्तं दृष्ट्वा ततो भीतोऽन्यो भटस्तत्स्थानात्पलायते गते च प्रतिभटे पुनरायाति तथैव तद्देशादज्ञानस्य पलायनमिति ।

साक्षिणः सत्त्वं विद्यारण्यस्वामिकृतपञ्चदशीग्रन्थेऽपि प्रतिपादितम्—"मृन्मयो मानमेयः स्यात्साक्षिभास्यस्तु धीमयः" इति । बुद्धिस्थपदार्थानां साक्षिणैव भासमानत्वात् । किञ्च, सर्वेभ्यः वस्तुभ्यः प्रेयान् साक्ष्येव । एतदपि तत्रैवोक्तम्—"साक्ष्येव दृश्यादन्यस्मात्प्रेयानित्याह तत्त्ववित् । तस्मात्पुत्रादिधीरेव भोक्तं साक्षीति मूढधीः ॥" इति । तत्र सिद्धान्तबिन्दुटीकायां न्यायरत्नावल्यामुक्तम्—"अज्ञानगतचिदाभासाविविक्तचैतन्यं साक्षी" इति । संक्षेपशारीरकेऽपि—"अज्ञानोपहतबिम्बचैतन्यं साक्षी" इत्युक्तम् । सिद्धान्तबिन्दौ—अविद्याप्रतिबिम्बेश्वरपक्षे बिम्बचैतन्यं साक्षी । बिम्बेश्वरपक्षे बिम्बप्रतिबिम्बमुखानुगतमुखस्वरूपवज्जीवेश्वरानुगतसर्वानुसन्धातृचैतन्यं साक्षीत्यादिना साक्षिभेदः प्रपञ्चितः ।

एवमत्र संक्षेपेण साक्षिस्वरूपविचारदिक्प्रदर्शिता । विशेषजिज्ञासुभिरुपर्युद्धृता ग्रन्था एव शरणीकरणीया इति शम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षष्टितन्त्रम्

श्रीमामराजदत्तः कापिलः, राजकीयसंस्कृतमहाविद्यालयः, काशी।

प्रस्तुतेऽस्मिन् निबन्धे सांख्यवाङ्मये प्रथितचरेण प्राचीनतमेन षष्टितन्त्रनामकेन ग्रन्थेन संबद्धाः काश्चन जटिला महत्त्वपूर्णाश्च समस्या विवेचयिष्यन्ते। तासां चेत्थं स्वरूपतो निदर्शनम्—

१ षष्टितन्त्रनाम्ना प्रसिद्धः कश्चिद् ग्रन्थविशेषो विद्यते, अथवा षष्टिपदार्थानां विवेचकस्य शास्त्रस्येदं नाम?

२ को हि परमाचार्यः षष्टितन्त्रस्य प्रणेता?

३ सांख्यशास्त्रविचारपरम्परासु कीदृगस्य स्थानमिति।

आसां समस्यानां समाधानोपस्थापनवेलायामनेके प्रश्नाः प्रोद्भवन्ति, ये हि महतीं शोध-सामग्रीं समपेक्षन्ते।

षष्टितन्त्रस्य नाम सर्वप्रथममाचार्येश्वरकृष्णविरचितायां सांख्यकारिकायां प्रामाणिकरूपेण समुपलभ्यते। तदित्थम्—

> सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य।
> आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ ७२ ॥

अस्याः कारिकायाः परिशीलनेन प्रतीयते यदाचार्येश्वरकृष्णात्पूर्वं षष्टितन्त्रनामकः कश्चिद् ग्रन्थ आसीत्, यस्य ह्याख्यायिकाः परवादांश्च विहाय सर्वो मौलिकः सांख्यसिद्धान्तोऽत्रेश्वरकृष्णेन संगृहीत इति।

सर्वतन्त्रस्वतन्त्रा आचार्यवाचस्पतिमिश्रास्तु मतमेतन्नैव संमन्वते।

> प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता।
> पारार्थ्यं च तथानैक्यं वियोगो योग एव च ॥
> शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश।
> विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः ॥
> करणानामसामर्थ्यमष्टाविंशतिधा मतम्।
> इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति राजवार्त्तिकमुद्धृत्य कथयन्ति ते—"सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणम्, अपि तु शास्त्रमेवेदमिति सिद्धम्" [सांख्यतत्त्वकौमुदी ७२] इति। अनेन स्पष्टं प्रतीयते यदाचार्यवाचस्पतिमिश्रा राजवार्त्तिकसरण्या सांख्यकारिकामेव षष्टिपदार्थी मन्वते। तेषां मते हि षष्टिपदार्थानां विवेचकस्य शास्त्रस्यैव नाम षष्टितन्त्रम्, न तु कस्यचिद् ग्रन्थविशेषस्य। अन्यच्च, सांख्यकारिका नैव प्रकरणग्रन्थः, अपि तु समग्रषष्टिपदार्थानां साङ्गोपाङ्गानां समुपोहनात् सांख्यशास्त्रस्याकरग्रन्थोऽयमित्यपि वाचस्पतिवचनस्याभिप्रायः।

माठराचार्याः–येषां हि स्थितिसमयः षष्ठशतकस्य परार्द्धमनुमीयते–विषयेऽस्मिन् स्पष्टमेव कथयन्ति—"षष्टिपदार्था यस्मिन् शास्त्रे तन्त्र्यन्ते तत् षष्टितन्त्रम्, न तु ग्रन्थनाम" इति। चीनभाषायां माठरवृत्तेर्योऽनुवादः समुपलब्धः सोऽपि पक्षमेनं समर्थयति।

'षष्टितन्त्रम्' सांख्यशास्त्रस्य मौलिको ग्रन्थ इति पक्षेऽपि कतिपयप्रमाणानि समुपलभ्यन्ते। अहिर्बुध्न्यसंहितायां [ई० पू० २ शतकम्] षष्टितन्त्रस्योल्लेखो विद्यते, तत्र प्रतिपादितानां पदार्थानामपि तत्र विस्तरेण विवेचनमवलोक्यते। गुणरत्नरचितायां तर्करहस्यदीपिकायां [द्रष्टव्यम्–पृ० १०६] षष्टितन्त्रोद्धारनामा ग्रन्थः समुद्धृतः। अत आसीत् षष्टितन्त्रनामकः कश्चित्प्राचीनो ग्रन्थः, यस्य हि समुद्धारः पश्चादन्येन केनचिदाचार्येण कृतः स्यादिति स्वाभाविकमनुमानं नायुक्तिसंगतम्। गुणरत्न एव सांख्यदर्शनस्य मौलिक्य-उत्तरनामिके द्वे विचारसरणी इति समुल्लिखितवान्। जैनसंप्रदायस्यानुयोगद्वारसूत्रं कपिलषष्टितन्त्रयोः 'काविलम्' इति, 'षष्ठितन्तम्' इति च नाम समुद्धरति, अनुपपादिकसूत्रं च 'काविला' इति, 'सांख्यजोगिन्' इति च शब्दौ [1]चर्चयति। सुप्रसिद्धो भारतीयः पुरातत्त्वज्ञः श्रीगार्वेमहोदयोऽपि षष्टितन्त्रं स्वतन्त्रं ग्रन्थं [2]मन्यते। सांख्यकारिकाया उपर्युद्धृताऽऽर्या स्वत एव षष्टितन्त्रस्य स्वतन्त्रग्रन्थत्वानुमानमेव द्रढयति। यतो हि—सप्तत्यां किल ये पदार्था विवेचिताः, सम्पूर्णे सुविस्तृते षष्टितन्त्रेऽपि तेषामेव विवेचनं विद्यते; न त्वितोऽधिकाः पदार्थास्तत्र विवेचिताः सन्ति। इयानेव विशेषोऽत्र–यत् सांख्यकारिका षष्टितन्त्रापेक्षया संक्षिप्ततरा, षष्टितन्त्रस्थानामाख्यायिकानां परवादानां चात्र परित्यक्तत्वादिति हि तस्याः कारिकाया भावार्थः। अनेनं स्पष्टं प्रतीयते—'सप्ततिः' इति, 'षष्टितन्त्रम्' इति च स्वतन्त्रयोर्द्वयोर्ग्रन्थयोर्नामनी, षष्टितन्त्रं च प्राचीनतरः प्रामाणिकश्चाकरग्रन्थ इति।

---

१ द्रष्टव्यम्—F.O. Shroeder, Z.D.M.G. LXVIII pp. 101-110
२ द्रष्टव्यम्—Samkhya Philosophic. pp. 58-59

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सप्ततिशब्दस्यार्थोऽत्र व्याख्यासापेक्षो विद्यते। व्याख्याते तस्मिन् सांख्यदर्शनेतिहास आचार्यविन्ध्यवासिनोऽपि सुप्रतिष्ठा भविष्यति।

वस्तुत ईश्वरकृष्णविरचिताः कारिकाः सप्ततिसंख्याका एवासन्, अत एवात्र सप्तति-शब्दव्यवहारः। गौडपादाचार्याः स्वकीये सांख्यकारिकाभाष्ये सप्ततिसंख्यकानामेव कारिकाणा-मुल्लेखं कृतवन्तः—

सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि।
यत्रैताः सप्ततिरार्या भाष्यं चात्र गौडपादकृतम्॥ इति।

साम्प्रतं सांख्यकारिकापुस्तकेषु प्रायशः ७३ कारिकाः समुपलभ्यन्ते। किमेता अधिका-स्तिस्रः कारिकाः प्रक्षिप्ताः? कृते ह्यन्तरङ्गपरीक्षणे तिस्र एव न, अपि त्वन्तिमाश्चतस्रः कारिकाः प्रक्षिप्ता इति प्रतीयते। ६९ तमकारिकापर्यन्तमेव गौडपादाचार्यस्य भाष्यं विद्यते। गौडपाद-भाष्ये कारिकैका विद्यते यत्र सर्वप्रथमं लोकमान्यबालगङ्गाधरतिलकमहोदयैरवहितम्; विद्वत्सु प्रसिद्धिं चानीता। वस्तुतः सैव कारिका सांख्यकारिकायां ६२ तमकारिकात्वेन परिगणनीया। इयं सा कारिका—

कारणमीश्वरमेके पुरुषं कालं परे स्वभावं वा।
प्रजाः कथं निर्गुणतो व्यक्तः कालः स्वभावश्च॥ इति।

इत्थं सांख्यकारिकाया अधस्तात् कृतनिर्देशा सप्ततिः परिपूर्णा भवति।

इयं च सप्ततिर्हिरण्यसप्ततितो भिन्ना। केषाञ्चिन्मते सांख्यकारिकायाः सप्ततिर्हिरण्य-सप्ततिश्चाभिन्नैव। त एवेश्वरकृष्ण एवाचार्यो विन्ध्यवासीत्यपरां भ्रान्तां धारणामाविर्भावयन्ति। आचार्यपरमार्थेन षष्ठशताब्दधास्तृतीये चरणे माठरवृत्तिसहिता सांख्यकारिका चीनभाषाया-मनूदिता। एष चानुवादः साम्प्रतमप्युपलभ्यते। बौद्धग्रन्थानां चीनभाषानुवादैः परिज्ञायते यद् विन्ध्यवासिना स्वगुरोर्वार्षगण्यस्य ग्रन्थं संक्षिप्य हिरण्यसप्ततिनामा ग्रन्थो विरचितः। अस्या एव हिरण्यसप्ततेरालोचनाऽऽचार्यवसुबन्धुना स्वकीयायां परमार्थसप्ततौ कृता। ईशवीये चतुर्थे शतके वसुबन्धुर्विद्यमान आसीत्। षड्दर्शनसमुच्चये आचार्यविन्ध्यवासिन एका कारिकोपलभ्यते, सा च साम्प्रतिकसांख्यकारिकासु नैव दृश्यते। तत्र ह्युक्तम्—"विन्ध्यवासी त्वेवमाचष्टे—पुरुषोऽ-विकृतात्मैव स्वनिर्भासमचेतनम्। मनः करोति सान्निध्यादुपाधिस्फटिकं यथा॥" इति। एतदेव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न, गुणरत्न ईश्वरकृष्णविन्ध्यवासिनौ पृथगाचार्यत्वेन [1]निर्दिशति । अपि च, आचार्य-कुमारिलभट्टेन[2] विन्ध्यवासिनोऽनुमानविषयकाणां येषां सिद्धान्तानामुल्लेखः कृतस्त ईश्वर-कृष्णस्यानुमानसिद्धान्तैः सांख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रेण सविस्तरं व्याख्यातैर्नैव संव-दन्ति। अतः प्रतीयते सांख्यकारिकायाः सप्ततितो भिन्नैव हिरण्यसप्ततिरिति । विन्ध्यवासी चेश्वरकृष्णतो भिन्नः स्वतन्त्रः सांख्याचार्यः। तस्य हिरण्यसप्ततिनामा ग्रन्थ आचार्यवार्षगण्य-ग्रन्थस्य संक्षिप्तं रूपमासीत् । अस्यैवाचार्यविन्ध्यवासिनो मुख्यं नाम [3]रुद्रिल इति स्यात् ।

योगसूत्रकैवल्यपादस्य त्रयोदशसूत्रभाष्ये महर्षिव्यासेन षष्टितन्त्रस्यैष श्लोकः समुद्धृतः—

गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकम् ॥

एष एव श्लोक आचार्यवाचस्पतिना भामत्याम् [२।१।३] आचार्यवार्षगण्यनाम्ना समुद्धृतः। महर्षिपतञ्जलिना [१४७ ई० पू०] महाभाष्ये [४।१।३] समुद्धृतम्—"अतिसन्नि-कर्षादतिविप्रकर्षान्मूर्त्यन्तरव्यवधानात्तमसावृतत्वादिन्द्रियदौर्बल्यादतिप्रमादात्" इत्युद्धरणं सांख्यकारिकायाः सप्तम्या कारिकया संवादमञ्चति। सांख्यकारिकायाः पूर्वभवात् कस्माच्चिद् ग्रन्थादे-तदुद्धृतं स्यात्, यदाधारेण हि सांख्यकारिकापि निर्मिता। स च ग्रन्थः संभवतः 'षष्टितन्त्रम्' एव भवितुमर्हति ।

भागवतमतानुसारं सांख्यसंप्रदायस्यानेके ग्रन्थाः कालविप्लुता अभवन् । तेषामल्पीया-नेवांशोऽस्माभिरुपलब्धः। आचार्यविज्ञानभिक्षुणाप्येतदेव तथ्यं स्वकृतायां सांख्यप्रवचनभाष्य-भूमिकायामाविष्कृतम् । कथयन्ति ते—"कालार्कभक्षितं सांख्यशास्त्रम्" इति ।

वार्षगण्यस्य षष्टितन्त्रं सेश्वरसांख्यप्रतिपादकं स्यादिति परम्परया ज्ञायते। अहिर्बुध्न्य-संहितायां विवेचिताः षष्टितन्त्रसिद्धान्ता एनमेव निष्कर्षमापादयन्ति। एतदेव न, चरकाचार्येण (ईश्वरकृष्णात्प्राक्तनेनायुर्वेदाचार्येण) प्रतिपादितं सांख्यं सेश्वरसांख्यमेवास्ते। ईश्वरकृष्णात्प्राक्तनो

१ द्रष्टव्या—तर्करहस्यदीपिका—पृ० १०२–१०४

२ अन्यच्च—"अन्तराभवदेहस्तु निषिद्धो विन्ध्यवासिना" [श्लोकवा० आत्म०] इति ।

३ द्रष्टव्यम्—"यदेव दधि तत्क्षीरं यत्क्षीरं तद्दधीति च। वदता रुद्रिलेनैव ख्यापिता विन्ध्य-वासिता ॥" [तत्त्वसंग्रहे] इति। एष च श्लोकस्तत्र विन्ध्यवासिनः परिणामवादपरीक्षणवेलायां परमार्थसप्ततितः समुद्धृतः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बौद्धाचार्योऽश्वघोषो गौतमबुद्धगुरोररदाचार्यस्य सांख्यशास्त्रं विवेचितवान्, तच्च सेश्वरसांख्यमेव। महाभारते, श्रीमद्भागवते, श्रीमद्भगवद्गीतायाम्, मनुस्मृतौ, विज्ञानभिक्षुग्रन्थेषु च यत् सांख्यदर्शनसंबन्धि प्रकृष्टं तत्त्वज्ञानं प्रतिपादितं तच्चापि सेश्वरसांख्यमेव। आचार्यप्रवरा गौडपादा वाचस्पतिमिश्राश्च संभवतः सेश्वरसांख्यवादिन एवासन्। वाचस्पतिसमये षष्टितन्त्रस्य मूलग्रन्थोऽलभ्य एवासीत्। आसुरिणोपदिष्टं सांख्यं परमर्षिकपिलोपदिष्टसेश्वरसांख्यपरम्परानुवर्ति। प्रतीयते यत्पञ्चशिखाचार्येण बौद्धानां प्रभाववृद्धिं मनसि निधाय विनैवेश्वरापेक्षां सांख्यस्य सृष्टिरचना विवेचिता। "तेन च बहुधा कृतं तन्त्रम्" इत्येषा कारिकाऽस्मिन्नेवार्थे सम्यग् व्याख्याता स्यात्। सांख्यकारिकाया रचयिताऽऽचार्येश्वरकृष्णोऽस्यैव पञ्चशिखाचार्यस्य प्रकाण्डः शिष्यस्तन्मतानुवर्ती चासीत्। सेश्वरसांख्यस्य मौलिकसिद्धान्तानां प्राचीनवैष्णवतन्त्र-विकासक्रमे महान् प्रभाव इति नाविदितचरं वैदिकदर्शनानुशीलनपरायणानां मनीषिप्रवराणामिति शम्॥

अनुवादकः

श्रीव्रजवल्लभद्विवेदः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राहुग्रासः

ब्रह्मचारी गिरिजाप्रकाशः, भारतधर्ममहामण्डलम्, काशी ।

नैतदस्वीकार्यमसत्यं वा यच्चन्द्रार्कोपरागकारणानुसन्धित्सूनां बहूनां ज्योतिर्विदां मतानुसारतश्चन्द्रग्रहणसमये पृथिवीच्छाया चन्द्रमसं सूर्यग्रहणसमये शशधरच्छाया सूर्यदेवं चांशतः पूर्णतो वाऽऽच्छादयतीति । तेषामियं छायापातकल्पना शास्त्रयुक्तिसंमता न वेत्यत्र विचार्यो विषयः । किमेतच्छायावादानुकूलमस्ति किञ्चिच्छास्त्रप्रमाणम् । न । श्रुतिस्मृतिपुराणानि नैतत् समर्थयन्ते । पाद्मे स्वर्गखण्डे षष्ठाध्याये ग्रहणविषय एतदुक्तमस्ति । यथा—

ततो राहुर्महाबाहो त्रयोदशसहस्रकम् ।
योजनानां प्रविस्तारं मण्डलं तस्य कथ्यते ॥
स्मरन् वैरं पुराप्राप्तं यः पर्वणि महाग्रहः ।
ग्रासाय धावति क्रोधात् पुष्पवन्तौ महीपते ॥
तदैव भगवच्चक्रं सहस्रार्कोपमद्युति ।
उपतिष्ठति तद्भीत्या पुनरेव निवर्तते ॥
उपरागं वदन्त्येवं पुण्यकालश्च कथ्यते ।
लक्षयोजनतो भानुर्भूमेरेषा व्यवस्थितिः ।
भानोः सकाशादुपरि लक्षे लक्ष्यः क्षपाकरः ॥ इति ।

तथा श्रीमद्भागवते पञ्चमस्कन्धे चतुर्विंशतितमाध्याये च—"यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्याचन्द्रमसावभिधावति ॥ २ ॥ तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते । तदुपरागमिति वदन्ति लोकाः ॥" इति । किमेतत् सर्वं कल्पनाविलसितमात्रमेव ।

यतः श्रुतिस्मृतिपुराणाननुगृहीतमतानां सारवत्तासंपादनचेष्टायां प्रबलयुक्तिसमाश्रयसंभावना विद्यते, अतो ग्रहणसंबन्धिनी छायापातकल्पनेयं तर्कोपपत्तिभ्यामत्र परीक्ष्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रथमतः शशिसूर्योपरागसिद्धये ये पार्थिवचान्द्रमसच्छाये कल्पिते भवतस्तच्छायास्वरूपोत्पत्त्यादिकं भूतले चन्द्रसूर्यादिकिरणेषु या वस्तुच्छाया दृश्यन्ते ततो भिन्नरूपं तत्तुल्यं वा। भिन्नरूपत्वं तु कथमपि न सिध्यति, छाययोश्छायात्वहानिप्रसङ्गात्। यदि तत्तुल्यं स्यात्, यदि भूपृष्ठेऽस्मद्दृष्टछायावत् पृथिव्याश्चन्द्रमसश्च छायोद्गता भूत्वा तच्छाया शशिनि भास्करे च निपतति; तर्हि ग्रहणतत्त्वनिरूपणे राहुकल्पना किं व्यर्थैव न स्यात्? अतश्छायोत्पत्तिविचारोऽत्र कर्तव्य एव।

कथं भूपृष्ठे छायोत्पद्यते। आलोकं विना छाया नोत्पन्ना भवति। अतः शशिसूर्यादिकिरणेषु वस्तुच्छाया दृष्टिगोचरा भवति। किन्तु सूर्यादिकिरणदातॄणामभिमुखं वस्तुच्छाया कदापि न प्रसृता भवति। यत्र तु तेषामेकोऽन्येनाभिभूतो भवति तत्र प्रबलकिरण एव वस्तुच्छाया दृश्यते नान्यत्र। इत्थं हि वस्तुच्छाया चन्द्रसूर्यादीनां विपरीतदिशि यथाकिरणपातमायतनादिकं गृहीत्वा भूतले निपतति। एतद्दृष्टान्तावष्टम्भेन किं चन्द्रसूर्ययोश्छायापात आस्थीयते।

भूतलं वस्तुच्छायापाताधिकरणमिति सर्वेषां प्रत्यक्षमेव। किन्तु ग्रहणसिद्ध्यर्थं पार्थिवच्छाया चान्द्रमसच्छाया वा कस्मिन्नधिकरणे पतिष्यति। पृथिवीच्छाया किं चन्द्रमसं गमिष्यति, शशधरच्छाया किं दिवाकरम्। पृथिवीचन्द्रयोश्चन्द्रसूर्ययोर्मध्ये वा किं केवलः शून्य आकाशो वर्तिष्यते येन च्छायाया निर्बाधं लक्ष्यप्राप्तिर्भवेत्। किञ्च, भूतल एव वस्तुच्छायापातो भवति न केवलसूर्यादिकिरणेषु, अतश्छाया दृष्टिगोचरा भवति। अतश्चन्द्रोपरि सूर्योपरि वा छायापातो भवेच्चेत् तच्छायया चन्द्रमसः सूर्यस्य वाभिभवः कथं संभवति? तयोरनभिभवे तु ग्रहणासिद्धिरित्यत्र न सन्देहः। चन्द्रात् सूर्याद्वा दूरेऽपि तत्किरणे छाया सूर्योदयानन्तरं चन्द्रकिरणे निपतितवस्तुच्छायावत् क्षीणतां विलीनतां वा प्राप्तुमर्हति कैव कथा चन्द्रसूर्यसन्निधौ यत्र किरणस्य प्रखरता विद्यते। तत्राधिकरणे छायायां विनाशं गतायां कथं चन्द्रोपरि सूर्योपरि वा छायापातेन ग्रहणं सेत्स्यति। अतश्छायालोकयोः परस्परविरुद्धस्वभावत्वं छायापातेन ग्रहणसिद्धिं विरुणद्धीत्यवश्यमेव स्वीकार्यम्। अत्र यद्येतदुक्तं स्यात्, यथा वस्तुच्छाया सूर्यादिकिरणोद्भासितभूतलस्यांशविशेषात् तत्किरणमपसार्य स्वयमेव तत्र विराजते न तु विनाशं गच्छति तथा पार्थिवच्छाया चन्द्रांशविशेषं चन्द्रं वा चान्द्रमसच्छाया सूर्यांशविशेषं सूर्यं वा किरणहीनं संपाद्य कथं न ग्रहणरूपेण चन्द्रे सूर्ये वाऽधिष्ठिता भवेदिति। अत्रोच्यते—समाधानं तु प्रागेवोक्तं तथापि स्पष्टीकरणाय पुनस्तदिह प्रपञ्च्यते। वस्तूपरिभागे सूर्यादिमरीचयः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पतन्ति ततश्छायोत्पद्यते। छाया तु भूतले निपतति, तत्र स्थितवस्त्वन्तरोपरि वा। न तु कस्मिंश्चित्तेजोमयवस्तुनि। इह तु पृथिव्याश्छायोत्पन्ना भवेच्चेत् तच्छायायाः किरणमये चन्द्रमसि पतनमिष्यते तथा चन्द्रच्छायायाश्च पतनं किरणमये सूर्ये। अतो भूतले पतितायाश्छायाया विलीनत्वाभावेऽप्यंशुमति चन्द्रे सूर्ये वा निपतितायाश्छायाया ध्वंसो न केनापि वारयितुं शक्यते।

द्वितीयतो ग्रहणसिद्धये छायोत्पत्तिरावश्यकतामावहति चेत् पूर्णिमायां भूच्छाया किं चन्द्रकिरणालोकितभूपृष्ठात्, तथाऽमावस्यायां चन्द्रच्छाया किं सूर्यकरोज्ज्वलचन्द्रपृष्ठादुत्पत्स्यते ? असंभवमेतत् प्राग्दर्शितयुक्त्यनुसारतः। तत् किं पृथिव्याश्चन्द्रमसो वाऽनालोकितापरपृष्ठात् छायोत्पन्ना भूत्वाऽऽकाशे चन्द्रकिरणे सूर्यकिरणे वा न विलीनतां गतोड्डुयनशीलविहङ्गवत् प्रदीप्तं चन्द्रमण्डलं सूर्यमण्डलं वाऽऽरोक्ष्यति। तत्रापि चन्द्रग्रहणरात्रौ चन्द्रकिरणानालोकितभूपृष्ठदेशः पृथिव्यधोदेशगतसूर्यकिरणपातेनोद्भासितो भवतीत्यभ्युपगम्यमानेऽपि सूर्यग्रहणदिवसे सूर्याभिमुखीनचन्द्रपृष्ठाच्छायोद्गमासंभवात्, तद्विपरीतपृष्ठदेशाद्वा छायोत्पत्तिः कथं संभवेत्। वस्तूपरिभागे यदाऽऽलोको निपतति तदैव च्छायोत्पत्तिः संभवति। किन्तु चन्द्रपृष्ठदेशेऽस्मिन् कुतः सूर्यकिरणाभिभवक्षमालोकपातो भविष्यति। सूर्यग्रहणकाले यदि चन्द्रमा सूर्याधोदेशे पृथिवी चन्द्राधोदेशे चावतिष्ठते यथा श्रुत्यादिमतविरोधिछायावादिनो मन्यन्ते तर्हि तदा पृथिवीचन्द्रयोर्मध्ये को महाकायस्तेजोमयः पदार्थ आगमिष्यति यस्य दिवाकरकरादपि प्रबलतराः प्रखरकिरणाः शशधरोपरि पतित्वा सुविशालचन्द्रच्छायामुत्पादयिष्यन्ति तच्छाया च गगनं भित्वा सूर्यमण्डलमाच्छादयिष्यति च। ज्योतिर्विदापि केनचिदेतादृशज्योतिष्कस्य कस्यचिद्ग्रहणकाल आविर्भावो नोक्तः। तस्मात् सूर्यग्रहणकाले कथं चन्द्रच्छायोत्पत्स्यते। पार्थिवचान्द्रमसच्छाये त्वेवमुत्पद्येयातां न वा, ग्रहणकाले चन्द्रे सूर्ये वा छायापाते तच्छायाया विलय एव ह्यनुमातव्यः।

तृतीयतश्छायापातेन ग्रहणं भवेच्चेद् ग्रस्तोदयः कथं संभवेत्। निशानाथे दिननाथे वा यदि काचिच्छाया निपतति सा छाया किरणप्राखर्यात् क्षयं हि गमिष्यतीत्यतो ग्रहणदर्शनात् पूर्वं चन्द्रः सूर्यो वा छायाग्रस्तो भवतीति येषां मतं तेऽपि किमीदृशमतस्य युक्तियुक्ततां प्रतिपादयितुं समर्थाः। तेषां ग्रहणारम्भकालनिरूपणादिकमपि व्यर्थमेव, यदि छायापातो हि ग्रहणकारणं स्यात्।

एवं यथा यथा छायावादः परीक्ष्यते तथा तथैव तस्यानुपादेयत्वं स्फुटं भवति। अतो ग्रहणसम्बन्धी छायावादो निरस्त एव। न पतति भूच्छाया चन्द्रोपरि चन्द्रच्छाया वा सूर्योपरि ग्रहणकाले। अत एव ग्रहणस्य कारणान्तरमनुसन्धेयमिति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छायावादनिराकरणेन ग्रहणकाले पृथिव्यां याऽऽलोकक्षीणतोपलभ्यते सा केनचिद् बृहद्वस्तुना चन्द्रसूर्याच्छादनफलस्वरूपैव भवितुमर्हति । केवलबिम्बाच्छादनार्थं तदाच्छादकस्य बृहत्त्वं न प्रयोजनीयम् । येन केनापि स्वकरतलेन वस्त्वन्तरेण वा चन्द्रबिम्बं सूर्यबिम्बं वाऽऽच्छादयितुं तेन च्छायां रचयित्वा भूतलस्य क्षुद्रैकभागं क्षीणालोकं संपादयितुं च शक्यते । अतो ग्रहणसमये सूर्यस्य शशिनो वा कश्चित् तत्सन्निधिप्रेप्सुर्बृहदाच्छादक आविर्भवतीत्येव हि युक्तं वयं पश्यामः । इत्थं हि ग्रहणकाले भूतलं स्तिमितालोकं तमोमयं वा भवतीत्यत्र न विरोधावकाशः । अत एव श्रुतिस्मृतिपुराणाद्युदितो राहुग्रासः केवलं कल्पनाविजृम्भितमिति मत्वा तत्रोपेक्षाप्रदर्शनं न युक्तमिति ।

इदानीं क एव स सूर्यचन्द्राच्छादक इति परिज्ञातुं प्रयत्नः क्रियते । यतः संपूर्णग्रहणकाले भूतलमन्धकाराच्छन्नं भवत्यतस्तस्याच्छादकस्य बृहदायतनत्वं हि कल्पनीयम् । पुराणादिषु यद्राहुवर्णनमुपलभ्यते ततो राहुसूर्ययो राहुचन्द्रयोर्वा राहुरेव बृहत्तर इत्यवगम्यते । तर्हि ग्रहणसमये कुत्रैव राहोरवस्थितिः स्यात् ? पृथिव्या ऊर्ध्वं रवेरधो राहुरवतिष्ठते, चन्द्रस्तु रवेरूर्ध्वं विराजत इति पुराणादिमतम् । अतो राहुणा रविशशिनौ पूर्णतोंऽशतो वाऽऽच्छादयितुं शक्येते इत्यत्र न कश्चित् संशयावकाशोऽस्ति । अत एव राहुरेव हि स चन्द्रसूर्याच्छादक इत्यङ्गीकर्तव्यम् । पुनश्च ग्रहादीनां गतिरस्तीति ज्यौतिषिका वदन्ति । चला पृथ्वी स्थिरा भातीति ज्यौतिषशास्त्र उक्तम् । एवं राहोर्गतिकल्पनाऽपि नासङ्गता स्यात् । विशेषावस्थायां स राहुः पृथिवीचन्द्रयोः पृथिवीसूर्ययोर्मध्ये चावतिष्ठते, ततश्चन्द्रः सूर्यो वाऽऽच्छादितो भवति भूतलस्थप्राणिनां दृष्ट्या चेत्यत्रास्ति न किञ्चिदसंभाव्यत्वम् । विशेषावस्थेयं शास्त्रेऽप्येवमुक्ता । यथा—

भत्रिपादान्तरे राहोः केतोर्वा संस्थितो रविः ।
चतुष्पादान्तरे चन्द्रस्तदा संभाव्यते ग्रहः ॥
यस्मिन्नृक्षे रविस्तस्माच्चतुर्दशगतः शशी ।
पूर्णिमाप्रतिपत्सन्धौ राहुणा ग्रस्यते शशी ॥
कृष्णपक्षे तृतीयायां मासर्क्षं यदि जायते ।
ततस्त्रयोदशे सूर्यो राहुणा ग्रस्यते रविः ॥ इति ।

गतिवशाद् ग्रहादयः प्रत्येकं कदा कीदृशावस्थायां स्थास्यन्तीति सम्यग्रूपेण ज्ञातुं सूक्ष्मगणनादिकमावश्यकमित्यत्र कः सन्देहः ? तत्र केषाञ्चिद् ग्रहादीनां भूवासिजीवनयात्रा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संपर्कितानां गत्यादिनिरूपणं भारतीयप्राचीनज्यौतिषशास्त्रे लभ्यते। कतिपये ग्रहास्तु दृष्टि-गोचरा भवन्ति। कांश्चिदन्यान् दृष्टिमार्गे समानेतुं ज्योतिर्वेत्तारः प्रयतमाना एव दृश्यन्ते नाना-विधयन्त्रादिसाहाय्येन। पुनरन्ये बहवो भूयसि प्रयत्ने कृतेऽपि न दृष्टिपथमागमिष्यन्त्यतिदूरत्वा-च्चक्षुरिन्द्रियेण यन्त्रादिसहायेनाप्यग्राह्यत्वाद्वा। चक्षुषा यन्न दृष्टं तन्नास्तीति न केनापि वक्तुं शक्यते। अस्मच्चक्षुर्ज्योतिरविषयीभूताः पदार्था ज्योतिर्मया अन्यरूपा वा बहवो विश्वेऽस्मिन् सन्तीत्यत्र न संशयकारणमस्ति। अतोऽसीमाकाशेऽस्मच्चक्षुरिन्द्रियाविषया ग्रहादयो लोकादयो वा न विद्यन्त इति कः वदितुं क्षमते? अत एव यद्यपि राहुरस्माकं दृष्टिपथं नायाति तथापि तस्याऽस्तित्वं नास्तीति कथं सिध्येत्? कार्यावगम्यतत्कार्यकर्तृतडिदाद्यस्तित्ववद् दृष्टिगोचरत्वा-भावेऽपि तस्य राहोश्चन्द्रसूर्याच्छादकत्वं न विहन्येत। वर्तमानादृश्यालोकवादिनामप्यत्र समर्थनं न दुष्प्रापमेवेति मन्यामहे वयम्। किञ्च, चन्द्रसूर्यग्रहणयोर्यो दिक्कालादीनां विभेदो लक्ष्यते तत्रापि पूर्वकथिता ग्रहादीनां गतिरेव हि कारणम्। पृथिव्यादीनां चलत्वाद्धि चन्द्रार्कोपरागरूपा विशेषावस्थोपजायते। राहुं देवतात्मानं मत्वा हि तद्विशेषावस्थायां स चन्द्रं सूर्यं वा ग्रसितुं चेष्टत इति वदत्यस्माकं शास्त्रम्। अत एव ग्रहणकाले राहुरेव चन्द्रं सूर्यं वाऽऽच्छादयतीति श्रुतिस्मृतिपुराणादिमतनिरासार्थं प्रयासः सर्वथा निष्फल एवेति।

अत्र यद्याधुनिकगणितविज्ञानविशारदा राहुकल्पनापरिपन्थिनः प्रत्यवतिष्ठन्ते, तेषां ग्रहण-कालादीनां सूक्ष्मगणनायाथार्थ्यं विश्वसंमुखे संप्रदर्श्य तेऽपि प्रतिवक्तव्याः। ग्रहणकाले पृथिवीत-श्चन्द्रसूर्यबिम्बक्षयोंऽशतः पूर्णतो वा लक्ष्यत इत्यत्र न सन्देहः। अतो यस्यां दिशि चन्द्रसूर्य-बिम्बक्षय उपलब्धो भवति तस्यां दिशि कस्यचिदाच्छादकस्याविर्भावः कल्पनीय एव। तदा-च्छादनं तु सहसैव न घटते। ग्रहणकाले नितयभावेन हि चन्द्रसूर्यबिम्बक्षयो जायते। किन्तु पृथिवी चलति तथाऽन्ये ग्रहा अपि गतिशीला। आच्छादकगतिकल्पनायामपि न काचिद् बाधा वर्तते। अतः पृथिवीचन्द्रसूर्याश्चन्द्रसूर्याच्छादकश्च परस्पराकर्षणयुक्ताः सुविस्तृतखगोले भ्रमन्तः केषुचित्कालेषु ग्रहणरूपां विशेषावस्थां सृजन्तः पृथिवीनिवासिनां चेतसि तत्संबन्धिनो नाना-विधान् भावान् जनयन्तीत्यत्र न किञ्चिद्विस्मयस्य संशयस्य वा कारणमस्ति। ग्रहणं तु प्रायेण प्रतिवर्षं दृश्यते। अतस्तत्संख्याया इयत्तानिर्णयोऽसाध्य एव। यस्मादित्थं ग्रहणं भूयो भूयो दृष्टं तस्माज्ज्योतिर्विद्भिरपि तत्कालीनखगोलावस्थां पुनः पुनः सम्यक् परीक्ष्य गतिशीलाः पृथिवीचन्द्रसूर्याः प्रतिग्रहणं कीदृग्भावेनावतिष्ठन्त इति विशेषरूपेण ज्ञातुं चेष्टा कृतेत्यत्र न सन्देहावसरोऽस्ति। एवं पुनः पुनः परीक्षाफलस्वरूपं यदि ग्रहणस्य कालादिकमद्यत्वे सूक्ष्मरूपेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निर्णीतं स्यात्तर्हि को वा तत्र विस्मयप्रकाशहेतुर्यतो भारतीयप्राचीनज्यौतिषशास्त्रज्ञाः प्रागेव परवर्तिनामाधुनिकानां वा कृते मार्गं सुगमं कृतवन्त इत्यवश्यमेव स्वीकार्यम् ।

किञ्च, पाश्चात्त्यगणकैर्ग्रहणस्य यथार्थकालादिनिरूपणाय या सूक्ष्मगणना समाश्रिता तत्रैव वातिप्रशंसायाः किं कारणमस्ति यद्यपि तेषां श्रमः प्रशंसनीय इत्यत्र न सन्देहः । प्रथमतस्तेषां कालविभागात् सूक्ष्मतरः कालविभागोऽस्माकं शास्त्र उपलभ्यते । यथा—

लघ्वक्षरचतुर्भागस्त्रुटिरित्यभिधीयते ।
त्रुटिद्वयं लवः प्रोक्तो निमिषस्तु लवद्वयम् ।। इति ।

विपलानुपलपलदण्डादिकालविभागोऽपि वर्तते । अतः पाश्चात्त्यगणनातः कुतो ग्रहणस्य यथार्थकालनिरूपणं भवति । द्वितीयतो दूरवीक्षणादियन्त्रव्यवहारकारिणां कृत ईदृशी सूक्ष्मकालादिगणनाऽऽनन्दकारणं भवेच्चेदन्ये तु ग्रहणस्य कालादिकं स्थूलरूपेण ज्ञात्वा हि परितोक्ष्यन्तीत्यत्र वैमत्यकारणं किञ्चिदस्ति केषाञ्चिदिति नास्माकं कल्पनायामधिरूढं भवति ।

परन्तु पाश्चात्त्यैराधुनिकैर्वा ज्योतिर्विद्भिर्भारतीयप्राचीनज्यौतिषशास्त्रतो न कश्चिदुपकारः प्राप्त इति न संभाव्यम् । पाश्चात्त्यसभ्यताविकासप्राप्तेर्बहुपूर्वकालादारभ्याद्यपर्यन्तमस्मद्देशे यद् ग्रहणगणनादिकं प्रचलितमस्ति तदर्थं किमस्माकं प्राचीनज्योतिर्विदो न श्रद्धां प्रशंसां वाऽर्हन्ति ।

भारतवर्षात्तु ज्यौतिषशास्त्रं विदेशमगमदित्यैतिहासिकानां मतम् । सत्यमेतत्, यतः सर्वज्ञानभाण्डारभारतवर्षात् सर्वासु दिक्षु ज्ञानं विकीर्णमभूत् । तस्माद्भारतीयज्यौतिषशास्त्राद् वैदेशिका न लाभवन्त आसन्, स्वस्वदेशे ज्योतिर्विद्यासमुन्नतिसाधनाय ते भारतीयज्यौतिषशास्त्रसहायतां न गृहीतवन्त इति नास्माकं कल्पनामारोहति । विशेषतो यतः प्रागुक्तेभ्यः–"भत्रिपादान्तर" इत्यादिशास्त्रवचनेभ्यो भारतीयज्योतिर्विदां सुदूरातीतकालात् प्रचलिता ग्रहणकालादिनिरूपणप्रणाली स्पष्टमवगम्यते । एवं भारतीयप्राचीनज्योतिर्विज्ञानविशारदैः कृताद्ग्रहणकालादिनिर्णयात्पाश्चात्त्यगणकेभ्यो ग्रहणकालादिनिरूपणार्थं सूक्ष्मगणनादिकं सुकरमेवाभूदित्यत्र कः सन्देहः ? अतः पाश्चात्त्यसूक्ष्मग्रहणगणना भारतीयगणनायाः स्थूलायाः सूक्ष्माया वा विच्छिद्य प्रशंसामर्हतीति येषां मतं तैः सत्यमपह्नूयत इत्यत्र न संशयलेशः ।

ग्रहणगणना सम्यगालोचिता । इदानीं राहुग्रासविषये पुनः किञ्चिदुक्त्वा विचारोऽयं समाप्तिं नीयते । छायावादिनामाच्छादिकायाश्छायायाः स्वतन्त्रं गत्यादिकं किञ्चिदस्तीत्यत्र न किञ्चित्प्रमाणं केनाप्युपस्थापयितुं शक्यते । वस्तुच्छाया वस्तुना सहैव वर्तते । अतः पृथिव्या गत्यादिनिरूपणेनैव हि तच्छायागत्यादिकं निरूपितं भवितुमर्हति । तथा चन्द्रच्छाया चन्द्रेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सहैव संबद्धा भविष्यति यदि तत्र च्छाया कल्पिता स्यात्। एवं यद्याच्छादनकृद्गत्यादीनां पृथग्गणनायाः प्रयोजनं न विद्यते न वा तादृशी पृथग्गणना संभवति तर्हि चक्षुरिन्द्रियातीतराहोराच्छादकत्वं कथमसंभवं स्यात्। यदि पृथिवीचन्द्रयोर्गत्यादिनिरूपणेन चन्द्रसूर्याच्छादिकयोस्तच्छाययोर्गत्यादिकं निरूपितं सत् ग्रहणकालादिनिरूपकं भवेत्तर्हि ग्रहणकालादिनिर्णयो गतिशीलौ पृथिवीचन्द्रावेव ह्यपेक्षते न तु तच्छाये। छायावादिभिः किमत्रान्यत्किञ्चिदास्थातुं शक्यते। अतो राहोरदर्शनेऽपि राहुग्रासरूपग्रहणसिद्धौ न काञ्चिद्बाधां वयं पश्यामः, चक्षोरविषयत्वेऽपि वस्त्वस्तित्वसिद्धेर्ग्रहादीनां समानगतित्वाभावात् पृथिवीचन्द्रसूर्याणां चलत्वाद् राहुग्रासरूपविशेषावस्थोपपत्तेश्च।

किञ्च, राहोरस्तित्वं केवलमनुमानगम्यं तस्य कार्यादिभ्य इत्यपि न समीचीनम्, यतः पुरास्मिन्नध्यात्मविद्योन्नतिसाधकबहुलभारतवर्षे योगकुशलैर्योगाभ्यासलब्धासाधारणदृष्टिसम्पन्नैर्योगजधीशक्तिशालिभिश्चर्षिमुनिभी राहोरस्तित्वानुभवः कृत इत्यत्र न काचिदसंभावना विद्यत इति।

निबन्धोऽयमिदानीन्तनविज्ञानप्रणयिनां केवलबहिरिन्द्रियशक्तिवर्द्धकनानाविधयन्त्राद्याविष्कारमुग्धचेतसां श्रुतिस्मृतिपुराणान्यवमन्यमानानामाधुनिकभारतीयानामन्येषां वा मनोरञ्जको भवतु न वा निम्नोद्धृता भारतीयज्यौतिषाचार्यप्रवरोक्तिस्तैरेकान्तस्थितैः स्थिरधीरभावेन पुनः पुनर्ध्येयेत्युक्त्वैव वयं विरमाम इति।

अथ किमु पृथुतन्त्रैर्धीमतो भूरियन्त्रैः स्वकरकलितयष्टेर्दत्तमूलाग्रदृष्टेः।
न तदविदितमानं वस्तु यद्दृश्यमानं दिवि भुवि च जलस्थं प्रोच्यतेऽथ स्थलस्थम्॥

इति शम्॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नवभारते वर्णाश्रमव्यवस्था आवश्यकी न वा ?

पण्डितराजराजेश्वरशास्त्री द्राविडः, साङ्गवेदविद्यालयः, काशी ।

उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्
तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशा च महीसुरैश्चेत्
तानन्तरेण निपतेत् क्व नु मत्प्रणामः ॥

वर्णाश्रमव्यवस्था आवश्यकी न वेत्यमुं विषयमधिकृत्य कांश्चित्तर्कानुपस्थापयत्ययं महाराजभोजनिर्मितः श्लोकः । ब्राह्मणप्रणामेन हि वर्णाश्रमव्यवस्था स्पष्टमेवात्र निर्दिश्यते । एतेषां तर्काणां हेत्वाभासरहितत्वे नवभारतेऽपि स्वीकरणीयत्वं प्राप्तमेव । उच्चैर्गतिर्जगति सिद्धयति धर्मतश्चेदिति प्रथमस्तर्कः । "प्रत्यक्षपरोक्षानुमानलक्षणप्रमाणत्रयनिर्णीतायां फलसिद्धौ यथा-साध्यमुपायानुष्ठानलक्षणा क्रिया नीतिर्नयः" इति नीतिलक्षणानुसारेण वस्तुनिर्णयस्य कर्तव्यत्वात् त्रिवर्गसमृद्धिरूपा राष्ट्रस्य समुन्नतिरेव उच्चैर्गतिपदार्थः ।

तथा हि नीतिसारव्याख्या जयमङ्गला "राजाऽस्य जगतो हेतुर्वृद्धेः" इति श्लोके— "वृद्धिर्लोकस्य त्रिवर्गप्राप्तिः" इति । सेयं वृद्धिरूपा उच्चैर्गतिः परराष्ट्रेण सह सन्धिविग्रहादिषाड्गुण्यप्रयोगद्वारा संपाद्यते राजनीत्या । सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्येषु षड्गुणेषु मध्ये सन्धिरेव प्रधानतमं लक्ष्यमन्येषां पञ्चानां गुणानामित्यपि स्पष्टीकृतं जयमङ्गलायां षाड्गुण्य-प्रकरणे । एवंरीत्या राष्ट्रस्य त्रिवर्गसमृद्धिः सन्ध्यायत्तेति स्थितम् । सन्धिस्वरूपं च कौटिल्येन एवमुक्तमर्थशास्त्रे—"शमः, समाधिः, सन्धिरिति पर्यायाः । राज्ञां विश्वासोपगमः सन्धिः" इति । "अयं मदिष्टं साधयिष्यत्येवेति निश्चयो विश्वासः" इति विश्वासलक्षणमुक्तं सिद्धान्तबिन्दुव्याख्यायां न्यायरत्नावल्याम् । एवंविधनिश्चयात्मकविश्वासप्राप्तिरेव समस्ताया राजनीतेः प्रधानमुद्देश्यं यदि भवति तर्हि तत्स्थैर्यसंपादकानि साधनानि नोपेक्ष्यतामर्हन्तीति दण्डापूपिकयैवागच्छति ।

चलसन्धेः स्थिरसन्धेश्च विमर्शः कौटिलीयार्थशास्त्रे तट्टीकायां नयचन्द्रिकायां चैवं कृतः —

"सत्यं शपथो वा चलसन्धिः । प्रतिभूः प्रतिग्रहो वा स्थावर इत्याचार्याः । नेति कौटिल्यः, सत्यं शपथो वा परत्रेह च स्थावरः सन्धिः, इहार्थ एव प्रतिभूः प्रतिग्रहो वा बलापेक्षः । संहिताः स्म इति सत्यसन्धा पूर्वे राजानः सत्येन सन्दधिरे" इत्यादि ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र नयचन्द्रिका—"विश्वासोपगमस्य कारणभेदात्सन्धिभेदमाचार्यमतेन तावदाह—सत्यमित्यादिना । सत्यमिति सत्यमिदमित्यर्थकथनम् । शपथ इति स्वर्णादिस्पर्शनार्थकथनम् । आभ्यां कृतः सन्धिश्चलः, अव्यवस्थितः, अविश्वसनीय इत्यर्थः । प्रतिभूरिति प्रमाणीकृतः, मुख्यादिकृतः। प्रतिग्रहोऽनतिक्रमणार्थमर्पितः पुत्रादिः। आभ्यां कृतः स्थावरः, विश्वास्य इत्यर्थः । आचार्योक्तिविपरीतं युक्तिगर्भं स्वमतमाह—सत्यमित्यादि । सत्यादयश्चत्वारोऽपि स्थावरा एव । किञ्च, दीर्घदर्शितया पारलौकिकैहिकयोरनर्थयोरवेक्षणात् पूर्वपूर्वातिक्रमे सत्युत्तरापेक्षा । सत्यशपथयोरतिक्रमे परलोकभयं तावत्........इह चासत्यश्चादैष्टिकश्चेत्यविश्वास्यतेत्युभयतो भयं सत्यशपथयोरतिक्रमे । प्रतिभूप्रतिग्रहयोस्तु दृष्टभयमेव, तदपि बलापेक्षम् । बलाभावे हि बलवताऽवध्यतिक्रमे दुर्बलप्रतिभूः किं कुर्यात् ? एवं सन्ध्यर्थमर्पितो मत्पुत्रो मुच्यतामिति बलवतोक्ते दुर्बलस्य तन्मोचनमेव कार्यमिति व्यवस्थितेरित्याशयः" इति ।

अत्र हि टीकायां दीर्घदर्शिताकृतं परलोकभयं स्थिरसन्धेः कारणमुक्तम् । दीर्घदर्शितागुणश्च—

दीर्घदर्शित्वमुत्साहः शुचिता स्थूललक्ष्यता ।
विनीतता धार्मिकता गुणाः साध्वाभिगामिकाः ॥

इति स्वामिप्रकृतिगुणत्वेन नीतिसारेऽर्थशास्त्रे च उक्तः । पूर्वोत्पन्नकार्यविभागज्ञानेन दीर्घकालभाव्यर्थानुमानाद्दीर्घदर्शीति दीर्घदर्शिपदं विवृण्वता जयमङ्गलाकारेणानुमानविशेष एव परलोकविषयकः शास्त्रकृतो दीर्घदर्शित्वमित्युक्तम् । एतादृशदीर्घदर्शिताकृतः सन्धिरेव स्थिर इति राजकीयसंस्कृतमहाविद्यालयोट्टङ्कितेनानेन सुभाषितेनापि दर्श्यते—

मृद्घट इव सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यः सुकरसन्धिश्च ॥ इति ।

सोऽयं काञ्चनसन्धिरेव पाश्चात्यानामस्माकमपि च लक्ष्यभूत इति तदीयवचनैरेव व्यवस्थापयितुं शक्यते ।

"चोदनालक्षणोऽर्थो धर्मः" इति धर्मलक्षणे चोदनानुमितेष्टसाधनताकत्वं धर्मत्वमिति परिष्कुर्वद्भिर्मीमांसकैर्दीर्घदर्शितारूपमिदमेवानुमानं धर्मलक्षणजीवातुत्वेन व्यवस्थापितम् । अतः स्थितमेतत्—प्रोक्तानुमानघटितेन धर्मेणैव राष्ट्रस्य त्रिवर्गसमृद्धिरूपोन्नतिर्भवितुमर्हतीति । उक्तसुभाषिते तादृशानुमानविशिष्टः पुरुष एव सज्जनपदवाच्य इति च सुजनपदार्थोऽपि दुर्भेद्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सन्धित्वसामर्थ्यादवसीयते। अत एव—"प्रणिपातेन हि गुरून् सतोऽनूचानचेष्टितैः" इति नीतिसारश्लोकव्याख्यायाम्-"सतो विद्यावृद्धान्" इति व्याचक्षाणेन जयमङ्गलाकारेण पूर्वोक्तानुमानविशेषरूपं विद्यावृद्धत्वं लक्ष्यीक्रियते। अयमेवांशः—"तस्य प्रमा च वचनैः कृतकेतरैश्चेत्" इति द्वितीयचरणे विवृतो भोजमहाराजेन। इदमनुमानमपौरुषेयैर्वैदिकैर्विधिवाक्यैरेव भवति हेतूक्रियमाणैर्न पौरुषेयीभिः कल्पनाभिः, परलोकविषये पुरुषबुद्धेरस्वतन्त्रत्वादित्यावेद्यते—"तस्य प्रमा च वचनैः कृतकेतरैश्चेत्" इति द्वितीयचरणेन तर्कविशेषः। कथं वाक्यसमूहात्मकस्य वेदस्यापौरुषेयत्वं संभवतीत्ययमंशः साङ्गवेदविद्यालयीयरजतजयन्तीस्मारकपुस्तके विस्तरेण वर्णितः। इह तु संग्रहेण एको वैदिको मन्त्रः प्रमाणतयोपन्यस्यते—

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥ इति।

इत्ययं मन्त्रः, अत्र हि पशूनां वाचं दृष्टान्तीकृत्यानादिप्रवाहायातत्वमावेद्यते वेदवाचः। न हि गोषु विद्यमानो हुम्भारवोऽन्यत्र वा पशुजातिषु विद्यमानास्तत्तज्जातिप्रसिद्धा ध्वनय इदंप्रथमतया कस्मिंश्चित्काले प्रवृत्ता इति केनापि सचेतसा वक्तुं शक्यते। तेनैव न्यायेन वेदवाचोऽप्यनादिप्रवाहायातत्वं मन्तव्यम्। इति प्रतिज्ञायमानोऽर्थो हेतूपदर्शनेन साध्यते सा नो मन्द्रेत्यनेनांशेन। अत्र सङ्गीतशास्त्रप्रसिद्धिरालोचनीया भवति। तत्र ह्युक्तम्—

सरी वीरेऽद्भुते रौद्रे धो बीभत्से भयानके।
कार्यौ गनी तु करुणे हास्यशृङ्गारयोर्मपौ ॥ इति।

एवं च मन्द्राविशेषणेन षड्जऋषभप्रधाना दैवी वागभिलक्ष्यते। सा च रौद्राद्भुतयोरपि यद्यपि संभवति, तथापि "इषमूर्जं दुहाना" इति विशेषणेन परिपालनोपायभूता धर्मप्रधाना वीररसात्मिकैव वागभिलक्ष्यते। सा हि पुरुषबुद्धिकल्पिता न कथमपि संभवति, अपि तु दैवी। सा च धेनुरूपा वाणी अस्मान् रक्षतु इति ह्याशास्यते मन्त्रेणानेन। एवं चाविच्छिन्नपरम्परायातो वेद एवास्माकं रक्षक इति सिद्धम्। ये त्वर्थकामप्रधानास्तेषामेतादृशवाग्लाभोऽशक्य एवेत्युक्तं मनुना—

अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥ इति।

वीणां संयोज्य तया सह संवाद्यमानेषु स्वकीयस्वरेषु मन्त्रोक्तोऽयं विशेषः स्वसंवेदनसिद्ध एवेत्यत्र नाधिकं किञ्चिद्वक्तुमीहामः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भारतवर्षमधुना स्वतन्त्रमभूत् । एतदीयस्वातन्त्र्यरक्षणमर्थकामेष्वसक्तैरेव कर्तुं शक्यते, परराज्येषु भारतीयादर्शप्रतिष्ठापनं चेति हि माननीयराष्ट्रपतिप्रभृतीनां भाषणेभ्योऽवगम्यते । राजकीयसंस्कृतमहाविद्यालयस्यायमेव महानुपयोगः, न यथाकथञ्चिद्वेतनभोगिपण्डितसमूहनिर्माणम् ।

दक्षता भद्रता दार्ढ्यमापत्क्लेशसहिष्णुता ।
सन्तोषः शीलमुत्साहो मण्डयन्त्यनुजीविनम् ॥

इति नीतिसारोक्तदिशाऽर्थकामप्रधानानां नित्यमसन्तुष्टचित्तानां राजकीयमूलपदलाभोऽप्युत्तरोत्तरं दुष्कर एव प्रतिभाति । तत्रापि विशेषेण भद्रतागुणो लोकसंग्राहकतयाऽपेक्षित एव । लोकसंग्राहकत्वं च—

शुचिरास्तिक्यपूतात्मा पूजयेद्देवताः सदा ।
देवतावद् गुरुजनमात्मवच्च सुहृज्जनम् ।
प्रणिपातेन हि गुरून् सतोऽनूचानचेष्टितैः ॥

इत्यादिनीतिसारोक्तदिशा—"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः" इति लक्षणलक्षितानामनूचानानामाचारानुसरणमन्तरा न संभवति, इति सर्वथा उच्चैर्गतिर्जगतो वैदिकधर्माधीनैव भाति ।

तदिदं वेदस्य यथार्थज्ञानं तत्प्रकाशनं च तदधिकृतान् ब्राह्मणानन्तरेण न संभवतीति हेतोर्ब्राह्मणप्रधाना वर्णाश्रमव्यवस्था जगदभिवृद्धये आवश्यकी सर्वथैवेति तर्कमुद्रयैवाविष्कृतं भोजराजेनोक्तश्लोकान्त्ये भागे—

"तेषां प्रकाशनदशा च महीसुरैश्चेत्तानन्तरेण निपतेत्क्व नु मत्प्रणामः" इति ।

वेदरूपेयं कामधेनुः पाश्चात्त्यानामपि स्थायिशान्तिप्रदानेनोपकारिणी धेनुरिव बालानां दुग्धदानेन । तस्या हननं यदि ते विवेकिनस्तर्हि न कुर्युरेव, यद्यपि केचिदविवेकिनस्तस्या हननाय यतन्तेऽपि । यथा—"सिंहो व्याकरणस्य कर्तुरहरत्प्राणान् प्रियान् पाणिनेः" इत्यादि । तथापि तावता हन्तुः सिंहस्य न कापि कीर्तिरभूत्, न वा पाणिनेः कीर्तिलोपेऽद्यापि दृश्यते । अतः कीर्तिकामै रक्षणीयैवेयं वैदिकी वर्णाश्रमव्यवस्थेत्यस्माकं [1]मतम् ॥

---

1 अस्य महाविद्यालयस्य सप्तमोपाधिवितरणोत्सवावसरे वादविवादप्रतियोगितायां सभापतिपदमलङ्कुर्वतो विदुषो भाषणमिदम्–सम्पादकः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हिन्दूधर्मसंहिताविमर्शः

श्रीरघुनाथशर्मा, राजकीयसंस्कृतमहाविद्यालयः, काशी।

प्रस्ताविते हिन्दूविवाहतद्विच्छेदविधेयकनाम्नि नियमकदम्बके हिन्दूबालतत्संरक्षकविधाने च सामान्यतो विशेषतश्च विचारोऽस्य निबन्धस्य विषयः। तत्र विचारमूलभूता इमे विकल्पाः प्रागुपतिष्ठन्ते—

१ हिन्दूनां तत्तच्छाखीयधर्मग्रन्थेषु जाग्रत्स्वस्य नव्यस्य सृज्यमानस्य नियमकदम्बकस्याधुनाऽपेक्षाऽस्ति न वा।

२ यद्याद्यः कल्पः, तदैतन्नियन्तव्या विषयाः के ये धर्मशास्त्रेष्वनियन्त्रिताः।

३ लौकिको वा कश्चन स्वार्थोऽस्त्येतन्नियमनिर्माणे येन सर्वेऽपि हिन्दूपदभाजो नानाशाखाश्रिता एकसूत्रनद्धाः स्युः।

४ यद्वा धर्मशास्त्रीयनियमानामधुनाऽशक्त्या परिस्थितिवशादपाल्यत्वम्।

५ यद्वा परिवर्तिनि संसारे वर्तमानकाले प्राक्तनधर्मशास्त्रनियमानां तत्कालापेक्षया विहितानामनुष्ठाने दुःखावहत्वेन परिवर्तनावश्यकता।

६ यद्वा धर्मशास्त्राणाम्–"न स्त्री स्वातन्त्र्यमर्हति" इत्यादिवाक्यैः सर्वदा नारीपारतन्त्र्यप्रतिपादकत्वेन तासां समानाधिकारज्ञापनाय नवीननियमनिर्माणावश्यकता।

७ यद्वा धर्मशास्त्राणां परस्परविरोधित्वेनानियामकत्वान्नवीननियमनिर्माणस्यावश्यकत्वम्।

८ एतन्नियमकदम्बकस्य धर्मशास्त्रमूलकत्वं न वा।

९ इयं च नवीना विवाहतद्विच्छेदव्यवस्था किमिति हिन्दुष्वेवापेक्ष्यते नेतरजातिष्वेतद्देशवासिनीषु।

१० किमितरजातिषु शाखाभेदा उच्चनीचजातिभेदा वा न सन्ति।

तत्र विचारसामान्यम्

तत्र प्रागुक्तेषु विकल्पेषु सत्सु वयं तु युक्तं विमृशामस्तत्तच्छाखीयधर्मग्रन्थेषु जाग्रत्सु न नवीननियमनिर्माणस्यावश्यकता वर्तते। नहि धर्मशास्त्रनियन्तव्यविषयेभ्योऽतिरिक्ता विवाहविवादसदाचारप्रायश्चित्तातिरिक्ता विषया नवीननियमनियन्तव्या इदानीमुपस्थिताः। नानीदृशं जगत्कदापीति मीमांसासिद्धान्तात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नापि हिन्दूनामेकसूत्रनद्धत्वं नवीननियमनिर्माणप्रयोजनम् । यथा प्रागिदानीं च शाखासहस्रभिन्नेऽपि हिन्दूधर्मे सर्वानुगतसामान्यहिन्दूधर्मदेशसमाजकुलाचारवेषभूषादिभिर्हिन्दूत्वेन समनुगतो व्यवहारस्तथाग्रेऽपि भविष्यतीति ।

धर्मशास्त्रीयनियमानां प्राक्तनानामशक्त्या परिपाल्यत्वाभावे न परिपाल्यन्तां ते तत्रभवतां सामर्थ्याभावेनाधिकाराभावात्, अर्थी समर्थोऽपर्युदस्तश्चाधिकारी भवतीति न्यायात् । ये तु शक्या परिपाल्यास्त एव पाल्यन्ताम् । दृष्टाश्चाशक्त्यवसरे आपद्धर्मा धर्मशास्त्रेषु सुबहुशः । अगम्यागमनाभक्ष्यभक्षणानुचितक्रियादिरूपा यथेष्टचेष्टास्तु परलोकदेशसमाजकुलभ्रंशहेतुत्वान्निरोद्धव्या एव । अन्यथा नवीननियमोऽपि यत्किञ्चिद्यथेष्टचेष्टानिरोधकत्वादनुपादेयतामापत्स्यत एव । वयं तु साधूत्पश्याम इदं दृढं नियमबन्धनमेव सहस्राधिकवर्षपरतन्त्राया हिन्दूजनताया दास्यकालेऽपि स्वधर्मादप्रच्युतिबीजम् । अत एवैनां कोऽपि धर्मः स्वधर्माच्च्यावयितुं नाशकत् ।

धर्मशास्त्रेषु परिवर्तनावश्यकत्वेऽप्यापद्धर्मकलिधर्मादिरूपैः परिवर्तनानि प्रागेव कृतानि तत्रास्माकं न काचिदपेक्षा। किञ्च भोः, इदं न विस्मर्तव्यम्—यथा धर्मशास्त्रीयशासनधर्मे परिवर्तनं स्वेच्छयाऽनिच्छया वा स्वीकृत्य तत्तद्राजसत्तायां शासनधर्माव्यवस्थया महद्दुःखमस्माभिरनुभूयते इदं रम्यमिदमरम्यमिति कलहेन तथैव विवाहादिष्वार्षनियमातिवृत्तावनर्थपरम्परा पतिष्यतीति सावधानं विमृश्यताम् ।

नारीणां समानाधिकारस्तु धर्मशास्त्रेष्वस्त्येव, अधिकोऽपि वर्तते । तथा हि—"नारी पुरुषस्यार्धम्" इति मनुशतरूपोपाख्याने श्रूयते । स्मर्यते च भगवतः शिवस्यार्धनारीश्वरमूर्तिः । विवाहे सति नारीयुक्तत्वात् पुरुषः पूर्णो भवतीत्यर्धवृगलदृष्टान्तेन छान्दोग्ये श्रूयते । प्राक् तु नारीसंबन्धादपूर्णः । अत एव नार्या सहैव पुरुषस्य सर्वधर्मानुष्ठानम्, न तु वियुक्तस्य ।

तस्यां तु रोचमानायां सर्वं तद्रोचते कुलम् ।
तस्यां त्वरोचमानायां तत्कुलं न प्ररोहति ॥ इति,
भार्या त्वर्धं शरीरस्य पुत्रः स्वात्मैव केवलम् ।
आश्रितो भृत्यवर्गस्तु दुहिता कृपणं परम् ॥
तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा । इति च मनुः ।

नार्याः क्वचिदाधिक्यमपि । यथा—क्षेत्रिणः पुत्र इति, न तु बीजिनः । यथा च व्यवहारे मातापितराविति मातुः पूर्वमुल्लेखः । यथा वा—"पितुर्दशगुणं माता गौरवेणातिरिच्यते" इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

असारे खलु संसारे सारं सारङ्गलोचना।
यत्कुक्षिप्रभवा ह्येते वस्तुपाल भवादृशाः॥

इति कश्चिज्जैनकविः। शास्त्रेऽपि शक्तेरेव मुख्यं सृष्टिस्थितिसंहारकर्तृत्वं पुरुषे तु शक्तिसंबन्धादेव।

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रास्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति॥

इत्यादिवचनानि त्वप्रमादेन नारीरक्षापराणि। अन्यथा पुरुषान्तरसंपर्के रक्तविकृतौ संतानपरम्परा भ्रश्येत। अत एव योगियाज्ञवल्क्यः शास्त्रीयदारसंग्रहस्य फलमाह—

लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः।
यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः॥ [विवाहप्रक० ७८] इति,
भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः॥ [विवाहप्रक० ८२]

इति च स्त्रीणां सेव्यत्वं रक्ष्यत्वं पूज्यत्वं चाह। न चाधुना पुरुषाणां स्वातन्त्र्ये नारीणामपि स्वातन्त्र्यमस्त्विति साम्प्रतम्। पुरुषस्वातन्त्र्यस्यैव निरोधावश्यकत्वात्। श्रूयते स्मर्यते च रामचन्द्रचरितादिष्वेकनारीव्रतम्। तदेव प्रयत्नेन राजशासने उपादीयताम्। एवं च धर्मशास्त्रेषु नारीस्वातन्त्र्यमपहृतमिति वाक्यं नारीणां प्रतारणायैवेत्युक्तप्रायम्। नारीणां नराणां च यथेष्टचेष्टा तु निरोद्धव्या एवेति विविधपद्धत्या विमर्शे नास्ति नवीननियमकदम्बकनिर्माणस्यावश्यकता, यतो ह्याद्यनियमच्युतौ नियमानवस्थैव स्यात्, 'भिन्नरुचिर्हि लोकः' इति न्यायादिति।

धर्मशास्त्राणां परस्परविरोधाभासे प्रतीयमानेऽप्युदितानुदितहोमविधायकश्रुत्यादिवचनवन्मीमांसापद्धत्या कृतैव व्यवस्था सर्वेषां विरोध्याभासवचनानां विज्ञानेश्वरादिभिः। किञ्च, श्रुतिमूलकत्वेन स्मृतीनां प्रामाण्यमत एव प्रत्यक्षं श्रुतिः, स्मृतिस्त्वनुमानमिति। अत एव प्रत्यक्षश्रुतिविरोधे स्मृतिर्बाध्यते। तथा च स्मृतीनामप्रामाण्ये त्यागे वा तन्मूलश्रुतीनामपि तत्प्रसङ्गः। स च हिंन्दूधर्मग्रहिलैर्न ग्रहीतव्यो भविष्यति महत्यामप्यापदि।

एतन्नियमकदम्बकस्य धर्मशास्त्रमूलकत्वे वैयर्थ्यम्। तदमूलकत्वे चाप्रामाण्येन धर्मानियामकत्वम्। तर्कमूलकधर्मनियमानाम्–"तर्काऽप्रतिष्ठानात्" इति व्याससूत्रेण, "यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥" इति तदनुवादिन्या हरिकारिकया चाप्रतिष्ठितत्वबोधनात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किञ्च, मुस्लिमजातावपि व्यापिकायां व्याप्यानेकशाखासु जुलाहापठानशेखशैयदेत्यादिविविधाचाररूढिवादिनीषु च सतीषु यदि नवीना धर्मव्यवस्था तासु केनापि हेतुना न प्रस्तूयते न निबध्यते नोपन्यस्यते तर्हि तमेव हेतुं पुरस्कृत्य हिन्दूधर्मव्यवस्थाऽप्येषा नोपन्यासार्हा ।

अथ विचारविशेषः

तत्र हिन्दूपदार्थनिर्णयः

ये हिन्दूशाखासु विशेषतो विभक्तान् धर्मान् सामान्यधर्मांश्च सर्वशाखास्वनुगतान् हिन्दूनां सदाचारांश्च कुलाचारांश्च समस्तान् व्यस्तान् वाऽऽश्रयन्ते, वर्णान्तर्गता वर्णबाह्या वाऽधुनापि वा ये स्वात्मनैव न तु कुलक्रमेण हिन्दूधर्मान् श्रयन्ते, अत्र वसन्ति विदेशे वा विदेशाद्वाऽऽगत्य किञ्चित्कालादत्र वसन्ति ते सर्वेऽपि हिन्दूपदभाजः । अवान्तरभेदस्तु तेषां प्राचीनो नवीनो वास्त्येव भविष्यत्येव च पूर्वकाल इव । सामान्यधर्मेण तेषां सर्वेषामैक्यम् । शाखाधर्मैस्तु भेद इति यावत् । किं बहुना—वनदुर्गसमाश्रिताः किरातादयोऽपि हिन्दव एव ।

सापिण्ड्यनिर्णयः

सापिण्डयं तु–"पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा" [विवाहप्रक० ५३] इति याज्ञवल्क्यवचनादेतत्संवादिमनुवचनाच्च मातृतः पञ्चपुरुषं पितृतः सप्तपुरुषमेव युक्तम् । "त्रीनतीत्य मातृतः पञ्चातीत्य च पितृतः" इति पैठीनसिवचनं तु "अर्वाङ्निषेधार्थम्, न तु तत्प्राप्त्यर्थमिति सर्वस्मृतीनामविरोधः" इत्युक्त्वा विज्ञानेश्वरेण मिताक्षरायां व्यवस्थापितमिति न त्रिपुरुषं पञ्चपुरुषं च यथाक्रमं मातृतः पितृतश्च सापिण्डयम् । ये त्वेकपितृका भिन्नजातीयमातृकाश्च तेषां तु त्रिपुरुषं सापिण्डयं भवति—

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः ।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु ॥

इति शङ्खवचनात् ।

विवाहनियममीमांसा

"अस्मिन् नियमे स्वीकृते धर्मशास्त्राणां नोपयोगो भविष्यति" इति हिन्दूसंहितावचनमपि नियमानवस्थाप्रसङ्गदोषाद् दूषितं सामान्यतो विचारावसर एव । जीवत्पतिकाया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जीवत्पत्नीकस्य च न विवाहान्तरमिति नियमवाक्येनानुमन्यमानो मृतपतिकाया विवाहस्त्रैवर्णिकेषु नोचितः, शास्त्रविरुद्धत्वात्। तथा च मनुः—

नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्॥ इति,
न विवाहविधौ दृष्टं विधवावेदनं क्वचित्॥ इति च।

यत्तु—"अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया। सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्॥" [याज्ञवल्क्य० विवाहप्रक० ६८] इत्यादिनियोगवचनं स्मर्यते तत्तु वाग्दत्ता-विषयम्, "यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन विधानेन निजो विन्देत देवरः॥" इति मनुवाक्यात्; व्यवस्थापितं च मिताक्षरायां तत्रैव तथैव च। न च-"नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते॥" इति स्मृत्यन्तरात्युक्त एव विधवायाः पत्यन्तरसंबन्ध इति वाच्यम्; प्रागुक्तमनुवाक्यानुरोधेनास्यापि वाग्दत्तामात्र-परत्वात्। तथा हि–पताविति रूपं मुख्यार्थकपतिशब्दसदृशस्य पतित्वेनाख्यातार्थकस्य पतिशब्दस्य रूपम्। पतिरित्याख्यातः पतिः। आख्यानणिजन्तात्कर्मणि 'अच इः'इत्यौणादिक इप्रत्ययः। अत एव 'पतिः समास एव'इति नियमानाक्रान्त्या पत्याविति न रूपम्, "अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः" इति न्यायात्। किञ्च, प्रागुदाहृतत्रैवर्णिकविधवानियोगनिषेधकस्मृति-विरोधेन शूद्रविधवापरत्वमस्य युज्यते। सर्वविधवाविषयकत्वेन विधिनिषेधयोर्विकल्पस्तु न, त्रैवर्णिकविधवानियोक्तॄणां प्रागुदाहृतनिन्दाश्रवणात्। किञ्च, अत्र—"पतिरन्यो विधीयते" इति रागतः प्राप्तस्य भूतार्थस्यानुवादो न तु विधिः, विधिबोधकलिङाद्यभावात्। स च निषेध-विधिना–"न नियोक्तव्या द्विजातिभिः" इति प्रागुदाहृतेन बाध्यते।

उन्मत्तमूर्खयोरज्ञानाद्विवाहे संपन्नेऽपि सोऽविवाह इत्यपि न युज्यते। यतः—

क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः।
अन्धोऽचिकित्स्यरोगाद्या भर्तव्याः स्युरनंशकाः॥
अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः।
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥

[याज्ञवल्क्य० विवाहप्रक० १४०, १४२]

इत्यनेन वचनद्वयेन क्लीबादिपत्नीनामपि विवाहान्तरं नास्तीति लभ्यते। न च पत्यन्तर-विधायकं वचनमुपलभ्यते, 'नष्टे मृते'इत्यादिवाक्यस्य वाग्दत्तामात्रपरत्वेन प्राग्व्यवस्थापितत्वात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चदशवर्षवयस्ककन्यकाया एव न तु न्यूनवयस्काया अष्टादशवर्षवयस्कवरेणैव विवाह इत्यपि—"लक्षण्यामुद्वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्" इति विवाहप्रकरणस्थवचनविरोधात् स्वसाधकवचनानुपलब्धेश्च हेयम्। वधूवरयोः समागमकालस्त्वयं भवितुमर्हति वधूप्रवेशाव्यवधानेन। तथा च शास्त्रस्वार्थयोरविरोधः।

उपोप मे परामृश मा मे दभ्राणि मन्यथाः।
सर्वाहमस्मि रोमशा गान्धारीणामिवाविका॥

इति श्रुतावपि संभोगयोग्यताप्राप्तेः प्रागेव विवाहोऽवधार्यते। संभोगस्तु योग्यताप्राप्तौ। प्रागुक्तसापिण्ड्यस्य निरासे तद्विषयकः परिहार्यत्वापरिहार्यत्वविचारोऽपि निरस्तो वेदितव्यः, आलम्बनाभावात्।

यद्यपि षोडशवर्षात्प्राक् संरक्षकस्य कन्याया विवाहे संमतिरनिवार्या। अतः परं कन्या स्वतन्त्रेत्येष नियमः—"त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वं तु वर्षत्रितयात् कन्या कुर्यात् स्वयंवरम्॥" इति शास्त्रानुमोदित इति पित्रादीनामुपेक्षा युज्यते, तथापि शास्त्रं तु वरणसजातीयत्वसत्कुलजत्वाद्यर्थं कन्ययाऽपेक्षितव्यमेव। नहि शिष्यापराधे गुरोर्दण्डः। अतः कन्यया सगोत्रासवर्णादिवरस्वीकाररूपा यथेष्टचेष्टा न कार्या। तस्यामवस्थायां शास्त्रत्यागस्य शास्त्राननुमतत्वात्। "गम्यं त्वभावे दातॄणां कन्या कुर्यात् स्वयंवरम्" [याज्ञवल्य० विवाह० ६४] इति वरस्य गम्यत्वं विशेषणं स्मर्यते।

संरक्षकाणां कन्याप्रदातॄणां क्रमोऽप्येतन्नियमस्वीकृतो न शास्त्रसंमतः। तथा हि—

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥ [याज्ञवल्क० विवाहप्रक० ६३]

इति कन्याप्रदातृक्रमः स्मर्यते। शास्त्रसंमतः संरक्षकक्रमोऽप्येष एव भवितुमर्हति। एतच्चाग्रे स्पष्टीभविष्यति।

वरकन्ययोरन्यतरकुलरीत्या विवाह इत्यपि शास्त्रपद्धतिविरुद्धमाचारविरुद्धं च। तथा हि-पित्रादिः कन्यां विवाहात्पूर्वं प्रदत्ते। वरस्तु तां विधिवत्प्रतिगृह्य स्वकुलाचारपद्धत्या संस्करोतीत्येषा शास्त्रमर्यादा। यतो विवोढा वर एव वहति, अतस्तस्य स्वकुलोचितपद्धत्या विवाहसंस्कारकर्तृत्वमेव युक्तम्।

हिन्दूविवाहस्य राजेष्टीकरणम्, तदभावे शतमुद्रादण्डनमित्यपि न साम्प्रतम्, दोषजालजटिलत्वात्। तथा हि—पूर्वं तावद्गणतन्त्रे जनतास्वातन्त्र्यापहारः, अनपेक्षितव्ययाधिक्यम्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैयर्थ्यं च; राजेष्टीकरणेऽपि रागाभावे परस्परं दोषारोपेण परस्परत्यागसंभवात्। परस्परं रागे सति तु वैयर्थ्यं स्पष्टमेव। किञ्च, राजेष्टीकरणेन धार्मिकस्य स्वभावदृढस्य हिन्दूविवाहसंस्कारस्य महत्त्वं हीयेत।

दाम्पत्यविच्छेदविषयको विचारः

सत्सु केषुचित्कारणेषु पत्न्यास्त्यागो धर्मशास्त्रेषूपलभ्यते। तत्र त्यागविषय उक्तं विज्ञानेश्वरेण—"त्यागश्चोपभोगधर्मकार्ययोः, न तु निष्कासनं गृहात्तस्याः। 'निरुन्ध्यादेकवेश्मनि' इति नियमात्" [विवाहप्रकरणे ७२] इति। पत्न्यास्त्यागविषये चेमे श्लोकाः—

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्।
परिभूतामधःशय्यां वासयेद् व्यभिचारिणीम्॥
व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते।
गर्भभर्तृवधादौ च तथा महति पातके॥
सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥

[याज्ञवल्क्य० विवाहप्रक० ७०, ७२, ७३]

अधिवेदनं भार्यान्तरपरिग्रहः। अधिवेदनेऽपि भरणं विहितम्—

अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत्।
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते॥

[याज्ञवल्क्य० विवाहप्रक० ७४]

व्याख्यातं च विज्ञानेश्वरेण—"साऽधिविन्ना पूर्ववदेव दानमानसत्कारैर्भर्तव्या। अन्यथाऽभरणे महदपुण्यं वक्ष्यमाणो दण्डश्च" इति।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या॥

इति च त्यागे व्यासः। जुङ्गितः प्रतिलोमजश्चर्मकारादिः। पुरुषस्याप्येतादृश एव त्यागः, किन्तु सावधिको धर्मशास्त्रेषु दृश्यते। तद्यथा—

स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः।
आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः॥

[याज्ञवल्क्य० विवाहप्रक० ७७]

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पत्युः सर्वथा त्यागपुरस्सरं पत्यन्तरकरणं तु न श्रूयते स्मर्यते वा कस्याञ्चिदप्यापदि। अत्यागे पत्यन्तरकरणाभावे तु वचनान्युपलभ्यन्ते। तानि यथा मनुस्मृतौ पञ्चमाध्याये—

उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान्निबोधत ॥ १४६ ॥
यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः।
तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥ १५१ ॥
अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः।
सुखस्य नित्यं दातेह परलोके च योषितः ॥ १५३ ॥
विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥ १५४ ॥
पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा।
पतिलोकमभीप्सन्ती नाचरेत् किञ्चिदप्रियम् ॥ १५६ ॥
कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ॥ १५७ ॥
आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥ १५८ ॥
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥ १६० ॥
अपत्यलोभाद् या तु स्त्री भर्तारमतिवर्तते।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥ १६१ ॥
नान्योत्पन्ना प्रजाऽस्तीह न चाप्यन्यपरिग्रहः।
न द्वितीयं च साध्वीनां क्वचिद् भर्तोपदिश्यते ॥ १६२ ॥
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते।
निन्द्यैव सा भवेल्लोके परपूर्वेति चोच्यते ॥ १६३ ॥ इति।

स्मर्यते च मार्कण्डेयपुराणे माण्डव्योपाख्याने वेश्याकामुकः कुष्ठी भर्ता साध्व्याऽनुकूलाचरणेनोपचरित इति। तदनेनार्थवादेन महारागदूषितः कामवृत्तोऽपि पतिः श्रद्धयोपचरितव्य इति विधिः कल्प्यते। तदेष दाम्पत्यविच्छेदो हिन्दूधर्मबाह्यो धर्मान्तरेऽनुसृतोऽपि रम्यां हिन्दूसमाजव्यवस्थां समूलमुन्मूलयिष्यन् न कटाक्षेणापीक्षणीय इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवलोक्यते च दाम्पत्यविच्छेदव्यवस्थामूलको यादृशः कुटुम्बकलहो विधर्मिषु विदेशेषु देशे चात्र न तथा हिन्दूकुटुम्ब इति न शक्यापलापम्। किञ्चेदमन्यद्विचारास्पदम्—यथाऽस्यां व्यवस्थायां सपिण्डं परिभाष्य तत्परिहारः कृतस्तथा सगोत्रसप्रवरपरिहारः कुतो न कृतः। यद्युच्यते सगोत्रसप्रवरविवाहो दृष्टप्रमाणविरोधित्वान्न परिहार्यः शास्त्रे परिहृतोऽपि, तदा भवत्परिभाषितसपिण्डविवाहोऽपि न परिहार्यस्तत्त्वादेव। दृश्यते हि भवत्परिभाषितसपिण्डविवाहो मुस्लिमसमाजे। न च काचन हानिस्तैरस्माभिर्वा प्रत्यक्षीक्रियते।

एकस्मिन् दाम्पत्यसंबन्धेऽक्षते संबन्धान्तरकरणे दण्डव्यवस्थाविधायकोऽष्टादशो नियमोऽपि शास्त्रविरुद्धो हिन्दूस्वार्थविरुद्धो लोकविरुद्धश्च। तथा हि—"सुरापी व्याधिता धूर्ता" इत्यादिपत्नीसत्त्वे पत्न्यन्तरकरणरूपमधिवेदनं स्मर्यते। न च नार्या नरान्तरसंबन्ध इव नरस्य विधिवन्नार्यन्तरकरणं निषिध्यते। दृश्यते च श्रुतौ याज्ञवल्क्यस्यानेकभार्यत्वम्। स्मर्यते च पुराणेषु सगरदशरथकृष्णार्जुनादीनां बहुभार्यत्वम्। अधुनापि हिन्दूसमाजेऽनेकभार्यत्वं दृश्यते। हिन्दूनां स्वार्थविरोधस्तु सर्वोच्छेदभीषणः प्राप्नोति। तथा हि—मुसलिमसमाजस्यानेकभार्याकरणनिषेधाभावे हिन्दूनां चानेकभार्याकरणनिषेधे सततं वेगेन प्रवर्धमाना मुसलिमजातिः साम्यमाधिक्यं वा प्राप्स्यतीति हिन्दूनां सर्वथा स्वार्थघातिकेयं धारा।

हिन्दूबालतत्संरक्षकनियममीमांसा

हिन्दूबालतत्संरक्षकसंबद्धप्राक्तनधर्मान् धर्मशास्त्रोदितानंशतोऽपहायांशतः परिवर्त्यापूर्वांश्च कांश्चिन्निवेश्याधुना केचित्तान् राजधर्मत्वसंपत्त्यै प्रस्तुवन्ति। यत्र त्रयोदशधारा मुख्या अवान्तरधाराश्च द्वे तिस्रो वा क्वचित् क्वचिदुपनिबद्धा आशु बुद्ध्यारोहाय। अत्रेदं वक्तव्यम्—किमासां धाराणां पुरुषबुद्धिप्रभवत्वं धर्मस्मृतिमूलकत्वं वा? तत्र पुरुषबुद्धिप्रभवत्वेऽनवस्थादौस्थ्यम्, "तर्काऽप्रतिष्ठानात्" इत्यादिना ब्रह्मसूत्रकृद्भिरनादरणात्तर्कस्य; "यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥" इति हरिवचनाच्च। धर्मस्यादृष्टपदवेदनीयस्य "चोदनालक्षणोऽर्थो धर्मः" इति जैमिनिमुनिना चोदनामात्रगम्यत्वस्य (शब्दमात्रप्रमितस्यैव) आस्थानाच्च। एवं च हिन्दूबालतत्संरक्षकसंबद्धधर्मेऽपि स्मृतिषु जाग्रतीषु किमिति पुरुषबुद्धिप्रभवा धर्मा प्रस्तूयन्त इति न विद्म ऋते पाश्चात्त्यपद्धत्यनुकरणरागात्। पाश्चात्त्यसभ्यतायास्त्वतिनव्यत्वात्तत्र व्यवस्थिताः प्राक्तनधर्मा नासन्नित्यनियताः कल्प्यन्ते कल्पयिष्यन्ते च।

किञ्च, याज्ञवल्क्यस्मृतिदर्शनेन धर्माणां त्रैविध्यं प्रतीयते। प्रथमं तावद्धर्मो द्विविधः—निजधर्मः सामयिकश्चेति। सामयिकोऽपि द्विविधः—प्रजाकृतो राजकृतश्चेति। तत्र श्रौतस्मार्त-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निजधर्माविरोधेनैव सामयिको धर्मो राजकृतोऽपि पालनीयो न तु निजधर्मविरोधेनेति याज्ञवल्क्यस्मृतावादेशः। तथा हि—

निधधर्माविरोधेन यस्तु सामयिको भवेत्।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः॥ [व्यवहारा० १८६]

तत्र सामयिकधर्माणां कालभेदेन राजधर्माणां च सामयिकानां राजभेदेनानियतत्वात् स्मृतिष्वनुल्लेखः। निजधर्माणां तु ब्राह्मणादिवर्णक्रमेण नियतत्वात्तत्र नियमनम्। सामयिकधर्मा एव तत्र संवित्पदेनाप्युच्यन्ते—"गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः" [याज्ञ० व्यव० १८७] इत्यादौ। अतः प्रजाविरोधपरिहाराय राज्ञापि धर्मशास्त्रोदितहिन्दूधर्माविरोधेनैव राजधर्मः सामयिकः कर्तव्यो न तु तद्विरोधीति युक्तमुत्पश्यामः।

यद्यपि वर्तमानराजधर्मे ब्रिटिशशासनसमयात्प्रवर्तमाने स्वधर्मानुसरणाद्वाऽज्ञानाद्वा हिन्दुषु विद्वेषाद्वा क्वचित् क्वचिदंशे विरोधो दृश्यते तथापि वर्तमानशासनसमये हिन्दूधर्मरक्षा-बद्धपरिकरैः स परिहर्तव्यो न त्वधिकः संपादयितव्यः। दृश्यन्ते चैतत्प्रस्तावे बहवो धर्म-शास्त्रविरोधाः। तथा हि—

अष्टादशवर्षेभ्योऽर्वाग् बालो भवतीत्यत्र प्रस्तूयते। धर्मशास्त्रेषु तु षोडशवर्षाण्येव बालस्यावधिर्दृश्यते। तथा हि—

बालदायादिकं रिक्थं तावद्राजानुपालयेत्।
यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः॥ [मनु० ८।२७]

इति श्लोकव्याख्यावसरे—"बाल आषोडशाद्वर्षात्" इति नारदवचनांशमुद्धृत्य कुल्लूक-भट्टेन तथैव व्यवस्थापनात्;

गर्भस्थसदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः।
बाल आषोडशाद्वर्षात् पोगण्डश्चेति कथ्यते॥
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते।
जीवतोर्न स्वतन्त्रः स्याज्जरयाऽपि समन्वितः॥

इति पराशरमाधवीये व्यवहारकाण्डे कात्यायनवचनाच्च।

किञ्च, अत्र प्रस्तावे पञ्चमधारायां बालसंरक्षकत्वं स्वाभाविकं मातापित्रोरेव प्रतीयते। "तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्। अभावे बीजिनो माता तदभावे तु पूर्वजः॥"

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति पराशरमाधवीयव्यवहारकाण्डस्थकात्यायनवचनात्तु पूर्वजस्यापि स्वाभाविकसंरक्षकत्वं कण्ठोक्तं प्रतीयते । वस्तुतस्तु—

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥

इति व्यवहारकाण्डस्थयोगियाज्ञवल्क्यवचनात् कन्याप्रदातॄणां कन्यासंरक्षकत्वमर्थसिद्धम्, अनधिकारे दानासंभवात् । (अत्र प्रकृतिस्थ उन्मादादिदोषरहित इति मिताक्षराकारः। प्रकृतौ स्वभावे तिष्ठतीति व्युत्पत्तेः । मिताक्षरायामादिपदेन लोभादयोऽपि गृह्यन्ते ।) तुल्यन्यायाच्च पुत्रेष्वपि बालेष्वेत एव संरक्षकाः ।

पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः ।
उपानयेऽधिकारी स्यात् पूर्वाभावे परः परः ॥

इति वीरमित्रोदय उपनयनप्रकरणे वृद्धगर्गवचनाच्च । अत्र भ्राता पितुर्भ्रातेति व्याख्येयमिति वीरमित्रोदयकारः ।

पितैवोपनयेत् पुत्रं तदभावे पितुः पिता ।
तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥

इति तत्रैव पितामहस्मरणाच्च । पूर्वोक्तकात्यायनवचनेषूत्तरमीमांसोक्तपद्धत्या गुणोपसंहारन्यायेनैषामुपसंहारः । "वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः" इति वचनात्कन्यापुत्रयोर्विवाहोपनयनयोः साम्यप्रदर्शनाच्च ।

किञ्च, अत्रैवोपधारायां तृतीयायां परिणीतकन्यायाः पतिरेव संरक्षक इति प्रतिज्ञायते । तच्च पराशरमाधवीयव्यवहारकाण्डस्थनारदवचनविरुद्धम् । तथा हि—

एतान्येव प्रमाणानि भर्ता यद्यनुमन्यते ।
पुत्रः पत्युरभावे वा राजा वा पतिपुत्रयोः ॥

इत्यत्र पत्यभावे पुत्रस्तदभावे राजेत्येषां संरक्षकत्वं दृश्यते । स्त्रियाः सर्वथैव स्वातन्त्र्यं च निषिध्यते । तथा हि पराशरमाधवीये व्यवहाराध्याये हारीतवचनम्—

दाने वाऽऽधमने वापि धर्मार्थे वा विशेषतः ।
आदाने वा विसर्गे वा न स्त्री स्वातन्त्र्यमर्हति ॥ इति ।
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रास्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ इति मनुवचनाच्च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्रायं निष्कर्षः—उढकन्यायाः पतिः संरक्षकः, पत्युरभावे षोडशवर्षेभ्यः प्रागूर्ध्वं च पत्युः संरक्षका एव तस्या अपि संरक्षका भवितुमर्हन्ति; शास्त्रेषु तस्या पत्यर्द्धाङ्गत्वेन स्वीकारात्। तथा च मनुवचनम्—"भार्या त्वर्द्धं शरीरस्य पुत्रः स्वात्मैव केवलम्" इति। बृहदारण्यके च श्रूयते—"तस्मादिदमर्द्धवृगलमिव" [१।४।३] इति। तथा चार्द्धभागस्य संरक्षका एवापरार्द्धभागस्यापि संरक्षका भवितुमर्हन्तीति युक्तमुत्पश्यामः। सर्वाभावे राजैव संरक्षकः पूर्वोक्तनारदवचनात्। कस्यामपि चावस्थायां नार्याः स्वातन्त्र्यं धर्मशास्त्रासंमतमिति।

एवं चायं निष्कर्षः—हिन्दूधर्मशास्त्रप्रतिपादितधर्माविरोधेनैव सामयिका राजधर्मा राज्ञा प्रवर्तयितव्या न तु सर्वथांऽशतो वा तद्विरोधिनः, प्रजाकलहपरिहाराय। किञ्च, धर्मग्रन्थेष्वपि बालानां पुरुषाणां स्त्रीणां सजातीयानां संकराणां पतितानां पतितजातानां च कृते सन्त्येव व्यवहारसंबन्धिनो दायसंबन्धिनश्च नियमाः, परीक्षितानेकसहस्रकालव्यवायेन। त एवाधुनापि प्रयोक्तव्याः। देशस्य समुन्नतिरवनतिश्चार्थशास्त्रप्रतिपादितोपायायत्ता न तदर्थं धर्मव्यवस्था परिवर्तनमपेक्ष्यत इति सत्यं हितं च वेदयन् संप्रार्थये—

परश्शतसहस्रेभ्यो वर्षेभ्यः सुपरीक्षिता।
साध्वी व्यवस्था हिन्दूनां नाभिभाव्या विभावकैः॥

इति शम्॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राचीनपाठनिर्णयकुञ्जिका

श्रीरामाज्ञापाण्डेयः, सरस्वतीभवनम्, काशी।

लोके वनस्पतिबृहस्पतितारतम्यं यस्याः प्रसादपरिणाममुदाहरन्ति ।
सा भारती भगवती तु यदीयदासी तां देवदेवमहिषीं श्रियमाश्रयामः ॥

साम्प्रतमहं किञ्चिद्विवक्षुः स्वतन्त्रेऽस्मिन् भारते प्राचीनतमशास्त्रैकतन्त्रां पक्षपातकालुष्यासंस्पृष्टां बुद्धिमवलम्ब्य तत्रभवतां पुरस्तादेकं विषयमुपस्थापयितुमिच्छामि । इमां पद्धतिमाश्रित्य यदि विपश्चितः स्वकं ज्ञानं परत्र संक्रमयितुं प्रयतिष्यन्ते तर्हि भूयान्नाम महानुपकारः सन्मार्गमार्गणे बद्धपरिकराणां नराणाम् । "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥" [भगवद्गीता ३।२६] इति, "यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परावरज्ञा विदितवेदितव्या अधिगतयाथातथ्याः । ते तत्रभवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे कर्मणि पुनर्नापभाषन्ते । तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः" [महाभाष्ये १।१।१ वार्त्तिकं ९] इत्यादिवचनचयमनुरुध्य त्वया वर्तितव्यमिति मम केचन सुहृदो मामन्वरुन्धन्—यत्त्वं प्रचलितां सरणिं मा दूदुष इति ।

तान् प्रत्येतावदेवाहं वच्मि–भगवन्तः, नाहं कर्मणि प्रवृत्तान् मनुजान् कर्मपथात् प्रच्यावयितुं वाञ्छामि किन्तु कर्ममार्गे पतितान् लोष्टानपसार्य गमनिकां तथा शोधयामि यथा सौकर्येण साधारणोऽपि जनो गन्तुं प्रभवेत् । मा भूवन्नाम बाधास्तेषां निःशङ्कप्रयाणे ।

बहुषु स्मृतिग्रन्थेषु पुराणेषु च किमुत वाल्मीकीयरामायणेऽपि प्रभूतानि वचनानि प्रक्षिप्तानि दृश्यन्ते । तान्यवलम्ब्यास्माकं सनातने वैदिके मार्गे बहवो व्यवहाराः पश्चादाकर्षन्ति प्रगतिशीलानपि मानवान् । तादृशान्धपरम्परापतिताः प्रभूताः प्राणिनो ज्ञात्वापि तथ्यं चिरादभ्यस्तां पद्धतिं हातुं नोत्सहन्ते ।

अहमपि क्वचिदंशे तथाभूतोऽस्मि । परं भाविनीवंशपरम्परास्तादृशे गर्ते मा पप्तदिति मनसि निधाय तत्त्वान्वेषिणो जनानभ्यर्थये–विपश्चितो भवन्तु भवन्तः सावधानाः, जानन्तु प्राचीनान् प्रक्षिप्तांशान् स्वकीयेषु ग्रन्थरत्नेषु ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र प्रथमम्—"शूद्राणामनिरवसितानाम्" [२।४।१०] इति सूत्रभाष्यमवलम्ब्य तत्त्वं प्रदर्शयामि। तत्र हि भाष्ये—"अनिरवसितानामित्युच्यते, कुतोऽनिरवसितानाम्? आर्यावर्तादनिरवसितानाम्। कः पुनरार्यावर्तः? प्रागादर्शात्, प्रत्यक्कालकवनात्, दक्षिणेन हिमवन्तम्, उत्तरेण पारियात्रम्। यद्येवं किष्किन्धगान्धिकम्, शकयवनम्, शौर्यक्रौञ्चमिति न सिद्धयति। एवं तर्ह्यार्यनिवासादनिरवसितानाम्। कः पुनरार्यनिवासः? ग्रामो घोषो नगरं संवाह इति। एवमपि य एते महान्तः संस्त्यायास्तेष्वभ्यन्तराश्चण्डाला मृतपाश्च वसन्ति, तत्र चण्डालमृतपा इति न सिद्धयति। एवं तर्हि याज्ञात् कर्मणोऽनिरवसितानाम्। एवमपि तक्षायस्कारम्, रजकतन्तुवायमिति न सिद्धयति। एवं तर्हि पात्रादनिरवसितानाम्। यैर्भुक्ते पात्रं संस्कारेणापि न शुद्धयति ते निरवसिताः। यैर्भुक्ते पात्रं संस्कारेण शुद्धयति तेऽनिरवसिताः" इति। अत्र प्रदीपः—"आदर्शादयः पर्वतविशेषाः।····यद्येवमिति। एतेषामार्यावर्ताद्बाह्यत्वादिति भावः। ग्राम इति। एतेष्वार्या निवसन्तीति भावः। तत्र ग्रामः प्रसिद्धः। घोषो गोमहिष्यादिनिवासः। संवाहो वणिक्प्रधानः। संस्त्याया इति। निवासविशेषा इत्यर्थः। मृतपा डोम्बा इत्याहुः" इति। उद्योतः—"श्मशाननिकटे ये वसन्ति मृतवस्त्रचितिकाष्ठादिसंग्राहकाश्चण्डालसदृशास्ते 'डोम्बा' इत्युच्यन्ते" इति। प्रदीपः—"याज्ञादिति। शूद्राणां पञ्चयज्ञानुष्ठानेऽधिकारोऽस्तीति भावः" इति। उद्योतः—"तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति श्रुतेः शूद्राणां यज्ञकर्मणोऽबहिष्कृतत्वं विरुद्धमित्यत आह—शूद्राणामिति। पूर्वोक्तश्रुतिस्त्वग्निहोत्रादिविषयेति भावः" इति। प्रदीपः—"तक्षायस्कारमिति। तक्षादीनां यज्ञेऽधिकाराभावादिति भावः" इति। उद्योतः—"तक्षादीनामिति। तेषां प्रतिलोमत्वादिति भावः। शूद्रशब्दोऽत्र सूत्रे त्रैवर्णिकेतरपर इति बोध्यम्" इति। प्रदीपः—"संस्कारेणेति। यः संस्कारः स्मृतिकारैर्द्रव्यशुद्धौ पठितस्तेनैव न तदधिकेनेत्यर्थः" इति। उद्योतः—"स्मृतिकारैरिति। 'भस्मना शुद्धयते कांस्यम्' इत्यादि" इति।

अत्रायं निष्कृष्टोऽर्थः—अत्र भाष्ये आर्यावर्तादनिरवसितानामित्युक्त्या, 'शकयवनम्' इति न सिद्धयतीत्युक्त्या च पतञ्जलिकाले शका यवना वाऽऽर्यावर्ते नासन्निति गम्यते। यद्यपि "अरुणद्यवनः साकेतम्, अरुणद्यवनो मध्यमिकाम्" इत्यादिप्रयोगदर्शनाद् यवनानां सत्ताऽऽर्यावर्ते समुपलभ्यते, तथाप्येतावता तेषामभियोगमात्रस्यैव सिद्धयाऽऽग्लानामिवात्राऽऽर्यावर्ते निवासस्यासिद्धत्वात्।

परमधस्ताद्भाष्ये ग्रामे नगरे घोषे संवाहे वा त आसन्नित्यस्य कोऽर्थः? यद्यार्यावर्तान्तर्गतग्रामादिषु त आसन्नित्यर्थोऽभिप्रेयते तर्हि कथं त आर्यावर्तान्तर्गतग्रामवासिनः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सन्तोऽप्यार्यावर्ताद् बहिष्कृता भवेयुः । तस्मादार्यावर्तबहिर्भूतग्रामादिषु त आसन्; तत्र चार्या अप्यासन्निति च गम्यते । एवं सति—महत्सु पत्तनेषु चण्डालमृतपादीनामपि सत्त्वात् 'चण्डालमृतपाः' इत्यत्रैकवद्भावप्राप्तौ याज्ञात् कर्मणोऽनिरवसितानामिति तदर्थस्वीकारे चण्डालमृतपानां तत्राधिकाराभावाच्छकयवनस्य तु याज्ञे कर्मण्यधिकारो दृढीक्रियते । अस्यां स्थितौ—तक्षायस्कारादीनां महाभाष्योक्तानां याज्ञे कर्मणि नाधिकार इति त्वायाति । तथा सति पतञ्जलिकाले शकयवनादयस्तक्षायस्कारतो रजकतन्तुवायतश्च श्रेष्ठा आसन्निति सिद्धयति ।

तत्र तक्षा वर्धकिः 'बढ़ई' इति ख्यातः । स च तक्षा द्विविधोऽमरकोशरीत्याऽऽयाति । तथा हि—यो हि ग्रामाधीनः स हि न स्वतन्त्रः स ग्रामतक्ष इत्युच्यते । यश्च कुट्यां भवः स्वतन्त्रो न तु पराधीनः स कौटतक्ष इत्युच्यते ।

यद्यप्यमरकोशे—"तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट्" इत्यादिना रथकारोऽपि तक्षपर्य्यायेष्वपि गणितस्तथापि वक्ष्यमाणस्मृतिप्रामाण्यादमरमतेन च रथकारस्यानुलोमसंकरत्वात् प्रतिलोमसंकरतक्षभिन्नत्वमपि सिद्धयति । "रथकारस्तु माहिष्यात्करण्यां यस्य संभवः" इत्यमरकोशप्रामाण्याच्च रथकारोऽनुलोमसंकरोऽप्यायाति । एवं स्थितौ रथकारो द्विविधः—एकस्तक्षपर्यायः, अपरस्त्वनुलोमसंकरजातीयः । द्विविधोऽप्यमरकोशे परिगणितः । शूद्रशब्दोऽत्र त्रैवर्णिकेतरपर इत्युद्योतोक्त्या तु सर्वेषामपि संकराणां द्वन्द्व एकवत् स्यात् । सैव पद्धतिरमरकोशेऽप्याहता । अत एवाम्बष्ठादयः शूद्रवर्ग एव परिगणिताः ।

युक्तं चैतत्प्रतीयते, यतो हि क्षत्रिया अपि शकयवनादयो भाष्यकारेण शूद्रत्वेनैव व्यवहृताः । तदानीं त आचारविहीनत्वाद्ब्राह्मणानामदर्शनेनातिक्रमणेन वा शूद्राः संपन्नाः ।

अपि च—"आयोगवस्तु शूद्रेण वैश्यायां तु भवेच्च सः । तक्षा स्थपतिरित्युक्तो राज्ञां वेश्मकरः सदा ॥ दारुतक्षकस्तक्षा, पाषाणभेदकः स्थपतिरिति द्वावप्येतद्भेदौ" इति शूद्रकमलाकरोद्धृतस्मृतिप्रामाण्यात् प्रतिलोमजस्तक्षेति सिद्धयति । एवं च रथकारो द्विविधः—एकस्तक्षपर्यायः, अपरस्तु क्षत्राद् वैश्यायां माहिष्यः; वैश्याच्छूद्रायां करणी तस्यां माहिष्यादुत्पन्नः । तथा च याज्ञवल्क्यः—"माहिष्येण करण्यां तु रथकारः प्रजायते" इति । अस्य वृत्तीराह वसिष्ठः—"रथकारस्य विधिज्ञानं हस्त्यश्वसारथ्यवर्धनपोषणदमनादि" इति । शङ्खः—"क्षत्रियवैश्यानुलोमानन्तोत्पन्नजो रथकारस्तस्याध्ययनेज्यादानोपनयनसंस्कारा अनिषिद्धा । रथसूत्रवास्तुविद्याध्ययनवृत्तिता च" इति । अयमेव रथकारोऽनुलोमजः । अस्यैव रथकारस्याग्न्याधानादिकं शास्त्रेषु प्रतिपादितमस्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अयस्कारोऽप्यनेकविधः शूद्रकमलाकरे स्मृतिप्रामाण्याद्व्यवस्थापितोऽस्ति । तथा हि—एको लोहकार आयोगवः । यो हि शूद्राद्वैश्यायामुत्पन्नः प्रतिलोमसंकरः "शूद्रादायोगवं वैश्या जनयामास वै सुतम्" इत्यादिना याज्ञवल्क्येनोक्तः । अस्य लोहकारत्वम्—"आयोगवानां ताम्रायस्त्रपुसीसकायुधकरणम्, योजनम्, नगरकरणं च" इति वसिष्ठस्मृत्वा प्रतिपाद्यते ।

यद्यप्येको लोहकारो मागध्यां क्षत्रियाज्जातोऽनुलोमसंकरः—"यो मागधीक्षत्रिययोर्जात उल्मुकसंज्ञकः । स लोहकर्मणा जीवेत्" इति कल्पतरुधृतहारीतस्मृत्या प्रतीयते, तथापि सोऽपि नहि शुद्धोऽनुलोमः, वैश्यात् क्षत्रियायामुत्पन्नायां प्रतिलोमजायां मागध्यां जातत्वात् । तथा च कल्पतरौ हारीतः—

क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च ।
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ।। इति ।

अपरोऽप्यस्त्रकारो लोहकारो वा कुक्कुटसंज्ञः । तथा चोक्तमादिपुराणे—

निषाद्यामथ शूद्रेण कुक्कुटः स्यात् करोति सः ।
चक्रतोमरशूलासिलक्कुटप्रासतोमरान् ।।
चक्राणि शस्त्रनालानि भिण्डिपालांश्च भूभुजाम् ।
कुक्कुटानां प्रहर्ता च राजकुक्कुटखेलनः ।। इति ।

एवं सति लोहकारश्चतुर्विधः—मागध्यां क्षत्रियादुत्पन्न उल्मुकसंज्ञ एकः । वैश्यायां शूद्रादायोगवो[1] द्वितीयः । ब्राह्मण्यां वैश्याद् वैदेहकस्तृतीयः[2] । निषाद्यां शूद्रेण कुक्कुटश्चतुर्थः । एतस्य कुक्कुटस्य विषये शूद्रकमलाकरोद्धृतजातिविवेके—

---

१ वैश्यस्त्रीशूद्रसंयोगादायोगवकसंज्ञकः । स शूद्राद्धीयते धर्मैः पाषाणेष्टककर्मकृत् ॥ स कुर्यात्कुट्टिमां भूमिं चूर्णेनास्य च जीवनम् ॥ शूद्रकमलाकरे मनुः—मत्स्यघातो निषादानां तष्टिरायोगवस्य च ॥ तष्टिर्दारुतक्षणं वर्धकिरित्यर्थः । तत्रैवोशनसा तु—"नृपायां वैश्यसंसर्गादायोगव इति स्मृतः । तन्तुवाया भवन्त्येते वसुकांस्योपजीविनः ॥ शीलिकाः केचिदत्रैव जीवनं वस्त्रनिर्मितम् ॥" इत्युक्तम् ।

२ शङ्खस्मृतौ वैदेहकानां वस्त्रच्छेदनसीवनरञ्जनावनिर्णेजनवापीतडागोदकपानारामावकरसंशोधनानि कर्माणि । कुक्कुटानां प्रहरणचक्रतोमरभिण्डिपालप्रासासिपरशुलगुडलोहजालिकासंधानानि । आयोगवानामयस्करणतक्षणकुम्भकरणानि, सुवर्णरजतलोहासिचर्मवृत्तिता च । अत्रैकस्य नानाकर्मणां विकल्पः समुच्चयो वेति शूद्रकमलाकरे ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निषादकन्यका शूद्रसंगाद् यं जनयेत्सुतम् ।
[1]सक्रोधकः कुक्कुटक इति प्रोक्तो द्विसंज्ञकः ॥
स लोहकर्मणा जीवेदुत्तमश्चान्त्यजातितः ।
लोहकार इति ख्यातो लौहं कर्मास्य जीवनम् ॥
तेषां तु गुणसंयोगं ज्ञात्वा शास्त्रविधायकः ॥ इत्युक्तम् ।

एतेन चास्य क्रोधकसंज्ञापि लभ्यते । अस्यैव कुक्कुटस्य भार्या कुम्भकारेण संगता चेत् सा कुरुविन्दं तन्तुवायं कुविन्दं वा जनयतीति तत्रैवोक्तं शूद्रकमलाकरे—

कुक्कुटस्येह भवति कुम्भकारेण संगता ।
तस्याः सूनुस्तु विख्यातः कुरुविन्द इति स्फुटम् ॥
कौशेयानि स वस्त्राणि रचयेदात्मवृत्तये ।
तुल्योऽसावन्त्यजातीनां स्वधर्मं स तु पालयेत् ॥ इति ।

अयमेव तन्तुवायः । तत्रैव कुक्कुटानाम्—"तन्तुवायवृक्षच्छेदनरोपणानि कुक्कुटानाम्" इत्यादिना तन्तुवायकर्माप्युक्तम् । संगता वेनवनिता कैवर्तेन यदा रहः । तस्याः शाबरिकाभिख्यः पुत्रोऽसौ लोकसंमतः ॥ स हीनस्त्वन्त्यजातिभ्यः शुचिवासोविधायकः । कुविन्द आभीरीकुक्कुटाभ्यां यो जातः । आभीरीकुक्कुटाभ्यां यो जातः सोखिरसंज्ञकः । स कुर्यात्तु सरीणां हि वासांसि स्वात्मवृत्तये ॥ एवं सति तन्तुवायः पञ्चविधः-तत्र प्रथमः कुक्कुटभार्यायां कुम्भकारादुत्पन्नः । द्वितीयस्तु कुक्कुटः[2] । तृतीयो वेनभार्यायां कैवर्तादुत्पन्नः शाबरिकाभिधः । चतुर्थस्त्वाभीर्यां कुक्कुटाज्जातः । पञ्चमस्तु नृपायां वैश्यसंसर्गेणायोगवः शूद्राद्वैश्यायामुत्पन्नादायोगवाद्भिन्नः ।

रजकस्तु त्रिविधः—तत्र प्रथमः [3]पारसव्यामुग्रादुत्पन्नः । द्वितीयस्तु वैदेह्यामुग्रादुत्पन्नो मञ्जूषाभिधो रजकः । तृतीयस्तु वैदेहकः । वैदेहकानां वस्त्रनिर्णेजनमपि प्रागुक्तम् । एताव-

---

१ "टङ्कशालासु सर्वासु नायकानां विधायकः" इति च पाठः संकीर्णप्रकरणे तत्रैव ।

२ "पुल्कसः कुक्कुटो वेनस्त्रय आरण्यवासिनः" इति संकीर्णप्रकरणे शूद्रकमलाकर उक्तम् । अयमेव कुक्कुटो राँचीप्रान्ते 'लोहरा'-पदेनोच्यते । अस्य जलं न गृह्यते तत्रत्यैः ।

३ उग्रात् पारसवीपुत्रो मौकलिस्तैलिको भुवि । रजको वर्णतो हीनः प्रथमश्चान्त्यजेषु सः ॥ वस्त्रनिर्णेजनं कुर्यादात्मवृत्त्यर्थमेव च । उग्रजातं तु वैदेह्यां मञ्जूषं रजकं विदुः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्पर्यन्तं तक्षायस्कारस्य रजकतन्तुवायस्य च विचारः कृतः। शूद्रकमलाकरेऽनया रीत्या संगृह्य जातिभेदो जन्मना तासां च स्वभावानुकूल्येन कर्मभेदोऽपि साधु प्रतिपादितोऽस्ति।

"ये यजामहे" इति श्रुतिरपि भगवती जन्मनैव जातिमुद्घोषयति, अन्यथा कर्मप्रयुक्त-जातिभेदस्वीकारे कर्मणः प्रत्यक्षत्वात् तत्प्रयुक्तजातेरपि प्रत्यक्षत्वे शङ्कालेशाभावात् "ये यजा-महे" इति श्रुतेरविषयत्वापत्तिः।

एतत्प्रसङ्गेनाहं किञ्चित्कटुसत्यं ब्रवीमि। याज्ञवल्क्यस्मृतौ—"जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा। व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तमम्॥" इत्युक्तम्। अस्यायमर्थः—जात्यु-त्कर्ष उत्कृष्टजातिप्राप्तिः। सप्तमे, अपिशब्दात् षष्ठे पञ्चमे वा ज्ञेयः। अर्थाद् विप्रोढा शूद्रा कन्यां सूते सापि तदूढाऽन्यामिति सप्तमं विप्रं सूते। एवं विप्रोढवैश्याजन्या षष्ठं विप्रम्। विप्रोढ-क्षत्रियाजन्या पञ्चमं विप्रम्। क्षत्रियाच्छूद्रोत्पन्ना षष्ठं क्षत्रियम्। वैश्यजा पञ्चमं वैश्यमिति पूर्वार्धार्थः। एवं विप्रस्य क्षात्रवृत्त्याऽपत्यपरम्परयाऽनापदि जीवने पञ्चमः क्षत्रियः। वैश्यवृत्तिजीवने षष्ठो वैश्यः। शूद्रवृत्तौ षष्ठः शूद्रः। वैश्यस्य शूद्रवृत्तौ पञ्चमः शूद्र इति। एतत्सर्वमनापदि, स्मृत्यन्तरप्रामाण्यात्।

अस्यां स्थितौ वहवो ब्राह्मणब्रुवा अधुनाऽऽत्मानं ब्राह्मणं मन्यमाना बह्वीभिर्वंशपरम्पराभि-र्गर्हितवृत्त्या जीवन्तो राजशासनाभावाद् वास्तविकब्राह्मणानामुपेक्षया च धनेन कुलं मन्य-मानैस्तादृशपण्डितम्मन्यैः प्रत्तां सुतां प्रतिगृह्णन्तो ब्राह्मण्यप्रयोजकतपःश्रुतयोनिभिर्विशिष्टान् शिष्टानप्यधरयन्तः साम्प्रतमस्माभिरप्यगत्योपेक्ष्यन्ते। वाञ्छन्ति ते ब्राह्मणकर्तृकमभिवादनम्।

नमस्ते भगवन् कले तव महिम्ने। भवन्तु सावधानाः पण्डिताः, प्रचारयन्तु च स्वकीयां प्राचीनां पद्धतिं स्वतन्त्रेऽस्मिन् भारते। "अभयं वै जनक प्राप्तोऽसि" इति श्रुत्यंशमवलम्ब्य पापेभ्यो भीता बहिरन्तश्च समभावा भवन्तु यथार्थवादिनः।

एतादृशवचनजातै रजकास्तन्तुवायास्तक्षायस्काराश्च शकयवनतो नीचा एव प्रतीयन्ते। यवनपदेन ग्रीकदेशीया एव ग्राह्याः। ये हि—"अरुणद्यवनः साकेतम्, अरुणद्यवनो मध्यमिकाम्" इत्यादिना भगवता पतञ्जलिना निर्दिष्टाः।

तत्र यवनपदेन 'मेलिन्डरस' एवैतिहासिकैर्गृह्यते, यश्च पालिभाषायां 'मिलिन्द मिलिन्द' इति पदेनोच्यते। अपरोऽपि यवनराजो वेसनगरस्थगरुडध्वजेऽङ्कितमिश्रितपालिभाषायां लिखिते शिलालेखे समुपन्यस्तः, यस्य 'अन्तलकित'-पदेन प्रसिद्धिरासीत्। अयं हि 'अन्तलकितः' 'एन्टि-ल्किडास् दी सेकेण्ड' आसीत्। द्वितीयोऽन्तलकित इति तदर्थः। तस्यैव दूतो 'हेलियोडोरसः'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदानीं भागवतः संपन्नः, यो हि तं गरुडध्वजं प्रत्यतिष्ठिपत्। तदानीमार्याणामेतादृशी शक्तिरासीद् यत्ते वैदेशिकान् स्वात्मनि लीनानकार्षुः। ये ह्यधुना महामदीया भारते दृश्यन्ते ते नहि यवनपदव्यपदेशभाजो भवितुमर्हन्ति। तेषां यवनानामेषां च मुसलमानपदवाच्यानां स्वभाव आचारे च मेरुसर्षपयोरिव भेदसत्त्वात्। एषु प्राचुर्येणैतद्देशीयानां शूद्रकमलाकरोक्तप्रतिलोमसंकराणामेव सत्त्वात्। ये हि केचनाङ्गुल्या निर्देष्टुं शक्यन्ते ते हि कारणवशादत्रत्याः क्षत्रियादयः स्वधर्मात्प्रच्युताः सत्स्वभावाः सन्ति, तेषां मध्याद् यदि स्वयं प्रवृत्ता य आर्यधर्मे प्रवेष्टुं वाञ्छन्ति तर्ह्यवश्यं ते प्रवेशनीयाः। नाहमिदानीमेतद्विषये बुद्धिं व्यापारयितुं समीहे, गवेषणकार्यस्यैव मदीयपद्धतेर्विषयत्वात्।

यच्च शूद्रकमलाकरे "मेदस्य वनिताकायात् संगतान्म्रेण चेद्रहः॥ सा सूते यवनं पुत्रं तुरुष्कः स प्रकीर्तितः। प्रसिद्धो म्लेच्छदेशे यो गोवधेनास्य जीवनम्॥" इत्यादिना यवनस्यात्यन्तगर्हितत्वं प्रतिपादितं तत्सर्वं स्मृतिषु कारणवशात् प्रक्षिप्तमित्यवधेयम्। एतानेव महामदीयानुद्दिश्य तदंशस्य तत्र प्रक्षेपात्। एते हि नहि धर्मदृष्टिं पुरस्कृत्य प्रवर्तन्ते किन्तु तामसीं लोकविद्वेषिणीं हिंसाप्रचुरां प्रवृत्तिमाश्रयन्ते। भगवानेतेषां बुद्धिं शुद्धां विदधात्वित्येतावतैव संतुष्यते। एतादृशो विषयः सात्त्विक्या बुद्धया धृत्या च विचार्य व्यवस्थापनीयः।

योऽयं विषयः शूद्रकमलाकरादौ समुपन्यस्तोऽस्ति स हि भाष्योक्तार्थतो विपरीतः प्रतीयेत तर्ह्यवश्यं सोऽर्वाचीनो मन्तव्यः। शूद्रकमलाकरादौ समुद्धृतानि मूलवचनान्यप्यर्वाचीनान्येव स्वीकर्तव्यानि। तादृश्यः स्मृतयोऽप्यर्वाचीना एव बोद्धव्याः। प्राचीनेष्वपि पुस्तकेषु भाष्याभिमतार्थतो विपरीतोऽर्थश्चेत्तदा सोंऽशः प्रक्षिप्त एव ज्ञेयः।

एतावानुद्धृतांशो विषयस्य स्वरूपप्रदर्शनार्थमेव मया संनिवेशितः। पूर्वोक्ता युक्तयः प्रक्षिप्तांशावबोधनसाधिका अवगन्तव्याः।

अपरामपि युक्तिं प्राचीनत्वार्वाचीनत्वपरीक्षिकां प्रदर्शयामि—चिरकालादस्माकं देशे रव्यादयो वाराः परां काष्ठामासा अस्माकं कृत्येषु संनिविष्टाः सन्ति। ते च सप्त वासरा ग्रीकदेशीयजनसंसर्गादस्मद्धर्मग्रन्थेष्वपि स्थानमलभन्त। नहि ते वेदे वाल्मीकीयरामायणे ब्राह्मणभागे महाभाष्ये श्रीमद्भागवते वा कालविभागे दृश्यन्ते, नापि तद्योगायोगाभ्यां केषाञ्चित् कृत्यानां कर्तव्याकर्तव्यत्वं तेषु प्राचीनग्रन्थेषु प्रतिपादितमस्ति। नापि तेषां सप्तानां दिवसानां वैज्ञानिक्या रीत्याऽभ्युपगमो युक्तः। यतो हि कालविभागे कल्पस्य युगैः, युगस्य वर्षैः, वर्षस्यायनाभ्याम्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथनस्य ऋतुभिः, ऋतोर्मासाभ्याम्, मासस्य पक्षाभ्याम्, पक्षस्य तिथिभिर्विभागो भवति। नहि रव्यादिभिर्दिवसैः प्रचलितः कालो विभक्तुं शक्यते।

यद्यपि ज्योतिर्विदोऽहर्गणार्थं तेषां दिवसानां कल्पनां स्वानुकूलां मन्यन्ते, तथापि ते ग्रीकदेशीयज्योतिर्विद्यासंस्कारसंस्कृता अस्माकं प्राचीनतमज्योतिर्विद्यास्ववार्क्कालिकीं सप्ताह-सत्तामभ्युपागमन्। अनया पद्धत्या येषु पुराणग्रन्थेषु ज्योतिर्ग्रन्थेषु स्मृतिग्रन्थेषु वा सप्ताहघटक-रव्यादिवारप्रयुक्तो योगविशेषोऽदृष्टविशेषो वा समुद्घोष्यते ते ग्रन्थास्तद्ग्रन्थघटकास्तावन्तोंऽशा वा-र्वाचीना एव मन्तव्याः।

अन्यामेकां युक्तिं प्रक्षेपविषये प्रदर्शयामि। यथा वाल्मीकीयरामायणेऽयोध्याकाण्डे नवाधिकशततमे सर्गे—"यथा हि चौरः स तथा हि बुद्धस्तथागतं नास्तिकमत्र विद्धि। तस्माद्धि यः शक्यतमः प्रजानां स नास्तिकेनाभिमुखो बुधः स्यात्॥ ३४॥" इत्यादीनि पद्यान्युपलभ्यन्ते। तेषु पद्येषु बुद्धस्य नामोपलभ्य बहवः पाश्चात्त्या रामायणस्य बुद्धादर्वाक्काल-भावितां मन्यन्ते। परमत्र ये तत्त्वान्वेषिणस्ते तु प्राचीनानि रामायणपुस्तकान्यन्विष्य तत्र चैतादृशानि पद्यान्यनुपलभ्य प्रक्षिप्तैतादृशपद्यमूलकं रामायणस्यार्वाचीनत्वं दूषयन्ति। अयं हि वाल्मीकीयरामायणविषयो विस्तरेण श्रीसम्पूर्णानन्दाभिनन्दनग्रन्थे नागरीप्रचारिण्या सभया प्रकाशिते प्रदर्शितोऽस्तीति तत एवावसेयम्।

अपि च वाल्मीकीयरामायणे—

न मांसं राघवो भुङ्क्ते न चापि मधु सेवते।
वन्यं सुविहितं नित्यं भक्ष्यमश्नाति पञ्चमम्॥
तां तथा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम्।
निषसाद गिरिप्रस्थे सीतां मांसेन च्छन्दयन्॥
इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना।
एवमास्ते स धर्मात्मा सीतया सह राघवः॥

इत्यादीनि बहूनि वचनानि रामकर्तृकमांसभक्षणसूचकानि रामायणे समुपलभ्यन्ते तानि सर्वाणि चिरादार्येषु प्रवृत्तां मांसभक्षणपद्धतिमवलम्ब्य प्रक्षिप्तान्येव मन्तव्यानि। नहि भगवान् रामचन्द्रः—"चतुर्दश हि वर्षाणि वत्स्यामि विजने वने। मधुमूलफलैर्जीवन् हित्वा मुनिवदा-मिषम्॥" इत्यादिना व्यक्तां मांसाभक्षणप्रतिज्ञां कथमपि जह्यात्। अपि च—"ऐङ्गुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे। न्यस्य रामः सुदुःखार्तो रुदन् वचनमब्रवीत्॥ इदं भुङ्क्ष्व महाराज प्रीतो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदशना वयम् । यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥" इति पद्येनापि श्रीरामचन्द्रस्य मांसभक्षणं रामायणतो नहि सिद्धयति । यदि नाम स मांसमभक्षयिष्यत् तर्हि कथं दशरथाय पित्र इङ्गुदीफलपिण्याकमदास्यत् । न च मारीचं निघ्नता भगवता स्वकर्तृकमांसभक्षणं स्पष्टं व्यज्यत इति वाच्यम्; "एतस्य मृगरत्नस्य परार्ध्ये काञ्चनत्वचि । उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥" इत्युक्त्या चर्मार्थमेव तद्धननस्य स्पष्टतः प्रतिपादनात् । यद्यपि वनवासात्प्राङ् मांसभक्षणं सूच्यत एव, तथापि क्षत्रियत्वात् त्रेतायुगतस्तेषां मांसभक्षणस्य शिष्टैरनुमोदनात् ।

वस्ततस्त्वागमप्राधान्ये कृतयुगे नहि मांसभक्षणं विड्भक्षणमिव मनसापि विचारसहमासीत् । एतच्च मया निगमागमविवेके प्रसङ्गतः संक्षेपेणोपक्षिप्तम् । पुनरपि सत्यवसरे एतद्विषये कञ्चन प्रबन्धं पाठकानां पुरस्तादुपस्थापयिष्ये ।

रामायणटीकासु मांसभक्षणसूचकश्लोकानां व्याख्यानं स्वस्वाभिमतपद्धत्या कैश्चिद् ग्रन्थकारैः प्रदर्शितम् । तत्सर्वं तेषां पाण्डित्याजीर्णताप्रयुक्तमेव मन्तव्यम् । स्वारस्येन तथाविधार्थस्य तादृशसन्दर्भप्रणेतुरनभिमतत्वात् ।

अन्ते च प्रार्थये सहृदयान् यत्ते पक्षपातविरहिता मदीयं लेखं पठिष्यन्ति सूचयिष्यन्ति च मदीये लेखे पाटवमपाटवं वा साधुत्वमसाधुत्वं वा तर्हि सप्रमोदमादरिष्ये तदुक्तीः । व्याकरणदर्शनभूमिकापीठिकाप्रतिमानिर्माणार्थं प्रवृत्तेन मयैतादृशलेखोपस्थापनार्थं समयो न लभ्यते । नापि समीहे बुद्धिटङ्कोपयोगं कदलीस्तम्भे कर्तुमिति प्रीयतां गुरुवर्गः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कला तत्प्रयोजनं च

श्रीद्विजेन्द्रनाथमिश्रः, राजकीयसंस्कृतमहाविद्यालयः, काशी।

(सप्तमवर्षद्वितीयाङ्कतोऽनुवृत्तम्)

किं नाम कलायाः प्रयोजनमिति प्रश्नोऽयं चिरचर्चितः, जातुचिदनन्तकालं यावच्च विचारयिष्यते। "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये" इतीदृशानि पूर्वाचार्यैः प्रयोजनान्यभ्यधायिषत। "यशसे", "अर्थकृते" इति प्रयोजनद्वयमधुनापि जागर्ति। पूर्वकालापेक्षया प्रयोजनद्वयमेतदधुना समधिकसिद्धिमपि प्राप्नोति। विश्रुतः कलाविदचिराल्लक्षपतिः संपद्यते, बहुविधान् मान्योपाधीनुपलभते। स हि राजसभासु विद्वन्मण्डलीषु च समधिकां सामाजिकीं प्रतिष्ठां प्राप्नोति।

तथापि काव्यस्य कलाया वा धनमुद्देश्यमिति तु साम्प्रतिकयुगस्य नाङ्गीकरिष्यति पूरुषः। तादृशोद्देश्यं तु मुग्धसरलयुगस्य लक्षणम्। व्याकरणपरिज्ञानात् संगीताभ्यासाद्वा मोक्षावाप्तिरिति प्राचीना अमन्यन्त। जीवनस्य समेषां प्रश्नानां रहस्यप्रेक्षणक्षमा शक्तिः, सर्वान् विकासयितुं च सामर्थ्यं कलायां संगीतसाहित्ययोश्चान्तर्निहिते। कला नाम स्वतन्त्रम्, स्वयंभूः, अन्यनिरपेक्षं च जीवनदर्शनम्। इयानत्र भेदः–प्राचीनैर्मोक्षसाधनमिदमभ्यधायि, साम्प्रतिकैस्त्वात्मानुभवसाधनमेतदिति स्वीक्रियते।

इत्थं कलाप्रयोजनानि साम्प्रतं वर्ण्यन्ते—

१	Art for art's sake	कलायै कला।
२	Art for life's sake	जीवनाय कला।
३	Art as an escape	जीवनयाथार्थ्यात् पलायनाय कला।
४	Art as escape into life	विरसाद्विरम्य आनन्दाश्रयाय कला।
५	Art for service's sake	सेवायै कला।
६	Art for self realization	आत्मप्राप्तये कला।
७	Art for joy	आनन्दाय कला।
८	Art as recreation	विनोदाय कला।
९	Art as creative necessity	अदम्यसृजनवृत्तेस्तर्पणाय कला।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"व्यवहारविदे" इति कलाया आदर्शमुपस्थापयतो मनसि किमासीदिति तु न जानीमः, परं काव्यनाटकादिपरिशीलनाद् व्यवहारो ज्ञायते, चातुर्यमेधते, कौशलं च वर्द्धत इत्येतावन्मात्रं तेषां नाभिप्रेतमिति तु निश्चप्रचम्। चर्मचक्षुषा जडबुद्ध्या च हाटकीयः सांसारिको व्यवहारश्चलेत्, विज्ञानस्य साधारणप्रयोगाः क्रियेरन्; परन्तु विज्ञानजीवनयोरवगन्तुं रहस्यम्, आदर्शभूतं व्यावहारिककौशलमवाप्तुं च कलाकारस्य कलामयी दृक्, अलौकिकी प्रतिभा, वस्तुप्रसङ्गोभयतलस्पर्शिनी च भेदकता काव्यशक्त्यैव, कलावृत्त्यैव प्राप्तुं शक्यते। कथङ्कारं कलादृशा विरहितो विश्वरहस्यमवबुद्ध्येत ?

आधुनिकास्तु सरलसरलमपि वस्तु डम्बरनिर्भरभाषया लिखन्ति, यदा महतोऽपि राद्धान्तान् प्राचीनाः सरलतरैः शब्दैरुपस्थापयन्ति स्म। अत एव कविनोक्तम्—"काव्यं व्यवहारविदे" इति। यदेत्थमासीद्वक्तव्यम्—काव्यं लोकव्यवहारोद्दीपनार्थम्। व्यवहार इत्यस्य व्यवहाररहस्यदर्शनम्, तद्दर्शनस्य दैवीकरणमित्येतदस्माभियोंजनीयम्।

जीवनस्य विरसयाथार्थ्यादपसर्तुं कलेतिवादिनो नूनं कटुजीवनानुभविनस्तु भवेयुरेव, इतोऽप्यधिकं ते जीवनपराजितेष्वन्यतमाः स्युः। दुःखान्यायदारिद्र्यासौविध्यजातात् त्रस्तेनापि नाङ्गीकार्यो ननु जीवनंपराभवः। जीवनस्य प्रत्येकं घटकात् पराक्रमप्रेरणा प्राप्यते, रसनिर्झरा झरन्तीत्येतदेव जीवनस्वरूपम्। परमाकण्ठं विषयान् सेवमानस्य निरर्थकं नीरसमलसं समयं यापयतोऽपमान्यते जीवनम्। ततश्च न विन्दति शान्तिं क्वापि मनुजः। इष्यमाणमेव सदुपलभ्येत चेद्वस्तु तर्हि भारस्वरूपमेव जायेत मनुष्यजीवनम्। साधूदितं ननु कालिदासस्य दुष्यन्तेन—

औत्सुक्यमात्रमवसादयति प्रतिष्ठा क्लिश्नाति लब्धपरिपालनवृत्तिरेव। इति।

[अभि० शाकु० ५।५]

किन्तु तेनैतदुपलब्धं कलायां न वेति नोदलेखि कालिदासेन। अयत्नप्रस्तुताहारकरणम्, सेवकेभ्यो यत्किञ्चिदादेशप्रदानम्, समस्तं कालं मनोरञ्जकसाहित्याध्ययनम्, संगीताकर्णनम्, नाटकचित्रपटावलोकनम्, सभासंमेलनेषु चोपवेशनमित्येतावन्मात्रकार्यक्रमव्यापिजीवनानां कुण्ठिता भवति ननु कलाधारा, न ते कस्मिंश्चिदपि वस्तुनि रसमालभन्ते। शिष्टपर्याकुलत्वमुपदर्श्य दीर्घं निःश्वसतामेतादृशामवलोकने कारुण्यं त्रासश्चोत्पद्यते। अवश्यमेतैर्जीवनात् पलायितुं कलाऽऽश्रिता, परमिहाप्यरुचिरुन्मनस्कता च नहि तान् विजहाति; साम्प्रतं क्व गम्येत ? वस्तुतस्तु विहाय जीवनद्रोहं तैर्यथार्थजीवने प्रवेष्टव्यम्। ऋता कला तत्साहाय्यमाचरिष्यति। ईदृशां कोमलप्रकृतीनां कृते नूनमुपकरणेनापि सुकुमारेण भाव्यम्। संगीतश्रवणमुपेक्ष्य यदि ते स्वयं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गानं वादनं वा शिक्षेरन्, नृत्यप्रेक्षणं परिहृत्य नृत्यमयं व्यायाममाकुर्वीरन् तर्हि तेषां कृते कला जीवनानन्दप्रवेशिका Escape into life संपद्यते। कथं कला जीवनद्रोहिणमुद्धरेत् ?

सत्यस्वरूपा कला यथाऽऽत्मविकासं कुरुते, तथा जीवदया-करुणाप्रेरणाकृता समाजसेवा मानवस्यात्मविकासमातनुते। सिद्धे कलायाः सेवायाश्च साहचर्ये नूनमुभयोरुत्तरोत्तरं विकासः संपद्यते।। अस्माकमाचार्यैर्भक्तिसाधनतयोपयुज्य कला सेवामयी संपादिता, भोगविलासा देवमन्दिरेषु संयोज्य तन्नम्रतामावरीतुं प्रयतितम्। सोऽप्यासीत्समयो यदा कला वैयक्तिक-साधनायाः सामाजिकधर्माणां चोपकरणतयाऽमन्यन्त।

केवलं कलासाधनातः कस्याप्यात्मसाक्षात्कारः समजनीति नास्ति सुवचम्, परं साधनायाः पीठिकात्वेन शुद्धकलाया उपयोगितेत्यत्र न कोऽपि विप्रतिपत्तिं कुर्यात्। विनोदः कलायामस्त्येव, परं बाह्योऽयं लाभः। नहीमं चरमं कश्चिन्मनुते प्रयोजनम्। Art as creative necessity अर्थात् प्रत्येकं मनुष्येषु "एकोऽहं बहु स्याम्" इति वर्तमानाया बहुलीभावादम्यवृत्तेस्तोषाय गूढतसनुत्कटांश्च हार्दभावान् साकारयितुं यदा मनुष्यः प्रेर्यते तदा किं तन्मनसि प्रयोजनं जायत इति समधिका तस्य मीमांसाऽपेक्ष्यते।

यथा स्वातन्त्र्याप्तये समाजसेवायै वा केचन परिनिष्ठितब्रह्मचर्यं जीवनमङ्गीकुर्वन्ति, तथैव केचन कलाकाराः स्वाः कला एव वरित्वाऽऽत्मनः कृत्स्नं कालं तत्परिषेवणे यापयन्ति; समस्तं ध्यानम्, संपूर्णां च शक्तिमर्पयन्ति। कलानिषेवणतात्पर्यव्यतिरिक्तं ते नान्यत्किञ्चिद-पेक्षन्ते जीवनम्। मनुष्यनिहितं वीर्यमवश्यं केनापि पुरुषार्थरूपेणाभिव्यज्यत एव। केचन समस्तामात्मशक्तिं कलाभिव्यञ्जने परिणमयितुमेव बद्धकटयो दृश्यन्ते। नहि तेषां कृते कला रुचेररुचेर्वा विषयः। कश्चिद्बालकः पथि गच्छन् मन्दमन्दमुपगायति। राजपुरुषेणाक्षिप्तः स साश्चर्यं कथयति–"काहं गानं करोमि। तत् खलु स्वयमेवोद्भवति" इति। न ते कलाया निर्माणं कुर्वन्ति, कलैव तद्द्वाराऽऽत्मानमभिव्यनक्ति।

इत्थमपौरुषेया कलेति चेद्वदेम, का स्यादिहापत्तिः ? का च पुनरेतदेव Art for art's sake कलायै कला इतीत्थमुच्येत, तदेहापत्तिः स्यात् ?

परं यदा कला विषयविलासार्थं निषेव्यते, एतदेवाभिलक्ष्य यदि कश्चिच्चमत्कृतिमयं नामारचयन् विद्रुह्य सदाचारं कलायै कलेति सूत्रमुपन्यस्यति, तदापत्तिर्जायते। वस्तुतस्तु Art for art's sake इति सूत्रं Art for market's sake आपणाय कला, Art for

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

vulgarity's sake अशिष्टत्वाय कला, यद्वा Art for dissipation's sake स्वेच्छाचाराय कलेत्यर्थकारि संपद्यते ।.अत एव सूत्रेऽस्मिन्नियानंशो विरुद्ध्यते ।

एतत्तु स्पष्टम्—यावद्वैयक्तिके कौटुम्बिके सामाजिके वा जीवने संस्कारिता संयमिता च न स्तस्तावदापत्पूर्णमेव सर्वं ज्ञानं समस्तं सत्त्वं कलायाश्च जीवनम् । कलाशुद्धे रक्षणाय कलाकारैर्जीवनशुद्धौ स्वच्छतायां वाऽभिनिवेशः कार्यः । नहि जीवनशुद्धिर्जीवनात्पलायनम् । यया समृद्धमर्थमयं वीर्यवच्च संपद्यते जीवनम्, साऽत्रेष्यते । एवं हि सति Escape from life जीवनात् पलायनस्य वार्तामपि कश्चिन्न करिष्यति । ततश्च Art for life, Art through life, Art out of life जीवनकला, जीवनद्वारा कला, जीवनोद्भूता कलेति मान्यता विवेकमयी मंस्यते । निरर्थविवादश्च नोद्भविष्यति ।

निष्कामवृत्त्या यया कृतार्थतामेति जीवनम्, तथाऽऽपणवृत्तेर्धनकीर्त्यभिलाषस्यापाकरणे, दूरीकृतायामसंस्कृतोपदेशप्रणाल्याम्, धर्माचार्योपदेशकराजपुरुषयन्त्राधिपतिधनपतिभ्योऽपहस्तितायां कलायां नूनं कला स्वयमात्मानं रक्षितुं प्रभविष्यति, तदेतच्च Art for art's sake इति कथयिष्यते । कलाद्वारा जीवनव्यापी सदाचारः पोषयितुं पार्यते । तया धर्मस्य सूक्ष्मतरा वृत्तयो विकासयितुमवगन्तुं च शक्यन्ते । तथैव च सामाजिकव्यवस्थासु सहयोगसमाधानसामर्थ्यसमृद्धिसुसंगतीनां संगीतमापूरयितुं पार्यते । यदीयदायोजनं सार्वभौमिकरूपेण कलाक्षेत्रान्तर्गतमङ्गीक्रियेत तर्हि Art for art's sake इति कथने न कयाचिद् भाव्यमापत्त्या ।

लब्धसाफल्यः पक्षः सत्पक्ष इति नास्त्यद्यावधि सिद्धम् । साफल्येऽप्यन्ततः सफलः सफल इति मन्तुं शक्यते । आदर्शकलायां प्राप्यमाणश्चरम आनन्दस्तद्धेतुः । येनास्वादितश्चरम आनन्दः, सहजनैसर्गिकस्तत्कृते सदाचारः । इह प्रसङ्गे कलाया ब्रह्मानन्दसहोदर आनन्द एव कलामुख्यप्रयोजनमिति वक्तुं शक्यते । सदाचारः सामाजिकं सामर्थ्यं च तस्यावश्यम्भावि गौणफलद्वयम् (By products) । एतस्मिन्नर्थे "कलायै कला" इत्युक्ते न केनाप्यापत्तिरुत्थापनीया । न ह्युक्तसूत्रे विवादः, केवलं परिणाममेवावेक्ष्य परीक्षाऽस्माभिः करिष्यते । यदि शुद्धया कलया जीवनस्य सर्वे रसाः प्राप्येरन्, तर्हि नहि तन्निपातशङ्का जागर्ति । हानिस्तु तदा जायते, यदा रसनाम्नाऽन्यवस्तूनि वयमन्वेषयामः ।

———

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संस्कृतभाषायाः क्रमिको ह्रासः

श्रीअजयमित्रशास्त्री, राजकीयसंस्कृतमहाविद्यालयः, काशी।

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयताम्॥

[न्यायकुसुमाञ्जलावुदयनः]

कतिपयेषु पाश्चात्त्येषु प्रतीच्यशिक्षादीक्षितेषु भारतीयविपश्चित्सु च सुदृढं बद्धमूलेयं धारणा यन्मानवी जातिर्यथावसरमुन्नमन्ती परस्सहस्राब्दानां सुदीर्घं संघर्षकालमेवं च पाशविकीमवस्थामुत्तीर्य साम्प्रतिकीं संस्कृतावस्थां प्रापदिति। सामान्येनैष समयस्तैः सर्वेष्वपि विषयेषु प्रयुज्यते। आदिमो मानवो (मानवी जातिः) ऽस्पष्टध्वनिभ्योऽथ चेङ्गितेभ्यः स्वीयां दैनन्दिनीं व्यवहृतिं संपादयति स्म, अथ च कालक्रमेण पुरतो दृश्यमानविहगकुलकलकलनामनुसृत्य निसर्गत एव भाषा व्यचकासदिति ते [1]मन्यते।

एतदेव मनस्याधृत्य तेषां मतमस्ति यत्संस्कृतभाषायामपि यथासमयमनेकशः परिवर्तनानि जातानि, किञ्चास्मिन्नभ्युदये विश्वस्य प्राचीनभाषाभिरपि योगो दत्तः। एवं च संस्कृतभाषायाः साम्प्रतिकं स्वरूपं क्रमविकासस्य फलमेवेति ते मन्यन्ते।

किन्त्वद्यावध्यधिगतप्रमाणेभ्य एतस्मात् प्रतिलोम्न एवैकस्य सिद्धान्तस्य पुष्टिर्भवति। निबन्धेऽस्मिन् संस्कृतभाषायां परिलक्ष्यमाणभेदस्य प्रधानं कारणं संस्कृतभाषायाः (शब्दार्थयोः) संकोच एव, नहि क्रमविकास इति प्रमाणीकर्तुं लघु प्रयत्यते।

अतिप्राचीनकाले लौकिकवैदिकभाषयोः कश्चिदपि भेदो नासीत्[2]। जैमिनीयमीमांसायाः—"प्रयोगचोदनाभावादर्थैकत्वमविभागात् [१।३।३०] इत्यस्मिन् सूत्रे व्याख्याकारः शबरस्वामी लिखति—"य एव लौकिकाः शब्दास्त एव वैदिकास्त एवैषामर्थाः" इति। शब्दनित्यत्ववादं निरूपयन् यास्को ब्रवीति यन्नैगमशब्दानामर्था लौकिकशब्दसदृशा एवेति। तद्यथा—

---

१ द्रष्टव्यम्—तुलनात्मकं भाषाविज्ञानं डा॰ मङ्गलदेवशास्त्रिविरचितम्।
२ द्रष्टव्यः—संस्कृतव्याकरणशास्त्रस्येतिहासः प्रथमाध्यायः—युधिष्ठिरमीमांसकविरचितः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"तेषां मनुष्यवद् [1]देवताभिधानम्" [नि० ९।२] इति। वैदिकशब्दानां सार्थक्यमुपपादयन् यास्को भूयोऽप्युपर्युक्तमतमेव समर्थयति। स निर्दिशति—"अर्थवन्तः शब्दसामान्यात्" [नि० १।१६] इति। अस्यायमाशयो यद्वैदिकशब्दा लौकिकशब्दवदेवार्थवन्त इति।

कात्यायनीयवाजसनेयप्रातिशाख्यस्य व्याख्याता उव्वटोऽप्युद्घोषयति—"य एव वैदिकास्त एव लौकिकास्त एव तेषामर्थाः" [१।३] इति। नैगमशब्दानां निर्वचनसरणिमुपदर्शयता यास्केनानल्पेभ्यो लौकिकेभ्यो धातुभ्यो दमूनसक्षेत्रसाधसादिवैदिकशब्दनिष्पत्तिः, नैगमधातुभ्यश्चोष्णघृतादीनां लौकिकशब्दानां सिद्धिः प्रदर्शिता। [2]नैगमलौकिकाभ्यां धातुभ्यामुभयविधस्य शब्दस्य निष्पत्तिरुभयविधानां शब्दानामैक्यस्य सुदृढं प्रमाणमस्ति। अन्यथा लोकाप्रयुक्तधातुभ्यो निष्पन्नशब्दैर्लौकिकव्यवहारस्योपादेयता व्यर्थमभविष्यत्।

सर्वाण्यपि प्राकृतानि संस्कृतप्रभवाणीति विषये प्रायशः सर्वेऽपि विद्वांसः संमताः। अतो यदि प्राकृतेषु नैगमत्वेन मतेभ्यो धातुभ्यः प्रयोगेभ्यश्चापभ्रष्टशब्दानां प्रयोगा उपलभ्येरन् तर्हि तेषां प्राकृतोत्पत्तिकाले लौकिकभाषायां प्रयोगविषये सन्देहलेशोऽपि न संभवति। इह केवलं द्वावेव प्रयोगौ निदर्शयिष्येते—

लौकिकौ—ददाति।	वैदिकौ—दाति।	प्राकृतौ—दाई।
अस्मभ्यम्।	अस्मे।	अह्मे।

एवं चेदं सुदृढं प्रमाणं यद्धि लौकिक दिकशब्दयोरभेदमुद्घोषयति[3]।

पुरा संस्कृतभाषायाः प्रयोगक्षेत्रमपि नितान्तं व्यवस्थितमासीत्। महामुनिना यास्केनोल्लिखितम्—"शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते। ....विकारमस्यार्येषु भाषन्ते शव इति। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु" [निरु० २।२] [4]इति। अस्य पुष्ट्यै द्वे उदाहरणे प्रस्तूयेते। पारसीकभाषायां स्वसृपरपर्यायो 'हमशीरा'-शब्दः प्रयुज्यते, आंग्लभाषायां 'सिस्टर'-शब्दः। संस्कृतभाषायामनयोर्द्वे भिन्ने प्रकृती स्तः। यथासंख्यम्-समक्षीरा, स्वसृ च। पाणिनिना कानीनशब्दः कन्याशब्दस्य कनीनादेशं विधाय [5]व्युत्पादितः। पारसीकानामवेस्तानाम्नि धर्मग्रन्थे कन्यापरपर्यायस्य 'कइनीन'-शब्दस्य व्यवहार उपलभ्यते। वेदेष्वपि कनीनाशब्दस्य प्रयोगो

---

१ समन्त्रो वेदो देवताशब्देन गृह्यते–ऋग्वेदादिभाष्यभूमिका।　　२ निरुक्तम् २।२
३ शूद्रकप्रणीते मृच्छकटिक एतादृशा अनल्पाः प्रयोगाः प्राप्यन्ते।
४ पस्पशाह्निकभाष्येण तुलनीयमेतत्।　　५ 'कन्यायाः कनीन च' [४।१।११६]।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बहुशो लक्ष्यते, अतः कइनीनशब्दः कनीनाशब्दादपभ्रष्टः। एवं च कनीनप्रकृतिः कानीनशब्दो न कन्यामूलः। एवं सर्वासां भाषाणां सम्यग्वर्गीकरणेन तासां प्राचीनार्वाचीनस्वरूपयोस्तुलनात्मकाध्ययनेन च प्रतीयते यत् सर्वा अपि भाषाः संस्कृतमूला [1]एवेति। एनमेव सिद्धान्तमनुमोदयता भाष्यकृता पतञ्जलिना संस्कृतभाषायाः प्रयोगक्षेत्रं [2]सप्तद्वीपा वसुमतीत्यभिहितम्। किन्तु भूमण्डलस्य दवीयस्सु भागेषु मनुष्याणां विस्ताराद् स्थानसमयादिपारवश्याद् विपर्ययाच्च तेषाम्, संस्कृतभाषायाः ह्रासस्य संकोचस्य च युग आरब्धः।

उत्तरवर्तिभिराचार्यैरनेकेषां शब्दानां प्रयोगलोपात्तेषां तेषां शब्दानां नैगमत्वमङ्गीकृत्य तादृशप्रयुक्तशब्दास्तत्समेभ्योऽन्येभ्यो लौकिकशब्देभ्यो निष्पादिताः। कानीनशब्दस्य निदर्शनं तु प्रागेव प्रस्तुतम्। पाणिनिना लौकिकवैदिकभाषयोर्महान् भेदः स्थापितः। नैगमशब्दानां निष्पत्त्यै सर्वत्र 'छन्दसि'-शब्दस्तेन प्रायोजि। पाणिनिव्याकरणमनुसृत्याचोर्मध्ये यण्व्यवहितप्रकृत्याः साधुत्वसंपादनं न संभवति, किन्तु पाणिनिना ससंभ्रमं स्मृता व्याडिगालवादयोऽनूचाना एतादृक्प्रयोगान् साधून् मन्यन्ते। ते त्रियम्बक-त्र्यम्बक-दधियत्र-दध्यत्रसदृशानां शब्दानां साधुत्वमूरीकुर्वन्ति स्म। पुरातनसाहित्ये यण्व्यवहिता अनेके प्रयोगा अपि प्राप्यन्ते। बौधायनगृह्यसूत्रकैवल्योपनिषदोर्यथाक्रमं त्रियहे-त्रियन्नशब्दयोर्व्यवहारो दृश्यते। प्रतीयते यत् पाणिनियुगे यण्व्यवहिताः शब्दा विरलव्यवहाराः संजाताः, अतः स तेषां निष्पादनमुपादेयन्नाबोधि। किन्तु 'भूवादयो धातवः' [१।३।१] इति पाणिनीयसूत्रं परोक्षतया यण्व्यवहितप्रयोगाणां साधुत्वमुद्घोषयति। कात्यायनकाले तु यण्व्यवधानवतां प्रयोगाणां संपूर्णमदर्शनं जातम्, अतः 'तन्वं पुषेम तनुवं पुषेम'-प्रभृतीनां प्रयोगाणां साधुत्वसंपादनाय स्वतन्त्रस्यैकस्य वार्त्तिकस्य रचना तेन कृता। भाष्यकृतापि कस्यचित् प्राचीनस्याचार्यस्य वार्त्तिकमेकमुद्धृतम्—"य्वोरचि वृद्धिप्रसङ्ग इयुवौ भवतः" इति[3], एवं च य्वाभ्यामादेशाभ्यां वैयाकरणः सौवश्व इत्यादिप्रयोगाणां सिद्धिर्भवति। एतदपि तमेवोक्तसिद्धान्तमनुमोदयति। पाणिनिपूर्ववर्ती आपिशलिर्न्यङ्कुशब्दाद् विकारेऽञ् प्रत्ययं संयोज्य न्याङ्कवमिति निष्पादयति, पाणिनिस्त्वैचमागमय्य नैयङ्कवमिति साधयति। प्राङ्निर्दिष्टनियमं मनस्याधृत्य विचारणे यण्व्यवधानाव्यवधानवतोर्द्वयोर्भिन्नयोर्मूलयोरनुमानं जायते। पाणिन्युत्तरवर्तिनां कवीनां कृतिष्वप्येतादृशाः प्रयोगा उपलभ्यन्ते[4]।

---

१ रघुनन्दनशर्मप्रणीताया वैदिकसम्पत्तेर्भाषाविज्ञानप्रकरणम्।
२ महाभाष्ये पस्पशाह्निके।
३ महाभाष्यम् १।४।२
४ कुमारसम्भवम् ३।४४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निघण्टुव्याख्यायां यास्केन 'त्रयाणि' इति प्रयुक्तम्[1]। दयानन्दस्वामिनाप्यस्य प्रयोगः कृतः[2]। पाणिनीयव्याकरणानुसारं त्वयं प्रयोगोऽसाधुरेव। वस्तुतस्त्रिसंख्यावाचिनौ त्रित्रयेति द्वौ भिन्नौ शब्दौ प्राचीनानामभिमतौ। वेदेष्वप्यनयोः प्रयोगा बहुत्र उपलभ्यन्ते। लोके त्रिशब्दस्य षष्ठीबहुवचने त्रयाणामिति प्रयुज्यते। अत एव पाणिनिः 'त्रेस्त्रयः' [७।१।५३] इति त्रयादेशविधानं कर्तुं वाध्योऽभवत्। वेदेषु त्रयाणां त्रीणामित्युभयोरपि शब्दयोर्बहुलः प्रयोगोऽस्ति। पालिसाहित्येऽपि त्रीणामित्यस्य विशदः प्रयोगः परिलक्ष्यते। अतोऽस्माभिर्निर्धार्यते यल्लोके पाणिनिकाले षष्ठयतिरिक्तविभक्तिषु त्रयशब्दस्य प्रयोगो लुप्त इति।

पाणिनिना 'लोहितादिडाज्भ्यः क्यष्' [३।१।१३] इति लोहितादिगणाधीतशब्देभ्यः क्यषं विधाय वैकल्पिकमात्मनेपदं विहितम्, येन तेषामुभयपदिनः प्रयोगा निष्पद्यन्ते। वार्त्तिककृता त्वलोहितानां गणाधीतानां परस्मैपदप्रयोगमदृष्ट्वा तेभ्यः परस्मैपदवारणाय 'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि' इति वार्त्तिकं प्रणिन्ये।

भाष्यकृता बहुत्राऽविरविकन्यायः प्रयुक्तः, अथ चावेर्मांसमिति विग्रहेऽविकशब्दादेव ताद्धित उत्पादितः[3]। किन्तु परवर्तिकालेऽविशब्दस्यैव व्यवहारेऽवशिष्टत्वात् साम्प्रतं वैयाकरणैरविशब्दादेव ताद्धित उत्पाद्यते नाविकशब्दात्। वेदेषु स्त्रियामविकाशब्दस्य प्रयोगोऽनेकत्रोपलभ्यते, अतो निश्चप्रचमेव पुंस्यविकशब्द आसीदित्यत्र न सन्देहलेशः।

तृजकाभ्यां षष्ठयन्तस्य समासः पाणिनिना निषिद्धः[4], किन्तु स्वयमेव स उक्तं निषिद्धसमासं प्रयुनक्ति—'जनिकर्तुः प्रकृतिः' [१।४।३०], 'तत्प्रयोजको हेतुश्च' [१.४।५५] इति। अनुमीयते यत् पाणिनिसमये तृजकाभ्यां षष्ठीसमासव्यवहारो विरलप्रयोगोऽभवत्। भाष्यकारो निर्दिशति—"नैकं प्रयोजनं (विशिष्टं) योगारम्भं (सामान्ययोगारम्भम्) प्रयोजयति" इति।

पाणिनीयव्याकरणानुसारं वधधातोः प्रयोग आशीर्लिङ्लुङोः क्वुन्प्रत्ययेन सहैव च भवति, नान्यत्र। महाभाष्यकृताऽपि स्वतन्त्रस्य वधधातोर्विद्यमानताऽस्वीकृता। किन्तु वैशेषिके 'वधति, वध्यन्ते' इति प्रयोगौ दृश्येते। काशिकाकारस्तु—"वधिः प्रकृत्यन्तरं व्यञ्जनान्तोऽस्ति"

---

१ धामानि त्रयाणि भवन्ति—स्थानानि नामानि जन्मानीति [निरु० ९।२८]।

२ ब्रह्मणो नामानि त्रयाणि [उणादिकोषः १।१३९]।

३ महाभाष्यम् [४।१।८८]।

४ 'तृजकाभ्यां कर्तरि' [२।२।१५] इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[काशि० ७।३।३५] इत्युक्त्या स्वतन्त्रस्य वधधातोः सत्तामङ्गीकरोति । एवं च सर्वलकारेषु व्यवह्रियमाणस्य स्वतन्त्रस्य वधधातोः सत्ता निर्विवादैव ।

'पतिः समास एव' [१।४।८] इति समास एव पतिशब्दस्य घिसंज्ञा पाणिनेरभिमता, किन्त्वसमासेऽपि घिसंज्ञकस्य पतिशब्दस्य प्रयोगो दृश्यते । यथा—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ इति ।

अपि च, द्वित्ववाचिनो द्विशब्दस्य नित्यं द्विवचनता वैयाकरणानामभिमता । किन्तु द्विद्वयेति द्वे भिन्ने प्रकृती द्वित्ववाचिन्यावास्ताम् । किञ्च, बहुवचनेऽपि द्वयशब्दस्य प्रयोग उपलभ्यते । दीक्षितेन शब्दकौस्तुभ उक्तम्—"चाक्रवर्मणा द्वयशब्दस्य सर्वनामत्वम् (अङ्गीकृतम्), न पाणिनीयाध्येतृभिः" इति । एतस्योदाहरणमपि दृश्यते—"व्यथां द्वयेषामपि मेदिनीभृताम्" इति । एवं द्विद्वयेति द्वे भिन्ने प्रकृती आस्तामुभयोश्च सर्वनामत्वमप्यङ्गीकृतमेवासीत् । किन्तु पाणिनीयकाले द्वयशब्दो विरलव्यवहारो जातः ।

समासे उत्तरपदाद् [1]राजन्शब्दाट्टच्प्रत्यये सति तस्य नकारान्तप्रयोगः पाणिनिव्याकरणानुसारमसाधुरेव । किन्त्वेतादृशा अनेके प्रयोगा वाल्मीकीये रामायण उपलभ्यन्ते । यथा—"युवराजानम्" [अयो० का० २।२] इति । भासीयनाटकेषु महाभारते चोत्तरपदराजन्शब्दस्य नकारान्तप्रयोगाणां [2]बाहुल्यमुपलभ्यते ।

प्रदीपकृता कैयटेन स्थापितम्—"यस्य प्रयोगो नोपलभ्यते तल्लक्षणानुसारेण संस्कर्तव्यम्" [महाभा० २।४।३४] इति । एतेन प्रतीयते यदनेकेषां पाणिनीयप्रयोगाणामपि व्याख्याकारसमये व्यवहारलोपो जातः, येन विदुषामपि साधुत्वासाधुत्वभ्रमोऽभवत् । देवबोधो महाभारतव्याख्याप्रस्तावनायां निरदिशत्—

न दृष्ट इति वैयासे शब्दे मा संशयं कृथाः ।
अज्ञैरज्ञातमित्येवं पदं नहि न विद्यते ॥ इति ।

वाल्मीकीये रामायणे त्वनल्पा अपाणिनीया अथ च वैदिकाः प्रयोगा लक्ष्यन्ते । इतरशब्दस्य चतुर्थ्यामितरायेति[3] सर्वनामकार्याभावः, [4]"स्मरताम्" इत्यडागमाभावः, [5]"उष्य"

---

१ 'राजाहःसखिभ्यष्टच्' [५।४।९१] इति ।
२ युधिष्ठिरमीमांसककृतः संस्कृतव्याकरणशास्त्रस्येतिहासः ।
३ अयो० का० ४।७
४ अयो० का० १।३
५ अयो० का० १५।३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यत्रासमासेऽपि ल्यप्प्रभृतीनि बहुलान्यपाणिनीयानि कार्याणि दृश्यन्ते। बहवोऽपाणिनीयाः सन्धयोऽपि तत्रोपलभ्यन्ते । यथा—[1]"दिवोल्काः" (दिवः=उल्काः) इत्यत्राद्गुणः, [2]"राघवोज्ज्वलितः" (राघवः = उज्ज्वलितः) इत्यत्राप्याद्गुणः । 'न लोकाव्यय०' [अष्टा० २।३।६९] इति सत्यपि निषेधे [3]"तव शुश्रूषमाणस्य" इत्यादयो कारकप्रयोगा अप्यपाणिनीया एव।

निरुक्तकृता यास्केनोल्लिखितम्—"अथाप्यस्यां (गवि) ताद्धितेन कृत्स्नवन्निगमा भवन्ति" [निरु० २।५] इति। 'परश्च' [३।१।२] इति सूत्रव्याख्यायां भाष्यकार उपस्थापयति—"प्रकृतिरर्थाभिधानेऽप्रत्ययिका दृश्यते। क्व स देवदत्तः क्व स यज्ञदत्तो बभ्रुर्मण्डुर्लमक इति। बाभ्रव्यो माण्डव्यो लामकायन इति प्रयोक्तव्ये बभ्रुर्मण्डुर्लमक इति प्रयुज्यते" इति। अनेन ज्ञायते यद्वोसदृशानां बहूनामन्येषामप्यतद्धितानां प्रयोगस्तद्धितार्थे भवति स्म। किन्तु पतञ्जलिकाले तेषां प्रयोगोऽसभ्येष्वेवावशिष्टः। भाष्यकृता तु पाणिनीयसूत्रेष्वपि—"छन्दोवत् सूत्राणि भवन्ति"[4] इति प्रतिपाद्यापाणिनीयानि कार्याणि विहितानि। अपरत्र च छन्दसीत्यनिर्देशेऽपि पतञ्जलिना तदीययुगेऽनुपयुक्तधातूनां शब्दानां च छान्दसत्वमुद्घोषितम्—'इन्धिभवतिभ्यां च' [महाभा० १।२।६] इत्यादौ[5]।

पाणिनिपूर्वकालिकयोरापिशलिशाकटायनयोर्धातुपाठयोर्बहूनां पाणिनीयधातुपाठानधीतानां धातूनां पाठो दृश्यते। क्षीरतरङ्गिण्यां कतिपयानां पशूनां ध्वनिभ्यो धातून् प्रदिश्य क्षीरस्वामिनोक्तम्—"कियद् व्याचक्ष्महे वयम्[6]" इति। निश्चप्रचमेव पुरा समेषामपि पशूनां ध्वनिभ्यः स्वतन्त्रा धातव आसन्, किन्तु तानद्य वयं न विद्मः।

एवं चोक्तप्रकारेण संस्कृतभाषायां ह्रासस्य संकोचस्य च सर्वतोमुखी प्रवृत्तिर्लक्ष्यते। प्रवृत्तिरियं न केवलं शब्दप्रयोग एवापि तु शब्दार्थयोरपि लक्ष्यते। कोपक्रोधयोरर्थे भेदः पाणिनेरभिमतः। एतत्स्वीकार एव च—'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' [१।४।३७] इति सूत्रे पृथक्पठितयोः कोपक्रोधशब्दयोरर्थवत्ता सिद्ध्यति, अन्यथैकस्यार्थस्य व्यञ्जनाय पदद्वयस्य प्रयोगः कथमुपयुज्येत। किन्त्वमर उभयोः पर्यायवाचित्वं स्थापयति।

---

१ अयो० का० ४।१७।
२ अयो० का० १६।२१।
३ अयो० का० १२।३६।
४ महाभाष्ये १।१।१।
५ आदिपदेन ६।४।१२७–१२८ इत्यादीनि।
६ क्षीरतरङ्गिणी भ्वादिगणः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रवृत्तिरियं न केवलं शब्दप्रयोग एव, अपि त्वनेकेषु क्षेत्रेष्वस्या एव प्रवृत्तेः प्रभावो लक्ष्यते। प्राचीनेषु व्याख्याग्रन्थेषु [1]ब्राह्मणनिरुक्तादिषु शब्दानां व्याख्यानिरुक्ती अक्षरानुपूर्वीमनुरुद्ध्यैव कृते, परवर्तिषु न तथा।

इत्थं विचार्यमाणे विशदमिदं प्रतिभाति यत्संस्कृतभाषायाः क्रमिको ह्रासो जातः[2]। साम्प्रतमपि च सा ह्रसमानैव दृश्यत इति॥

---

१ निरुक्तमिदं न मौलिको ग्रन्थः, अपि तु प्राचीनस्यैकस्य निरुक्तस्य व्याख्यैवैषा—रमेशचन्द्रदत्तः।

२ चीनदेशीयेन 'हुएन्-त्सांग'-नाम्ना बौद्धयात्रिणा स्वीये यात्राविवरणे लिखितं यत् पुरा संस्कृतस्य शब्दभण्डारोऽत्यन्तं विशालकाय आसीदिति। 'वील'-कृतानुवादो द्रष्टव्यः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भारतशतकम्

श्रीमहादेवशास्त्री पाण्डेयः, हिन्दूविश्वविद्यालयसाहित्यविभागाध्यक्षः, काशी।

आलोलां कुन्तलालिं गलमनुगलितां व्यूह्य धम्मिल्ललीलां
व्याधुन्वानं सटाग्रं मृगपतिमनिशं तीव्रयन्ती महोग्रा।
मुञ्चन्ती चन्द्रहासं खलबलनिकरे सैरिभं मृद्नती द्राक्
श्रीशक्तिर्भारतेऽस्मिन्नरि नरि विजया वस्तुतः साविरस्तु ॥ १ ॥

प्रत्यक्षं निर्जराणां सकलसुरगणाध्यक्षमात्मप्रतीक्ष्यं
संतक्ष्याक्षुद्रवेगः क्षतवरुणमदः क्षीणयक्षेशदाक्ष्यः।
विंशत्यक्षः क्षणेनाभजत समुचितां शिक्ष्यतां यस्य स द्राग्
रक्षेदक्षेमहारी हरिरमरवरैरीडितः पीडितं माम् ॥ २ ॥

यस्मादेते प्रसूता विविधतनुभृतो येन जीवन्ति भूता
यस्मिन् गच्छन्ति चैक्यं समधिकगुरुता यत्र मातुः पितुश्च।
विश्वं सर्वं बिभर्ति प्रकृतिरयमथो पूरुषश्च स्वतन्त्रो
देशं तं वा परेशं सुरवरझरिणीसुन्दरं कीर्तयामः ॥ ३ ॥

आ लोलोल्लोलमालाकलकलकलिताम्भोधिकूलाल्ललामाद्
यावन्नीहारभूमीधरधवलशिलालग्नभूसंविभागान्।
सीमान्तादा च वङ्गोपसरिदधिपतिं यावदस्त्येष सस्यैः
पत्रश्यामैर्द्रुमाग्रैर्वलयितवसुधो भारतं नाम देशः ॥ ४ ॥

इष्टो दिग्भ्यस्त्रयीभ्यः सरिदधिपतिभिः पादयोर्वीचिभङ्गैः
शृङ्गैर्लोकोपरिष्टादुदयमधिगतैः संनतः शैलराजैः।
पर्यायेणोद्भवद्भी रसऋतुविभवैर्मेदुरश्रीर्मनोज्ञो
रत्नै रम्यः सुवर्णाकरनिकरयुतो भारतोऽन्वर्थसंज्ञः ॥ ५ ॥

वङ्गैः संगीतकीर्तिः कलितकलकलश्चोत्कलैरान्ध्रबन्धु-
र्मद्रैरुन्निद्रमुद्रो जवजनितजयोद्गुर्जरः सिन्धुबिन्दुः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चापैरञ्चितश्रीर्मधुमधुरधुरो मध्ययुक्तैर्विहारै-
रार्यावर्त्ताभिधानो जयति जनपदो मानिनां जन्मभूमिः ॥ ६ ॥

आद्योन्मेषाद्विधातुः प्रथमविकसितादाद्यपद्माग्रपत्रा-
दारब्धः पुण्यपुञ्जैः कलुषलवलवेनाप्यसंभिन्नगात्रैः ।
देवैरप्यात्मलाभं श्रयितुमतितरां वाञ्छिता विश्वमूर्ते-
र्निर्माणोत्कर्षसीमा परमसुषमया कापि नीराज्यते भूः ॥ ७ ॥

त्रैकोणी क्षेत्रभक्तिर्ज्ञपयति मधुरा विश्वचित्रे यमर्हं
यं संस्कुर्वन्ति रेखाः क्वचिदतिसरलाः क्वापि वामा मनोज्ञाः ।
देशानामुर्वराणां विपिननदनदीबाष्पयानादिकानां
स्थानं मानं च बोद्धुं भुवनहितविधौ बद्धकक्ष्यः स देशः ॥ ८ ॥

कृत्स्नाकूपारनीरव्रजजनितमहावृष्टिसंभारशोभः
केदाराभोगलेखाशतशतभरितासस्यसंपाददक्षः ।
वल्लीमालाललामद्रुमवलयलसन्मांसलश्यामलश्री-
र्लोकानां दर्शनीयः कृषकजनहितो भारताम्भोधरोऽयम् ॥ ९ ॥

गीर्वाणैः पुण्यपुञ्जो मधुमथनकलाकेलिनाट्यैकसद्म
क्रीडारङ्गः प्रकृत्या मणिगणनिकरैः शेवधिर्वेदवाग्भिः ।
पूर्वाभावाविशिष्टाध्ययनगुरुकुलं शिक्षयारम्भभूमिः
संस्कृत्या सुप्रसूतिः सहजसुकृतिनामेष देशो गृहीतः ॥ १० ॥

चञ्चच्चार्वाकचर्चो द्दशिविषयतया स्वीकृतान्तस्थबाह्यो
विज्ञैर्वैभाषिकाद्यैरनुमितचरमः प्राज्ञसौत्रान्तिकैश्च ।
योगाचाराभ्युपेताकृतिधृतिविलसद्विज्ञप्तिमात्रप्रपञ्चः
शून्याधिष्ठानतत्त्वोद्भवनिखिलतया मध्यसिद्धान्तसिद्धः ॥ ११ ॥

सांख्यैः संख्यातसख्यो यमनियममयो योगयोग्याङ्गसङ्गै-
र्गीतश्रीर्गौतमीयैः क्वणितकणकणः कोणकाणादवर्णैः ।
गीर्भिः कौमारिलीभिः कलितकुलकलो गौरवीमिश्रिताभिः
शान्तो वेदान्तदान्तः प्रगुणितगरिमा गीयते कोऽपि देशः ॥ १२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्याद्वादो यावनैक्ये श्रुतिपथगमनैर्मुक्तकृच्छ्रैर्निरुक्त-
स्तन्त्रस्थैर्वामिमार्गः सिततनुदयया दीयमाने स्वराज्ये ।
कौटिल्यं राजकीयैः कलितमनुकूलं देशरक्षाविधाने
यस्मिन्नृत्यन्ति भूयो विगतखलचलः स स्वतन्त्रः समस्तु ॥ १३ ॥

शुक्तीनां मुक्तिकेव त्रिदशसरिदिव स्रोतसां निर्मलानां
क्षौद्री धारेव हृद्या सरससुमनसां वज्रकाष्ठेव भूमेः ।
रश्मीनामैन्दवानाममृतविपुलतेवास्ति संभासमाना
प्राचीना दिव्यधामा दृढतममहिमा संस्कृतिर्भारतीया ॥ १४ ॥

आम्नायाम्नानयोगो द्युसदसुदृढतापत्तिसौधोपयोगो
ज्यानिक्षेपप्रयोगो निजजनधरणोद्योगदैत्याभियोगः ।
दुर्योगः क्षत्रजाते रजनिचरनृपश्रीवियोगः सुयोगो
गीताया जीवहिंसानिरसनकलुषक्रीडयोर्विप्रयोगः ॥ १५ ॥

सप्ताब्दानां शतानि प्रविकटमभितः पश्चिमातो विशद्भिः
पातिव्रत्ये सतीनां प्रहरणनिपुणैर्नैचिकीक्रव्यभक्षैः ।
विध्वंसे मन्दिराणां कटुकृतिकुशलैर्म्लेच्छलुण्टाकधूर्तैः
केनाभाग्येन दूना धरणिरियमभूत् पादघातावधूता ॥ १६ ॥

छित्रा यद्राजयोगा नियतमिह नृणां भूपभूयं विदध्यु-
स्तद्दिग्भूपालयोगाः प्रबलनिपतिता यत्तनौ दिव्यदिव्याः ।
एकैके लोकलक्ष्मीनिगडनपटवोऽखण्डहेवाकशोभाः
पूर्णस्वातन्त्र्यसिद्धौ स खलु निजकृतः संघचेष्टाविलम्बः ॥ १७ ॥

वाचालं काव्यलीलाकृतिकुशलपिकैर्गुञ्जितं शास्त्रभृङ्गै-
रङ्गैः सङ्गं विहङ्गैर्निखिलकलकलाकामिनीकेलिलोलम् ।
श्रौतीभिः संविधाभिर्व्रततिभिरखिलं मञ्जुलं शालवृन्दै-
र्वागुद्यानं सुराणामिह खलु सुलभं लोभनीयार्थसार्थैः ॥ १८ ॥

और्जी ज्योत्स्नेव शुभ्रा सहृदयहरणी माधवश्रीः स्फुटेव
प्रातःसन्ध्येव रम्या प्रतपनशमनी ब्रह्मविद्येव हृद्या ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गङ्गेवादर्शदृश्या श्रुतिरिव मधुरा मङ्गलानां पवित्रा
नाम्नां धारेव विष्णोर्जयति विजयते भारती कीर्तिरेखा ॥ १९ ॥

देवैराप्यायितश्रीरपि सुरझरिणीनिर्झराम्भःपुनीतो
नीतः शिक्षां बृहत्याः पतिभिरनुदिनं कीर्तितो लेखवृक्षैः ।
मन्दारैः पारिजातादिभिरथ सहरिः पुण्यभोग्यः सुधाच्छो
गन्धर्वैर्गीयमानो विलसति सकलो भारतस्वर्गलोकः ॥ २० ॥

यन्नीरं जीवनार्थं कथयति निखिले भूतले लभ्यते त-
न्नैदाघोन्माथरक्षाविधिरथ शुचितापादनं तत्समस्तैः ।
कीटैर्नो जातु दूष्यं क्वचिदपि निहितं बुद्धिवर्धिष्णु हृद्यं
पुण्यं तद्गाङ्गमम्भः प्रवहति धरणीं प्लावयद्भारतीयाम् ॥ २१ ॥

पारं पङ्कोद्गमानां सुहृदयमखिलाम्नायमूलागमानां
वासः पौराणवाचां निधिरयमतुलः श्रेयसां सन्मणीनाम् ।
चारित्र्यस्योच्चदीक्षा सुजनजनघनव्रातसाङ्गत्यशिक्षा
धर्मद्रोरालवालं भरतवसुमतीभूषणं तीर्थसार्थः ॥ २२ ॥

तथ्यं कथ्यं तथाहि स्वयमनिशमलं कष्टजम्बालजालं
संवित्सिद्धिं विधित्सन् पितृवनवसतेर्भृत्यतामादधानः ।
गृह्णन् सूनोः पटार्धं प्ररुदितरमणीमन्त्यसंस्कारमूल्यं
धर्मादर्शव्यवस्थां व्यरचयदतुलां भूपतिर्गीतकीर्त्तिः ॥ २३ ॥

वासो गीर्वाणवाण्या निखिलजनिजुषां मोक्षभूमिर्मृताना-
मार्यायाः सभ्यतायाः प्रथमनिषदनं मन्दिरं विश्वमूर्तेः ।
दुर्भेद्यो रागबन्धः किल सुरसरितो जन्मभूः शान्तिदेव्याः
सान्द्रानन्दाटवीयं जगति विजयते सर्वलोकैकलक्ष्म्याः ॥ २४ ॥

यद्वीर्योपज्ञमासीद्रजनिचरपतेस्त्यागसीमावदानं
यस्यारण्यान्यबोधि प्रथमकविगुरोर्येन चीर्णं चरित्रम् ।
अद्याप्यार्याभिगुप्त्यै प्रभवति सकलद्वापरोत्तीर्णकर्मा,
राज्यादर्शप्रतिष्ठाप्रभवपरिवृढः कुत्र रामावतारः ॥ २५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीरामे कृत्यशक्तिर्विपुलविलसिता लोक्यते लोकलोकै-
र्बुद्धो निध्यायतेऽद्धा धृतधिषणधृतिर्धीः समृद्धा विवृद्धैः।
ताभ्यां द्वाभ्यां श्रितात्मा नृपनयनिपुणो भारतोद्धारकर्ता
श्रीकृष्णः सर्वशक्तिः सकलनरवरः सोऽत्र पूर्णावतारः ॥ २६ ॥

श्रीकाध्यक्षं विजिग्येऽद्भुतरणनिपुणैश्चाणकामात्ययोगात्
संजह्ने युद्धयज्ञे कुसुमपुरनृपं प्राज्यसाम्राज्यकर्ता।
व्यूहे जित्वा स सेल्यूकसमयतनयां हेलनां रम्य-रम्यां
श्रीमान् वीराग्रगण्यः प्रथितगुणगणः स्मर्यतां चन्द्रगुप्तः ॥ २७ ॥

यत्साम्राज्यं वरिष्ठं शशिकरशिशिरं भारते सुप्रतिष्ठं
मूकाः स्तम्भाः सुधर्मप्रवचनपटवोऽद्यापि तिष्ठन्ति यस्य।
त्यागी यद्भिक्षुसंघोऽकृषत बहुतरान्दूरदेशान् स्वशिष्यान्
सोऽशोकः क्लिष्टशोककथितमृदुमनाः सौगतैराद्दतोऽभूत् ॥ २८ ॥

चित्रं चित्तौरदुर्गे खलयवनबलैर्वीवधारोधदूने
युध्यद्भिः क्षत्रवीरैः पुनरगमदृढैः क्षीयमाणे क्रमेण।
भीमेऽप्यन्ते प्रशान्ते पतिचरणरता पद्मिनी म्लेच्छशङ्का
दीप्तेऽग्नौ संजुहाव स्वतनुमलमसौ सार्द्धमालीसहस्रैः ॥ २९ ॥

धन्यास्ते राजपुत्रा निजविषयगुरुत्वावने लब्धदीक्षा
अल्पीयांसोऽपि धीरा यवनपरभटैः संप्रहारेऽवसज्जाः।
नित्यं योयुध्यमाना रिपुदलदलने सत्प्रतापप्रतापा
विश्वस्मिन् स्वेतिहासं कनकलिपिमयं नित्यमस्थापयंस्ते ॥ ३० ॥

योऽगौप्सीद् गाः शरण्यः खलबललुलितान्ब्राह्मणान्सम्यगावीत्
स्वारक्षीन्मन्दिराणि प्रयुतशतशिखाः पाल्यमाना अपासीत्।
आर्यक्षोणीं समाधाद् यवननृपमदं प्रव्यधावीत् समर्थो
दिल्लीमार्द्रां विडालीं व्यधित शिवविभुः सोऽस्तु भूयोऽवतीर्णः ॥३१॥

राहुग्रस्तां सुधांशोस्तनुमिव विमलां वारणेन्द्रावधूतां
रम्यामम्भोजराजीमिव वनपटलीं लङ्घितां वह्निनेव।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म्लेच्छैराक्रान्तपूर्वां प्रविततसुषमां तां महाराष्ट्रभूमिं
जित्वाऽकार्षीत्स्वतन्त्रां तरुणगणनुतौ सिंहदुर्गेश्वरस्तात् ॥३२॥

पङ्कातङ्काङ्कितात्मा निरयरयगतत्राससंजातकम्प-
श्चैतन्यानन्यभावानभिमुखहृदयः संगमे देवनद्योः ।
निर्वाति स्नानमात्राच्छ्रुतिरियममला यं विशिष्टं शिनष्टि
त्रिस्रोतः क्षीणयक्ष्मा प्रविततमहिमा सोऽस्तु भूत्यै प्रयागः ॥ ३३ ॥

चत्वारः स्तम्भभूपा शुभनिकरकरा दिक्षु विभ्राजमानाः
केदारद्वारवत्यावथ समजगतां नाथरामेश्वराह्वौ ।
यन्निष्ठं धर्मसौधं सुदृढमधिगता वैजयन्ती जयन्ती
पुण्याया आर्यजाते रिपुवशमनिता गीयतेऽनन्तकालात् ॥ ३४ ॥

पूर्णप्राचीप्रतीचीप्रचुरसुरुचिराशेषविद्यानिधानं
स्वातन्त्र्यत्यागदीक्षाविहितपरिकरो हिन्दुताप्राणभूतः ।
आर्यावर्त्तप्रकाशो हिमकरधवला मालवीयस्य कीर्त्ति-
र्धर्मस्यैको निवासः स्मरहरनगरीविश्वविद्यालयोऽयम् ॥ ३५ ॥

ग्रामान् विध्वंसय द्राग् धुनु वरनगराण्यग्निसाद्भावयस्वा-
शेषान् सांग्रामिकार्थान् रिपुकरपतितान् सेतुबन्धाँल्लुनीहि ।
स्कन्धावारार्थमेतान् विघटय विततान् क्रोशतां क्षेत्रवर्गान्
निश्शस्त्रान् भारतीयान् कुरु बत विदधे शासकः क्षोभमित्थम् ॥ ३६ ॥

प्रध्वंसो दासतायाः कथमपि निवसन्प्रागभावो विनश्यन्
सामर्थ्यस्याखिलाप्तेः समसमयभवाभावसत्ता समग्रा ।
धौरेयस्वामितायाः प्रसभनिपतितान्मित्रराज्याद्विभेदो
देशेऽस्मिन् सुस्वतन्त्रेऽनुभवपथगताः खण्डनीयाः कुतस्ते ॥ ३७ ॥

जाग्रज्जाज्वल्यमानानलपटलललज्ज्वालमालावलीढ-
व्यालोलस्फोटनिर्यज्ज्वलनकणगणादग्धपूः क्षेत्रवृक्षाः ।
छिन्नार्था रिक्तशस्त्राः परित इह वृता घोरशस्त्रास्त्रसज्जैः
प्राणांस्त्यक्त्वापि भूमिं प्रबलपरबलैर्मा मुचन् भारतीयाः ॥ ३८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भीष्यन्तां व्योमयानैर्ज्वलदनलवलद्गोलघोरावमर्दै-
र्दाह्यन्तां वह्न्यगारैरभित इह चलट्टङ्कमुख्यायुधेद्धैः ।
रुद्ध्यन्तां योधलक्षैः क्षपितपरबलैः पूर्वतः पश्चिमाद्वा
स्वातन्त्र्यं संलभेरन् निजतनुहवने पण्डिता भारतीयाः ॥ ३९ ॥

कस्मै हन्तास्ति कथ्या निजविषयभवा पारतन्त्र्यप्रसूता
संकष्टेयं दशा भो गृहनगरभवद्दाहलुण्ठाभियोगैः ।
वेत्राघातैः कशाभिर्विशसनजनितत्रासविक्षोभणाभि-
र्व्यग्रस्त्रीबालवृद्धातुरनिखिलजना कस्य पुंसो विनाश्या ॥ ४० ॥

दान्तो दाहैर्गृहाणां हरणविशसनैस्त्रासितः सर्वनाशै-
र्नीतो विक्षोभदैन्यं गगनडयनकैर्यानसाथैः पतद्भिः ।
गोलाङ्गारैर्निदग्धो विकलविलुलितो घातकैस्तैरुपायैः
स्वाधीनत्वाय मार्गं प्रतिदिनमयतेऽथापि कोऽप्यार्यदेशः ॥ ४१ ॥

पैशान्यामुग्ररूपो ग्रसति वसुमतीं भारतीयां रणाग्नि-
र्व्यादायास्यं करालं कवलयति भृशं पूर्वतोऽकालकालः ।
सर्वैं कष्टं सहन्ते प्रतिदिनमनिशं वर्द्धितैर्वस्तुमूल्यै-
रेकस्मिन्मासि गावः प्रयुतसमधिका हन्यमाना भवन्ति ॥ ४२ ॥

दूरं नीता विदेशे समरहुतवहे हूयमाना मुधैवं
सम्प्रत्यार्याः प्रवीरा निजनिजजननी रोदयन्तोऽतिलक्षाः ।
छिन्नः सौवर्णराशिर्यवननृपधरास्वाम्यपस्पर्शजातीः
संभेद्यास्तेऽद्य नीतिर्निगडितमतयो राष्ट्रभक्ता निबद्धाः ॥ ४३ ॥

दारिद्र्योद्दामदावादहनदरदलद्दानवैर्दूयमाना
दुर्वारद्वेषदुःखोदयदमनदृढद्योतनैर्दान्तदीनाः ।
दुर्दैवोद्योगदीर्णा दितदितिजदयोदन्तदूरप्रपद्या
माद्यन्मान्द्यैर्दुरीशैः प्रतिदिवसमहो हिन्दवो नाद्रियन्ते ॥ ४४ ॥

लोलूय्यन्ते ललामाः प्रतिकलमतुलान्दोलनैः शालमाला-
लीलावल्लीमतल्लीवलयवलयिताः सत्फलास्ते रसालाः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोक्यन्ते ह्यार्यलोकैः कलितविकलितैस्तत्स्थले लङ्घितानि
बार्वूराणि क्रमेलाकुलहृदयतलान्यालवालानि तानि ॥ ४५ ॥

ऊर्जाभिस्तर्जनाभिर्जयजनितजयोद्गर्जितस्फूर्जिताभि-
र्भर्जाभिर्जर्जराभिर्ज्वरजनितजराजीर्णनिर्ज्वालनाभिः ।
जङ्गालैर्ज्वालजालैरगजगदखिलं भूर्जभर्जं सृजद्भिः
खर्जूरा नैव सर्जा जितजनिमनुजा निर्जरास्तैर्विवर्ज्याः ॥ ४६ ॥

स्वातन्त्र्यं क्वापि लीनं विजयसहभवा शूरतास्तं प्रपन्ना
सोत्सेधोत्साहभूमा विलयमुपगता श्रीः समञ्चान्तमाप्ता ।
नो पुंस्त्वस्याद्य चर्चा सुचरितनिकषो मान उच्चैर्विभग्नो
भूयांसस्तानभङ्गा भरतभुवमिमां यद्भिभेत्तुं प्रवृत्ताः ॥ ४७ ॥

हंसायन्तेऽद्य काका मलिनसहयुजः केसरीयन्ति कोला
बाष्पायन्ते श्वसन्तः पुरुषतनुभृतः सर्वतो रुद्धचेष्टाः ।
साम्राज्यं वीणयन्ति प्रततबलमदोन्माथदम्भा महीशाः
क्षीरस्यन्ति प्ररुग्णा अधरचिकुरिताश्चाधुनोत्पुच्छयन्ते ॥ ४८ ॥

कोटीनां विंशती द्वे मनुजतनुभृतां पादपद्मावनम्रे
विश्यामस्यां शताब्द्यां समुचितविविधास्त्रावसज्जे कदा नु ।
स्वातन्त्र्योत्साहपूर्णे द्विगुणबलभृते स्वर्णसिंहासनस्थां
वन्दे तां देशलक्ष्मीं मृदितविलुलितद्वेषिवाहीकसैन्ये ॥ ४९ ॥

चत्वारिंशत्सदर्पाः सहजबलभृतः कोट्यो भारतीया
गङ्गौघाः प्रावृषेण्या इव लुलिततटा व्यश्नुवानाः समन्तात् ।
स्वातन्त्र्यप्राप्तिकामा निगडितचरणां मातरं मोचयन्तो
जातैक्या उत्पतेयुः किमिव परबलं वारयेत् त्यक्तदेहान् ॥ ५० ॥

दृप्यद्ध्वान्तावमग्ना प्रखररविकराक्तप्तकेदारषण्डे
श्राम्यन्त्युत्थापिताभ्रिर्धरणिनिखनने तत्परा क्षामवर्ष्मा ।
वक्रैङ्के वसन्ती विनमितपटले धूलिपूर्णे निकाय्ये
ग्रामाणां सप्तलक्षी हृतसमविभवा साम्प्रतं भारतेऽस्मिन् ॥ ५१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ग्रामाणां सप्तलक्ष्मी वसति वत निजेऽप्यास्पदे प्रोषिताऽस्मिन्
यस्मै कस्मैचिदिच्छावशात इयमभूद्दीयमाना धनाय।
स्कन्धावारार्थमेषा हृतगृहविभवोत्सार्यते नाथहीना
देशस्य प्राणभूता मृगयुवशगता गौरिव क्लिश्यतीह ॥ ५२ ॥

स्यात्कश्चित्तन्निमेषश्चतसृषु परितो दिक्ष्वपूर्वां वितन्वन्
जागर्ति संहरन्तीं सरभसमखिलांस्त्रासलोभादिदोषान्।
प्राणान्तत्यागधैर्यं निजविषयवलद्भक्तिमागूरयन्तीं
स्वातन्त्र्यप्रापणश्रीः सकलजनमतौ भावपूर्तिं दधानः ॥ ५३ ॥

ये वा के वा भवेयुः पुनरधिपतयस्त्रासयित्वात्यसह्याः
कांश्चिन्मासान् समा वा पुनरधिकमिमे नात्र देशेऽधिकुर्युः।
सद्यो भावी स्वतन्त्रः सरिसरदखिलोद्योगसंभारपूर्णो
विज्ञानोद्गीतकीर्त्तिस्तडिदतिधवलः शौर्यवीर्योर्जितात्मा ॥ ५४ ॥

कारावासप्रसोढोत्कटविकटमहायातनोग्रा भुशुण्डी-
गर्ज्जन्तीस्ताः शतघ्नीर्ज्वलनकणमुचो निर्भयं संप्रविश्य।
वामं चाधाय पादं रिपुशिरसि बलाद् बद्धहेवाकभावा
संसत्काचिद् विजेत्री भजतु निजभुजैः प्राज्यसौराज्यलक्ष्मीम् ॥५५॥

सत्यासक्तः सितात्मा कविकृतिनिपुणो वृत्तगोवर्धनश्रीः
कृत्वा चक्रं कराग्रे गतिविगतिजुषां नेत्रदानैकशक्तः।
एको यः कर्मयोगी निखिलहितविधौ बद्धकक्ष्यः श्रितेशः
सोऽव्याद्व्याजभव्यः सकलनरवरो मोहनो देशमेनम् ॥ ५६ ॥

पर्जन्यो यस्य जन्यं घृतमनलहुतं लिप्सतेऽभीष्टवृष्ट्यै
शुद्धं संमुग्धदुग्धं रचयति रुचिरां सत्त्वसम्पत्तिवृत्तिम्।
आयुर्भुक्तं समानां शतमिह तनुते प्राज्यमाज्यं प्रजानां
सानन्दं वल्गदास्तां प्रतिदिशमतुलं धैनुकं भारते तत् ॥ ५७ ॥

देवेन्द्रः पूर्वदेवैरसकृदधिजितो न प्रियोऽभूत् स्वभक्तः
कैलासो रावणेनोल्लसित इति पदे स्वेप्यतृष्णोऽखिलेशः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेपालाधीश्वरेणानिशमुदयजुषा निःसपत्नेन तुष्ट-
श्चाश्वल्यातङ्कमुक्तः पशुपतिरवतात् काठमाण्डूनिविष्टः ॥ ५८ ॥

सूर्याचन्द्रप्रकाशस्थगयदतिघनध्वान्तसच्छादितान्धे
द्यावाभूमी समग्रे विदधत उरवो मेघषण्डा अखण्डाः ।
धारासंपातवर्षास्रवदमललसद्बिन्दुभिः प्लावयन्तः
सृष्टिं नूत्नां विधातुः पुनरतुलबलाः कर्तुमेते सुसज्जाः ॥ ५९ ॥

आपः संपादयन्ती वरविमलतरा सुन्दराम्भोरुहाण्यु-
त्फुल्लानि द्योतयन्ती त्वरितगतिवहा आपगा मन्दयन्ती ।
तारातारैः प्रदीप्रं वलयितसुषमं साधयन्ती विहायो
वीरानुत्साहयन्ती लसति दिशि दिशि क्रीडनीया शरच्छ्रीः ॥ ६० ॥

गोधूमादभ्रभागाः सहजसहयुजां क्षेत्रमालाढकीनां
केदाराः सर्षपाणां यवचणकजुषाः सन्मसूराभिभाजः ।
भक्तिः सातीनकानां विलसदतसिका श्यामिकाश्यामलश्रीः
साश्चर्यैश्वर्यसीमा प्रमुदितमहिमा हैमनी भाति भूमिः ॥ ६१ ॥

श्रीपञ्चम्यां तपःश्रीस्तुहिनजडतया नाम्रपुष्पाणि सूते
न स्पन्दन्ते समीराः सुरभिततनवो नालयो यान्ति मोदम् ।
नोद्दीप्तः सूनधन्वा भुवनजयमहः कर्तुमिच्छां बिभर्त्ति
नाक्री संक्रान्तिरेषा परभृतविरुतैरर्च्यतां कस्य हेतोः ॥ ६२ ॥

अत्यन्तोत्तप्तपांसुक्षितितलमखिलं व्याकुलं कल्पयद्भि-
र्निःशेषां निःशलाकां तृषितमृगकुलोल्लासनीमादधानैः ।
श्रोत्रोत्तोदंस्तनद्भिः सकलमिह जनं क्षोभयित्वोष्णवातै-
र्मध्याह्नोच्चण्डसूर्यस्तपसि विजयते स्वातपैः सप्रतापैः ॥ ६३ ॥

चञ्चच्चन्द्राभ्रदीर्घोज्ज्वलविमललसद्वर्त्ति दीव्यद्वितान-
स्वाध्यायाचार्यसौधाकरकिरणगणाश्लिष्टसर्वाङ्गगौरम् ।
मल्लीमालाललामं विकसितपटलापाटलामोदमुग्ध-
मौद्यानं चक्रवालं हरति निशि हृदां प्राणिनां भारतीयम् ॥ ६४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उन्माद्यच्चन्दनश्रीसुरभितसुरभिप्रत्युषःशान्तिकान्त्या
क्रिर्मीरैलौलकीरैर्ललितखगकुलानीरयद्भिः समीरैः।
औल्लाघ्यं वेलयद्भिः पृथुकयुववयोऽतीतलोकाः प्रबुद्धाः
खेलन्त्युद्वीरयन्ते निजविषयनिजायत्ततां भावयन्ति ॥ ६५ ॥

चन्द्राङ्कात्संगृहीतं नवजलदकुलादाहृतं पुष्कराद्वा
संनीतं कृष्णिमानं धृतवति परितो व्यश्नुवाने तमिस्रे।
ह्लादिन्या दर्शयन्त्या कनककषलसत्स्निग्धया वर्त्मभेदान्
वर्षाक्षेत्राभिगुप्त्यै निशि कृषकगणाः साभ्रयः संचरन्ति ॥ ६६ ॥

एताहक्षेऽन्धकारे न ददति किमपि द्रष्टुमन्धे नितान्तं
दौर्बल्ये जाग्रति द्राक् प्रसरति परितः स्वान् स्वकीयान् समस्तान्।
आस्थायैकं त्रिलोकीभरणपरिवृढं स्वप्रकाशं परेशं
योद्धव्यं सर्वशक्त्या सकलसमुदितैर्हिंसयाऽहिंसया वा ॥ ६७ ॥

धर्मस्यात्यन्तनिष्ठा सहजसुचरितस्यैकमात्रप्रतिष्ठा
सत्यस्योत्कर्षकाष्ठा नयविनयमहारम्भनीतिर्वरिष्ठा।
धैर्यप्रेष्ठार्यरीती रिपुविजयमहाश्चर्यचर्या पटिष्ठा
श्रेष्ठा स्फेष्ठा गरिष्ठा पवनसुतगुरोः कापि दृष्टिः शुचिष्ठा ॥ ६८ ॥

भोगावासोऽपि मोक्षाद्भुतसदनमलं देवभाषाप्रियोऽपि
नानापभ्रंशनिष्ठो यवनगणवृतोऽप्यार्यजातिप्रतिष्ठः।
स्वातन्त्र्यप्राप्तिकामोऽप्यतुलविघटितानेकलोकाभिभूतो
देशोऽयं सार्वभौमीं कथमिह लभतामादिमां कीर्तिरेखाम् ॥ ६९ ॥

निर्वार्य्याः शङ्कशुल्का निकृतनिरसितानन्दना शिश्विदाना
नीत्यन्तर्वाणिकार्मा विसृमरयशसो वाग्मिनो जागरूकाः।
साम्राज्योन्नाथहाराः कृशतनुसहजस्फीतवित्तप्रभावा-
श्चार्वाघाटाः कुशास्तेभरतवसुमतीमातृपूजानदीष्णाः ॥ ७० ॥

स्वातन्त्र्योज्ज्वालमालानलसुहुतनिजप्राणसर्वस्वशौण्डाः
कारायां जग्मिवांसस्तदनु च विपदां साहयः स्वायतीनाम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूयांसः क्षीणकायक्षयगदमृदिताः पेस्वराः कष्टमार्गं
श्रद्धेया भारतीयाः सुखविभवभृतो भस्त्रिकाश्चापरे स्युः ॥ ७१ ॥

गुञ्जद्भृङ्गालिगीतैः श्रुतिसुखमधुरैः कूजदालोहिताक्षै-
श्चूतास्वादातिरिक्तस्वरमुखरपिकैर्माद्यदामोदवाहैः ।
पुष्पाणां पावमानैः प्रकृतिवरवधूनूतनाक्रीडमुग्धं
दिग्धं शोभाभिरामं कुशलकृतिकलोल्लासितं भारतं नः ॥ ७२ ॥

भायाद्भूयः प्रभूयाद्भवविभवभरैः संश्रियाद्भूतिभावै-
र्भूष्याद्भव्यैः स्वभावैर्भुवनमुभयतो भावनां भूरिभासम् ।
भज्याद्भज्यात्प्रभावोद्भवभरितभुवो भूपतीन् भूतभाषान्
भुज्याद्भोगान् प्रभूतान् भविकभरतभूर्भाग्यभूमा प्रभूता ॥ ७३ ॥

यत्तप्तं नम्रतायै प्रभवति सततं लोहमेतत् प्रसिद्धं
भूमिस्तप्तैव सद्यो जनयितुमखिलानङ्कुराञ् शाशकीति ।
तस्मादन्तर्दधाना ज्वलनखरशिखा एव सद्भारतीयाः
स्वातन्त्र्यं साधयेयुः स्वसुखनवसुधामोदमोहान्निवृत्ताः ॥ ७४ ॥

आर्यावर्त्ताभिधाने वसुमति मधुरे मातरुन्निद्रलीले
त्वां सम्यक् सर्वभूतिं निखिलकलकलाज्ञानविज्ञानपूर्णाम् ।
शस्त्रैरस्त्रैर्विमानैर्निजजनजनितैर्जातरूपां भवानीं
कुल्याभिः सिच्यमानां दिशि विदिशि शुभां श्यामलां भावयामः ॥७५॥

न स्यात् कश्चिद् दरिद्रो वसनविरहितो नैव मूर्खो न लुब्धो
जात्या कश्चित् समाजे न भवतु पुरुषः स्त्री तथा मानहीनः ।
सर्वे स्युः सुस्वतन्त्राः सकलसुखभृतः पूर्णविद्याः प्रसन्नाः
सोत्साहाः स्वस्थदेहा भवविभवभरैः संभृताः संस्फुरन्तः ॥ ७६ ॥

शान्ते दान्ते नितान्तं शशधरधवले धैर्यधुर्ये धरित्रि !
पूते पूतप्रतापे मणिजटिलमहासिंहपीठप्रतिष्ठाम् ।
स्वायत्तां स्वस्थचित्तां सुचरितनिकषोच्चैश्चरित्रां विचित्रां
मातस्त्वां चिन्तयामो नवनवलसितोद्योगसंभारपूर्णाम् ॥ ७७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुल्याभिः कूपषण्डैर्वहदमलजलैर्नालिकाभिः सुसिक्तां
केदाराभोगभव्यां दलकुसुमफलोल्लासिवल्लीद्रुमाग्राम् ।
कुण्डोध्नीचर्व्यमाणैः शिशुतृणनिचयैर्वत्सभद्राभिरामै-
रोरुच्याचान्तसीमां परविषयनुतां द्रष्टुमीहामहे त्वाम् ॥ ७८ ॥

यन्त्रव्यूहैर्नदद्भिश्चलदलविसरैर्विश्वतो व्याप्तशोभै-
र्वस्त्रव्रातांस्तथास्त्रव्रजगगनचरस्यन्दनान् बाष्पयानम् ।
संख्यातीतं विचित्रं निखिलजनमनोऽपेक्ष्यवस्तूनि नाना
तन्वानैर्मातृभूमे ! भगवति ! भवतीमीश्महे जात्ववाप्तुम् ॥ ७ ॥

आकाशं व्योमयानैः स्थगितवति महादीर्घकायैः सहस्रै-
र्बाष्पैः सौदामनीभिर्विरचितगतिभिर्भूविभागाननोभिः ।
पोतैरब्धीन् स्रवन्तीर्विधुतवति रिपुस्तोममात्माधिपत्ये
ध्यायामस्त्वां जनानां जगति निवसतां पञ्चमांशेन पूर्णे ॥ ८० ॥

अर्थाधिक्याभिसाध्यायुधवररचनाघोरसामर्थ्यसम्प-
द्योगावाप्यान्यदेशोन्नतपदमहिमोत्कर्षसंभावितत्वात् ।
उन्मूल्योद्दण्डशत्रुप्रतिभटजनतायोग्यसंख्याश्रयत्वाद्
यस्याखण्डत्वमिष्टं विमलमतिमतां श्रद्धया तं स्तुवीमः ॥ ८१ ॥

श्रद्दध्मस्तत्र पूजां चिरमभिलषितां तस्य कुर्मः परस्माद्
वाञ्छामो नैव तस्मादमृतमपि शुभान्यर्थयामोऽथ तस्मै ।
तेनोत्कर्षं श्रयामस्तमिह जनपदं साधुवादं वदामः
स स्यात्सर्वा विभक्तीर्दधदमलतरा मे सुवाचां समासाम् ॥ ८२ ॥

पारोक्ष्यं केचिदीयुर्निजनुतिविषयं केवलं मुक्तिसिद्ध्यै
प्रात्यक्ष्यं चैकमन्ये कवनसमुचितं भुक्तिलाभार्थमापुः ।
विद्वांसो वस्तुतस्तु प्रवचनरचनाचारुचातुर्ययोग्यं
स्वं देशं जन्मभूमिं मतिसकलबलैः सर्वथा संश्रयन्ते ॥ ८३ ॥

कीरा हेम्नोऽपि बद्धाः शुचिरुचिरुचिरे पञ्जरे नात्र तुष्टा
मुक्ताः सद्यो विहायःपरिचरणममी प्रारभन्ते स्वतन्त्राः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्सत्यं भारतीयाः कति कति च शतीः पारतन्त्र्येण नीत्वा
स्वं राज्यं साधयन्ते वसुपशुधरणीजीवनं वास्तुमूल्यम् ॥ ८४ ॥

सम्पूर्णो वेदराशिर्ध्रुवमयमधुना मन्त्रविप्रद्वयात्मा
त्यागास्तोषास्तपस्याश्चिरतरनिचिता नूननेषोऽवभाति ।
धर्म्या राजन्यनीतिर्विपुलितमहिमा कर्मशक्तिः समग्रा
पुण्यं वै कल्पकोटिप्रततमतिलसद्भारते धर्मसंघः ॥ ८५ ॥

गावः सर्वोपकाराः प्रकृतिसुमधुराः पुण्यनद्यः समस्ताः
पूताः शैलाः समग्राः शुचिरुचिरुचिरा नैकभेदा अटव्यः ।
पारावाराः पवित्रा अखिलमतिर्महन्मण्डलं तीर्थसीम्नां
देवागाराण्यनन्तान्यमितनिधिरयं भारतस्याविरस्तु ॥ ८६ ॥

सृष्टिस्थित्यन्तकर्ता चिदमलमहिमा ज्योतिषां ज्योतिरेकं
सर्वाधिष्ठानमूर्तिर्विघटितघटनाशक्तयानन्तशक्त्या ।
कोटीर्ब्रह्माण्डखण्डान् क्षणत इह समाभासयन्नैकरूपां
क्रीडां तन्वन् विभाति प्रभवतु स विभुर्भूतये भारतस्य ॥ ८७ ॥

स्वातन्त्र्यैकान्तनिष्ठा प्रचुरशुचिरुचिर्दूरदृष्टिर्गभीरा
धीराऽभेद्या महाब्धीन् नुतसततकृतिः पारयित्वा फलन्ती ।
एका विस्रम्भभूमिर्निखिलविषयिणां जागरां संसृजन्ती
राष्ट्रेषु प्राक्तनेषु प्रबलसमुदिता भारती राजनीतिः ॥ ८८ ॥

पारेवाग्वर्त्तिरूपं विपुलविलसितं ज्ञानविज्ञानगर्भं
पारावाराभिरामं त्रिदशगणमहाभारतीसंनिबद्धम् ।
प्रागैतिह्यैकगम्यं समसमयहितं विश्वभाषाप्रभावं
राजद्विद्यालयश्रीः किमपि विजयते वाङ्मयं भारतीयम् ॥ ८९ ॥

दूरे दुर्भिक्षवार्त्ता जनगणविषमा क्वेति भीतिर्निरस्ता
न श्रूयन्ते कदापि क्वचिदपि सहसा दास्यवाः सन्निपाताः ।
नाऽन्यायस्य प्रवृत्तिं द्विषदपि सहते नैव मिथ्याभियोगः
स्वातन्त्र्ये जातमात्रे प्रगुणितगरिमा द्योतते भारतश्रीः ॥ ९० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोकेऽस्वाकालमृत्युर्न चरति न भवन्त्याधयो व्याधयो वा
नैवाऽऽलस्यादिदोषास्तरुणिमनि नृणां वृद्धिसिद्ध्यन्तरायाः ।
न द्यूतं नापि मद्यं मलिनगुणगणा नापि दोषप्रवृत्ति-
र्दिव्येऽस्मिन्नार्यदेशे प्रथितमहिमनि भ्राजते धर्मलक्ष्मीः ॥ ९१ ॥

सौराज्येऽस्मिन्प्रतिष्ठां गतवति चरमां स्वर्णसिंहासनस्था
नीराज्येताऽऽर्यलक्ष्मीस्तरुणपरिवृढैः साधितार्थोल्लसद्भिः ।
अस्त्रैः शस्त्रैर्विमानैरुडुपशतशतैरन्तराहित्यसैन्यै-
र्न च्छेद्यैर्नापि भेद्यैः सुचरितनिकषै रक्षिता दुष्प्रधर्षा ॥ ९२ ॥

प्राज्यैराज्यैः पयोभिः प्रतिगृहमनिशं जायमानैरमेयैः
खाद्यान्नैः क्षेत्रवर्गेष्वतिविपुलमहाराशिभिः संभवद्भिः ।
धन्या स्वातन्त्र्यलक्ष्मीः सुवसननिचयैर्यन्त्रसंघातसिद्धै-
रत्नैर्नानाखनिभ्यः प्रतिदिशमतुलैर्निःसृतैरद्य दृश्या ॥ ९३ ॥

विद्याविद्योतमानैर्नयविनयतपस्त्यागवाग्मित्वभाग्भि-
र्निर्भीकैर्न्यायनिष्ठैः सुचरितविभवैः सत्यसन्धैः प्रशस्तैः ।
शूरैर्वीरैर्बहुज्ञैरतिविमलयशोराशिभिर्धर्मशीलैः
सभ्यैः पूर्णाचिरास्तां सततविजयिनी भारती लोकसंसत् ॥९४॥

स्वाराज्यं स्यात्स्वराज्यं भरतवसुमती स्यादखण्डा प्रपूर्णा
दिव्यप्रज्ञासमज्ञाः प्रबलविजयिनो भान्तु सर्वे युवानः ।
विद्यावासाः समस्ताः सुचरितविभवैश्छात्रवर्गैः समृद्धा
ग्रामे ग्रामेऽभिरामा हरिततृणभृतो गोचराः सन्तु गोभिः ॥ ९५ ॥

शान्तिः कान्तिर्नितान्तं प्रमुदितजनतासत्प्रवृत्तिर्विनीतिः
साध्वी रीतिः समीची कृतिरतिविमला प्रीतिरास्तिक्यवृत्तिः ।
नीतिः शस्या शुभंयुः प्रकृतिरथ सिता सौम्यकीर्तिर्विभूति-
र्लोकश्लाघ्या चिरस्य स्थितिमिह तनुतामार्यदेशे स्वतन्त्रे ॥ ९६ ॥

येयं वीथी चलन्ती हरति जनिमतो लोक्यते या समस्तै-
र्यस्यां यान्तो हसन्तः पुरत उपनतं नैव पश्यन्ति कूपम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तां जानन्तोऽप्यसक्ताः प्रखरपरिचयास्तत्परस्यां विभूतौ
शश्वद्भास्वत्प्रभायां भरतभुवमिमे शोभयन्त्वध्वनीनाः ॥ ९७ ॥

चारित्र्याणां विधानं मनुजतनुभृतां संविधानं शुचीनां
मर्यादानां निधानं विमलमतिमतां योगिनां संनिधानम् ।
आधानं दिव्यभासां प्रकृतिविलसितागारमेकं प्रधानं
राष्ट्रं न्यायावधानं प्रतिपदमयते भारतोच्चाभिधानम् ॥ ९८ ॥

विश्वेशः सर्वशक्तिर्गिरिवरतनयासाहचर्यार्चितश्रीः
सान्द्रानन्दामृताम्भोनिधिरमरसरिद्वीचिवाचालमौलिः ।
स्वातन्त्र्योल्लासलीलां विलसितविभवां सर्वशोभाभिरामां
भव्यां भव्यैकभावां भरतभुवमिमां सर्वदा संबिभर्तु ॥ ९९ ॥

पैलायग्रामजन्मा व्रजितरसयुगक्रोशनीरेशमार्गः
सौमित्रिः काशिवासी शतकसुमनसामम्बिकादत्तसूनुः ।
श्रीविश्वेशप्रसादोपनतकविकृतिप्रातिभाश्चर्यशक्तिः
प्रालम्बं मञ्जुलीलं सुनयति तद्गुरुः श्रीमहादेवशर्मा ॥ १०० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मायाजालम्

सौ० क्षमादेवी राव, मुम्बापुरी ।

अस्ति किल किञ्चिद्रमणीयोत्तुङ्गशैलशिखरे लोकलोचनानन्दप्रदं गुर्जरावनिमण्डले विराजमानमाबुनाम पर्वतावृतं ग्रीष्मविहारस्थानम् । व्यराजत तत्र गोवर्धनोद्धारिणो दारुणदानवविदारिणो भगवतः सृष्टिसुन्दरीचूडायमानातिसुन्दरशिखरमण्डितं मन्दिरम् । परितो देवागारमस्य व्यलसन् नानाविधा विटपिनः सुगन्धपुष्पाढ्याः । सुरालयस्यैकस्मिन् विविक्तकोणे बधिरमूकः कश्चिद् दैवज्ञो नित्यमुपाविशत् । विलक्षणान्तर्बोधसंपन्नस्यास्य सविधे नानादिग्भ्यो बालस्त्रीपुरुषाणां समूहाः स्वस्वदैवगतिजिज्ञासया समाययुः । नैसर्गिके वैक्लव्ये सत्यपि मूकाभिनयेनैवात्मेङ्गितं जनाय बोधयामास ज्यौतिषिकोऽसौ विचक्षणः ।

स सत्यगवेषी देवतागारस्य पृष्ठभागवर्तिनि विजने तमोमये प्रकोष्ठे रजन्यां ध्यानजपादिसाधनैर्भगवन्तमाराधयन् स्वाश्रितजनैरुपास्यत । अथैकदात्र चतस्रः प्रमदाः काश्चन गवेष्यमाणस्यात्मनः प्रियजनस्य नामधेयं प्रसूनैश्चित्रयितुं दैवज्ञेन मूकबधिरेणादिष्टा बभूवुः । अतो देवमन्दिरस्याङ्गणमनवरतनिपतद्बकुलकुसुमकदम्बसुरभीकृतमवारुह्य लेखार्थं स्वस्वदयितनाम्नः पर्याप्तानि प्रसूनानि संचित्य प्रदोषस्य सुवासितपवनमासेवमाना विटपिनामभ्यन्तरे शब्दायमानं मरुत्सूत्कारं शृण्वन्त्यो विश्रान्तिसुखमुपाभुञ्जन् । देवतायतनात् पुरोहितानामादौ स्तोत्रगायनमश्रूयत । ततश्च घण्टातालभेरीमृदङ्गवीणादीनामाकर्णितो मन्द्रस्तारोऽपि श्रोत्रमनोहरो निनादः ।

अथाङ्गनासु चतसृषु संजातपरस्परालापास्वेकतमा ज्येष्ठा दया नाम्नी निजगाद—प्रत्यैकयास्मासु यथाक्रममात्मीयकथा निवेद्यतामिति । तासु कनिष्ठा मुग्धानाम्न्यभ्यधात्—भवतु, रम्यतमायां राकाशर्वर्यामस्यां परस्परवार्ताश्रवणेन प्रायोऽस्मदीयव्यथा शिथिलीभवेत्, सर्वासामस्माकं किञ्चित्परिसान्त्वनमपि भवितेति । तत्प्रारभ्यतां कनिष्ठया भवत्या स्वकथेत्यन्याभिर्युगपदभ्यर्थिता मुग्धा स्वचरिताख्यानं कथयितुमुपाक्रमत् ।

मुग्धा—गुर्जरदेशे क्वचित्पयोनिधेस्तटवर्तिनि दुमसनामनि ग्रामे मम पितृपादा न्यवसन् । ते च यथासंप्रदायं वंशपरम्परया प्रतीता अभूवन् यदुद्वाह एव प्रयोजनं प्रमदाया जीवनस्येति । पठनलेखनाभ्यामन्तरोच्चशिक्षणं स्त्रीणां नावश्यकमिति तैर्दृढं प्रत्यपद्यत । अतोऽनाक्रान्तशैशवाया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एव मे कुमारं कश्चिदनाथाश्रमादवृणवन् तातचरणा मत्पाणिग्रहणोद्देशात् । षोडशवर्षदेशीयेन सार्धमनेन युवकेन यथाविधि विवाहवाङ्निश्चयो व्यधायि च । दिवं गतायां मे मातरि क्वचित्क्वचित्कुमारकोऽयमस्मदुपवने निभृतं माममिलत् । अस्मद्भवनमभितस्तथाभूतमुद्यानं रमणीयं तथा व्यलसन्निजसौन्दर्येण निर्जितनन्दनवनं यथा तापसस्य विषयव्यावृत्तस्यापि चित्तमभिनन्दयेत्तत् । उद्यानेऽस्मिन् नानाविधाः शाखिनः कदलीनारिकेलाम्रदाडिमीनारङ्गाञ्जीरपनसादयो व्यराजन्त । पुरातनवटपादपानामधो विश्रान्तिसुखोपभोगार्थं वेद्यः कल्पिता आसन् । सर्वतः कुसुमलतिकाः समुल्लसिता अनुत्तमामोदं प्रास्तारयन् ।

अथैकदा सायमावामुपवनेऽस्मिन् पिककूजननादिते निभृतं परस्परसमागमामन्दानन्दसुखमुपभोक्तुं मिलितावास्व । धवलयति वसुधातलं धवलकरे निशाकरे करैः सुधाधवलैर्बकुलमल्लिकादिसुमनस्सु सौरभमातन्वत्सु मन्दं मन्दं वाति गन्धवाहे यामिन्यां सौन्दर्यशालिन्यां वृद्धिं गतः प्रमोद आवयोः परां कोटिमारुक्षत् । व्यस्मरं साकल्येनाहं पितुः शासनमुपदेशं धात्रीदेव्या निद्रितायाश्च। चुम्बनं प्रथमं वल्लभस्य मे राकायां मनोहारिण्यां तस्यां पुलकिताङ्गयष्टिं मां व्यमोहयत्तराम्। नैकवर्षेषु व्यतीतेष्वपि तत्स्मरणेनावर्णनीयभावं मय्युत्पाद्येदानीमपि रोमाञ्चयति मे शरीरम्।

समाप्ताध्ययनः कुमारोऽयमष्टादशवर्षदेशीयस्तातपादैर्मे पाश्चात्त्यदेशमुच्चशिक्षणोपलब्धये प्रेषितोऽभूत् । संपाद्य कार्यं शीघ्रं निवर्तिष्ये स्वदेशमिति प्रतिश्रुत्य परदेशं प्रति स प्रतस्थे । अलेखीत् सोत्साहं तरुणोऽसौ प्रणयपत्राणि, परं न चिरादेव पत्रव्यवहाराद् व्यरंसीत् । अत्यन्तचिन्ताकुलस्तस्मै जनकदेवो मे तन्त्रीसंदेशान् प्रेषितवान्, परं नोपलभ्योत्तरं चिराय नैराश्यात्तत्पुनर्दर्शनाशामपि व्यजहात् । कियत्यसह्या व्यथा सोढा मया तत्समय इति वर्णयितुं न प्रभवेत् कोऽपि जनः । प्रियकरस्य पुनर्दर्शनसुखमाशु मे भवेदित्येकयैवाशया गृहीतान्तरात्मा स्थितास्मि। तदारभ्य च गतभर्तृकेव जीवनयात्रा नीतासीन्मया, परं स पुनर्मत्सविधं ध्रुवमायास्यतीति बद्धाशयावास्थिषि चिरात् । परं च दैवज्ञोऽयं बधिरमूकोऽपि तथ्यं बोधयिष्यति मामिति समुपस्थिताहमत्रेति समाप्तात्मकथाया युवत्याः स्वरध्वनिर्मन्दीभूय यवनपुरोहितस्य सायन्तनिकाह्वानस्य भक्तेभ्यः प्रतिध्वनिपर्यवसानमिव सस्वने ।

अथ तिसृष्वन्याङ्गना कृशाङ्गी श्यामवर्णापि प्रियदर्शना सामिपिहितमन्दाक्षी अमन्दशोकाकुलमन्दस्वरा मन्दा नाम्नी न्यगदत् ।

मन्दा—अयि सखि तव प्रेमवल्लरी सौन्दर्यामोदविषये लज्जितनन्दनदिव्यलता स्वप्ने दृष्टेवादृश्यतां गता विना दंशं तद्गुल्मान्तर्गतशोकभुजङ्गिन्याः किल ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्युक्तवती मन्दाऽन्याभिस्तिसृभिर्नोदिता निजवार्तां निवेदयितुमारप्सीत् ।

मन्दा—महानगर्यां मोहमय्यां चिरात्कृतावासाभ्यां पितृभ्यां साकं न्यवसम् । प्राक्तन-रूढ्यनुसारं संवर्धिता ताभ्यां बाल्ये प्राथमिकपाठशालायां केवलं कृताध्ययनाऽऽसम्। उच्चशिक्षण-विरोधी जनको मेऽब्रवीद्यदनिष्टमेव स्त्रीणामत्यभ्यासाज्जायत इति । तद्विचारपरिणामतो हन्ताज्ञप्रायाहमवास्थाम् । निखिलाहनि च बन्दीकृतेव सदने कांश्चन बान्धवान् विना न कोऽपि मे दृष्टिगोचरोऽभूत् । अथ सामाजिकमण्डले कस्मिंश्चिन्ममाग्रजानां सह सुदर्शनेन केनचित्तरुणेन यदृच्छया परिचयोऽभूत् । कृतार्धमहीपर्यटनोऽयं युवा वर्णेन गौरो विशालनयनः शिष्टाचारेऽधि-गतपाश्चात्यसंस्कारः स्वदेशाचारविद्वेषी विदेशानभिज्ञान्मे बन्धून् भृशमाचकर्ष । पाश्चात्यविविध-देशेषु वाणिज्यव्यवहारे समधिगतदीर्घानुभवेन मया वाणिज्यनियोगोऽन्वेष्यत इति ममाग्रजान-कथयत् । तत्क्षणे सहकारिणं व्यवहारदक्षं कञ्चिन्मार्गयन्तो जनकचरणा मे कुमारमिमं स्वकार्यालये द्रुतं न्ययोजयन् । अथ गच्छति काले संप्राप्तपरिणेयवयसि मयि योग्यवरान्वेषणपरावभूतां पितरौ, परं मदीयकुरूपताकारणान्न कोऽपि मामुद्वोढुं प्रत्यपद्यत । पर्यन्ते चिन्ताकुलो मे जनिता सहकारिणोऽस्य सविधे मद्विवाहविषयमधिकृत्य व्याजहार। दैववशान्न चिरात्तरुणोऽयमदृष्टपूर्वां मां परिणेतुं प्रत्यपद्यत । विस्मयस्य परां कोटिमारूढः प्राप्तस्वर्गद्वारमिवात्मानममन्यत जनको मे । प्रहर्षोद्रेकपूरप्लावितः सुमहत्संपत्तिभागिनीं मां विधाय युवानमेकमेव विधायकं व्यवास्थापयत् । अहं च नितान्तपरितुष्टा वशंवदा मदीयभाविपतिं तोषयितुमयतेतरां प्रत्यहम् ।

अथ निर्वर्तिते विवाहे यथाविधि वरो मां वीक्ष्य प्रथमतः शयनागारे न बभौ भग्नाशो नातिबीभत्सितो वा । पादयोस्तस्य प्रणिपत्याहमनुरागनिर्झरेण प्लावितात्मा प्रमोदाश्रुपूरेण तावप्लावयम् । स च किमप्यनुक्त्वा समुत्थापयामास माम्, चिरं च निशायां तूष्णीमवास्थिष्वहि। अपाङ्गदृशा लावण्यजितमारं कुमारं दर्शं दर्शं पुलकिताङ्गयष्टिर्विस्मयसागरे न्यमज्जम् । क्व मदनभिज्ञता, क्व च तस्य वैचक्षण्यम्; क्व मत्कुरूपता, क्व च तस्य सुरूपातिशय इति ध्यायं ध्यायं गाढं तमालिङ्गितुमुत्कण्ठिताभवम् । परं मत्तः स जुगुप्सितः स्यादिति भिया कम्पमानाऽवातिष्ठं नतानना निःशब्दापि ।

इत्थमुक्त्वा सहसेयं सगद्गदितस्वरा व्यरमत् । अथान्याभिर्युवतिभिः पुनः प्रणोदिता पुनरुपाक्रमन्निवेदयितुमवशिष्टवृत्तान्तम् ।

मन्दा—अथ मोहमय्यामेव पयोनिधेस्तटे दयितेन साकमत्यल्पनिलये न्यवसमहम् । प्रारम्भाद् भृशं संभाविताऽऽसं तेन । वसनाभरणाङ्गरागादिप्रसाधनसाधनानि परिधानोचितो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पानत्पादुकाश्चाक्रीणात् स स्वयं मदर्थम्। अहं च सहर्षं सगौरवं सर्वमेव तेन क्रीतमुररीकरवम्। अपरिहितपरदेशीयोपानत्पूर्वाया मे पादौ संपीडितौ भृशमास्ताम्, परं नाथं प्रीणयितुकामया सर्वा वेदना असह्यत मया। प्रत्यहं सामाजिकक्रीडामण्डलं स मामनैषीत्। विवाहात्पूर्वं गृहाद्बहिर्निर्गमनानभ्यासवशात् समाजव्यवहारानभिज्ञामाधुनिकशिष्टाचारं मामशिक्षयत्। पाश्चात्त्यदेशानुकारिणोऽस्य साम्प्रतिकरीतिमतादिभिर्वशीकृताऽऽसमचिरात्। अथ काले प्रसूतार्भकाहं शिशुवर्धनादिकार्यबाहुल्याद्विहाराय सह तेन बहिर्गमनं परित्यज्याखिलाहो मन्दिरेऽवास्थिषि। क्रमेण मदवस्थितिमपि गृहे पतिर्मे न केवलमवागणयत् किन्तु डिम्भमपि, नौ कृत्स्नश उपैक्षत। दिवा कार्यालये व्यापृतः सन्न न्यवर्तताालयमामध्यरात्रम्। कुतो विलम्बः क्रियते प्रतिदिनं गृहं प्रत्यागम इति क्वचित्पृष्टो मया तिरस्काराचूर्णीं स्थितवान्। अथैकदा सूर्यास्तमनात्प्रागेव गेहं प्रत्यागत्य ससंभ्रममभ्यधात्—इतः सत्वरमेव गन्तव्यं मया। मदीयपितृपादा हि मरणोन्मुखा इति समुपलब्धवृत्तान्तस्तत्सविधं विना विलम्बं यास्यामि। पितृगेहं समापन्नमात्रस्त्वां पत्रं लिखिष्यामीति मुहुर्मुहुः प्रतिश्रुत्य सदनं व्यसृजत्प्राणेश्वरः। न कदापि पूर्वं निजपितरमधिकृत्याक्षरमपि प्रोक्तमासीत्तेन। अतः पितृहीनः स्यादेष इति तर्कितमद्यावधि मया। अथ प्रत्यहं तत्पत्रं प्रतीक्षमाणा सोत्कण्ठं सोत्साहमवास्थामहम्। परं नासीन्नैराश्यं विना फलं प्रतीक्षाया मे। तस्य वृत्तविशेषोपलब्धये मम पितृचरणैर्यथाशक्ति प्रयतते किन्तु नैष्फल्यमेव प्रापुः प्रयत्नास्तेषाम्। व्यतीता इदानीं पञ्चषाः संवत्सरास्तस्य निर्गमस्य गेहात्। विना परेशं च न कोऽपि मनुजो जानाति क्व वर्ततेऽसौ किं संवृत्तं तस्य वेति। दैवेन च प्रेरिताहमत्र समायातास्मि। दैवज्ञोऽत्र तथ्यं कथयेदिति। ओम्।

समीरविधूतसुरुनामकशाखिविशेषस्य मन्दरुतमिव मन्दायाः स्वरो मन्दमन्दो भूत्वा श्रवणपथस्यागोचरतां ययौ। क्षणमात्रं यावदत्र विलक्षणनिःशब्दता विराजते तावत्सर्वासु तासु मनोहारिणी मोहिनी नाम्नी तृतीयाङ्गना लावण्यतिरस्कृतानङ्गजाया सरोजनयना सुललिताङ्गयष्टिः सुवर्णवर्णा व्याहरत्। अयि युवामुभे अपि दैवेन प्रतारिते स्थः खलु, मदीयविषये त्वहमेव दोषास्पदीभूताऽस्मि। कस्यचिच्छ्रेष्ठिनो महानगर्यां निवासिनः कुलेऽहं प्राप्तसंभवाऽऽसम्। पितृभ्यामतीव लालितां प्राप्तयौवनां बहवो युवानो मामुद्वोढुमहमहमिकयाभ्यार्थयन् मदीयजनकम्। परं धनिकस्यात्मजा धनिकायैव देयेति कृतनिश्चयौ नवयौवनचुम्बितमात्रां मां पितरौ मध्यवयस्केन केनचिद्धनाढ्येन मौक्तिकवणिजा सह पर्यणाययताम्। वाणिज्यव्यवहाराय भर्ता मे मुहुर्मुहुर्भूतलेन्द्रभवनायितं रमणीयतमं प्यारिसनगरं गच्छति स्म। एकदा च सह तेन तन्नगरमद्भुत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मगममहम् । नगरीयममरावतीसौन्दर्याधरीकारिणी, वसुधातलनिखिलनगरीललामभूता, बुवाद-बुलोयन्-तुलरीनामकविविधरम्यतमोपवनजितनन्दनवनरामणीयकशोभिता, कूजन्नानाविधसुन्दराण्डजनीलोत्पलविलसितजलाशयसुषमातिशयनिधेर्देवता, आर्कदत्रियोम्फनामकविशालाष्टपथसंगमभूता, विजयतोरणा, शान्झलीझनामकदेदीप्यमानविस्तीर्णराजमार्गविराजमाना, निखिलमहीतलदेशीयाश्रयभूता, नाट्यसंगीतनृत्यचित्रशिल्पादिकलाकलापधाम, असंख्यबुलेवार्डाल्यमहावीथिजनगुञ्जिता, नोत्रदाममाद्लनसाक्रेकेराद्यद्वितीयदेवतालयपूजिता, शिल्पसौन्दर्यसमलंकृता, विपणीवातायनरचितरुचिराम्बररजतहैमपात्ररत्नखचितालङ्कारादिभूषिता मां नितान्तं व्यमोहयत् । विद्यते कश्चिद् विख्यातो मार्गो नगर्यामस्यां रुद्लापेनामा बहूत्कृष्टाहारगृहसंपन्नः । एकस्मिन्नेतेषां प्रतिरात्रमाहारमुपभुज्य निवासं निवर्तमानयोरावयोः पतिर्मे द्रुतं मां विसृज्याप्रातर्बहिरेवास्त । दैनिकक्रमोऽयं विलक्षणः प्रावर्तत बहुतिथं कालम् । पर्यन्ते चिरादाचरितदुराचारमस्यातर्कयम् । अथैकदा भोजनावसरे कश्चित्पत्रवाहकः पत्रमेकमानीय हस्ते मम पत्युः समर्पितवान् । पठित्वाशु तद् विवर्णवदनः सहसासनादुत्थाय प्रतीक्षस्व क्षणं तावच्छीघ्रमेव निवर्तिष्य इति प्रतिश्रुत्यैकाकिनीं मां तत्र विसृज्य ससंभ्रमं भोजनालयान्निर्ययौ । तमहमेकहोरां प्रतीक्षमाणा तत्रैवोपविष्टाऽऽसम् । न तु प्रत्यागमद्वञ्चकोऽयम् । अत्रान्तरे यथा यथा बुभुक्षवो जना अधिकाधिका आययुस्तथा तथा मत्पतेरनागमादुद्विग्नाभवम् । आवाभ्यां परिसेवितभोजनस्य क्रयमूल्यस्य प्रदित्सया धनकोशमात्मनो यावदावृणोमि तावत्सेवकाय पारितोषिकप्रदानाय पर्याप्तमपि धनं न विलोकयामीति नितान्तं लज्जिताभवम् । आसीद्दिष्ट्या भारतीयस्तरुणः कश्चिन्मत्समीपवर्तिभोजनफलकान्तरसविधमाहारं भुञ्जान उपविष्टः । सोऽयं समानदेशी प्रत्यहमदर्शि मयात्र । प्रसङ्गेऽस्मिन् विलोक्य संभ्रान्तां मां शीघ्रं स मदन्तिकमुपेत्य साहाय्यं चिकीर्षुर्ममानुज्ञामयाचत । उपकृतास्मि भवतेत्युक्ते मया नतशिरा भोजनमूल्यं प्रदाय गृहस्वामिने मन्निवासं सादरं मामनैषीत् । तद्दिनमारभ्य दर्शनीयशरीराकृतिर्दृढाङ्गो गौरवर्णो युवासौ प्रतिदिनमादौ भोजनालये तदनु विहारभूमौ उपवने वा माममिलत् । ततश्च परस्परसंगतिसुखमावामन्वभवाव । न चिराच्च परिचयश्चावयोर्वृद्धिं गतः । मिथः संभाषणसहवासविनोदक्रीडादिना प्रेमबन्धो नौ सलीलमधिकाधिकगाढोऽभूत् । अथ मासाभ्यन्तरे यद्यदासीन्मत्सविधे तत्सर्वमपि संगृह्य प्रणयिना सार्धम् ईजीप्तदेशं प्रति निभृतपलायनमकरवम् । प्राप्य तत्र कस्यांश्चित् समुद्रतटवर्तिन्यामविख्यातग्रामटिकायामावाममन्दानन्दतुन्दिलौ मासषट्कं न्यवसाव । सोद्दीपं सोत्कटं स मां चकमेतराम् । अमितप्रेम वल्लभस्य मे क्वचिन्मयि भयमजीजनत् । तथा हि प्रेमशङ्का तत्प्रेमापेक्षयापि बलीयसी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बभूव। प्रेमशङ्काशीलः स क्वचिदकारयदात्मानमेतावद् हास्यास्पदं यत्तमुपहासार्थमेव पीडयितुमसकृदक्रीडि मया। अथैकदाम्बुनिधेस्तीरे स्नानार्थं याते तस्मिन् सुहृदा केनचित्कैरोनामिकां राजधानीं प्रति यामीति संदेशं पत्रे लिखित्वा मन्दिरान्निरगमम्। सर्वमिदं विनोदार्थमेव चेष्टितमासीन्मया। परेद्युः प्रेमनिलयं नौ निवर्तमाना तदनाथीभूतमवालोकयम्। अस्मदवस्थानदेशीयसेवको मदतर्कितनिर्गमजन्यविप्रलम्भाभिभूतस्य वल्लभस्य मे नैराश्याग्निज्वालामज्जनं न्यवेदयत्। अथानुतापानलसंतप्तया मया सर्वतस्तमन्वेषयन्त्या न नैराश्यं विना फलमुपालभ्यत। पर्यन्ते गतिमन्यामपश्यन्ती स्वदेशं पुनरागमम्। मदागमात्प्रागेव हन्त पितरौ मेऽपरिमितसंपत्तिभागिनीं मां विधाय दिवं गतौ। परं धनसंपन्नाया अपि मे सुखलेशमपि न विद्यते। विनानुरागं हि प्रणयिनः प्रमदाया जीवनं व्यर्थमेव खलु। सर्वतः शून्यतैव प्रतिभाति मे। वार्धक्यं चासन्नप्रायमिति कथयन्त्यास्तस्या वचो यत्स्फुटचरमासीत्तदिदानीं शिथिलीभूय शनैराकाशे विलीनतामयासीत्।

अथ ज्येष्ठा तासु योषित्सु दया नाम्नी व्याहरत्—"अयि कथं वृद्धा स्यास्त्वम्। वयसाहं त्वत्तो ज्यायस्यपि प्राणनाथस्य मे संदर्शनपिपासया व्यथितास्मि" इत्याख्यायाङ्गणस्य समीपवर्तिनः स्तम्भस्य पृष्ठभागे विलीय पुनर्दृश्यतां यदागतासीत्तदा प्राप्तरूपान्तरा सा बभौ। तदीयसान्द्रमेचककेशकलापस्य स्थाने धूसरवर्णमयविरलविरलकेशतन्तव एवासन् शिरसि तस्याः। तदाननाकारो निम्नभागनिमग्नः सद्यो विमृष्टकज्जलं निस्तेजश्च तन्नेत्रयुगलम्। तदीयसहचर्यस्तस्यां बद्धदृष्टयः काष्ठविग्रहा इव चित्रलिखिता इव संवृत्ताः। क्षणोत्तरं निजकथानिवेदनमुपाक्रमद् दया।

दया—कस्याश्चित् संगीतकुशलाया गणिकायाः कुले गृहीतजन्माहम्। गायनशिक्षकमेकं प्रवयसमन्तरा न केनापि पुरुषेण सह परिचयमनुमेने प्रसूर्मे। षोडशवर्षकल्पाऽभवं यदा तदा मदीयाम्बा बहुभिस्तरुणैर्धनाढ्यैः सार्धं कुभोगार्थं मत्समर्पणसन्धानं कर्तुं समुद्यताऽभवत्। परं गणिकाजीवनमसहमाना नैसर्गिकबीभत्सया तन्मनोरथानुवर्तने पराङ्मुखी सनिश्चयमवास्थाम्। तथापि मत्सङ्कल्पमविगणय्य केनचिद्धनिना क्षेत्रपतिना सार्धं मद्देहविक्रयव्यवहारः समपद्यत तया। अथावयोः प्रथमसंगमात्प्रागेव मातुरालयान्निभृतं पलायिताहम्। ततश्च पुरात्पुरमटन्त्या दीनदीनाया मे वार्तां श्रुत्वा दयालुः कश्चित्पुरोहितो भृशमार्द्रीभूय स्वगृहे प्रदाय संश्रयं मे, क्रमेण मां पुत्रीकृतवान्। दश वर्षाणि महानुभावेन करुणानिधिना तेन स्वकन्यानिर्विशेषं पाल्यमाना लालिता तेनाध्यापिता कोङ्कणावनिमण्डले ग्रामटिकायां कस्याश्चित्पयोनिधेस्तटवर्तिनि गृहे सुखं न्यवसम्। मामन्तरा नासीदन्यः कोऽपि तमुपासितुम्। यतः प्रसूतिसमये तद्गेहिनीदेवी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विंशतिवर्षीया सार्भका कालवशं गतासीत्, न चान्यामुपायंसीद् भूसुरवरोऽयम्। अथ गच्छति काले समारूढनिर्भरयौवनां मां परिणाययितुं सुतरां प्रायतन्त पितृपादाः, परमाकर्ण्य कर्णपरम्परया संभवं मे न कोऽपि तरुणो मत्पाणिं ग्रहीतुं प्रत्यपद्यत। विव्यथेतरां पूज्यतमजनकदेवस्य हृदयं दर्शं दर्शं मामनूढां प्रतिवर्षं वर्धमानां च वयसा। सर्वापेक्षया बलीयस्याशेति मद्विवाहविषये सप्रत्याशोऽवतस्थौ स आजीवम्। अतिक्रान्तषड्विंशतिवर्षीयायां मयि पितृपादा दिवं गता विसृज्य मे सर्वमेव स्वार्जितं वित्तमालयं च। ततः परं विनष्टैकावलम्बनाहं चिरं पितृदेवानां मृत्युं विलपन्ती नामशेषानां तेषां स्मृतिं पूजनीयां निरन्तरं दधाना हृदि तन्मदिरे न्यवसमेकाकिन्यहम्। अथैकदा सायं समुद्रतटे शतपदीं कुर्वाणा गण्डशैले शयितं कञ्चिन्मूर्च्छाभिभूतं युवानमद्राक्षमहम्। सोऽयं गौरवर्ण आयतललाटो दीर्घबाहुस्तरुणस्त्रिंशद्वर्षदेशीयो दृढकायो लुप्तसंज्ञो म्लानमुखो मन्दं मन्दमश्वसीत्। यथा यथा तदीयगण्डस्थलमस्पृशं तथा तथाऽपूर्वविविधमिश्रभावनातरङ्गाभिभूताऽहम्। चिराद्विनष्टोपलब्धबालका प्रसूरिव परितोषस्य परां कोटिमारुक्षम्। तदीययौवनचुम्बिताननमालोकयन्त्या मे वक्षःस्थलं सरभसमस्पन्दत। अथ स केषाञ्चिन्मत्स्यजीविनां साहाय्येनानीयत मद्गेहम्। झञ्झावातेन प्रोच्चकैराक्षिप्तः कल्लोलमालिकाभिः प्रहृतः पोतः क्वचित्सागरस्याम्भस्यमज्जत्। दैवगत्या तु तरुणोऽयं प्रभाते तीरभूमिमगमदिति तैर्निवेदिताऽऽसमहम्। द्वित्रघटिकोत्तरं लब्धसंज्ञस्य तस्य स्मितमविस्मरणीयं मां न्यवेदयत्प्रभूतवस्तुजातम्। तदनु स कियन्तो दिवसान् सामिमूर्च्छादशायामवतस्थे। क्रमेण च प्रकृतिमापन्नोऽभाषताल्पमेव। साम्रेडमनुयुक्तोऽपि यथा स्वपूर्ववृत्तान्तनिवेदनेन मत्कुतूहलं परिपूरयितुं स्मृतिभ्रंशान्न स प्राभवत्। अहं च तत्पारतन्त्र्यादधिकाधिकं तस्मिन् स्नेहबद्धाभवम्। कदाचित्संभ्रान्तमनाः प्रच्छन्नाधि स्मृतिफलकात् परिमार्ष्टुं यतते स्म। अथ गच्छत्सु मासेषु मामवधातुमारप्सीत्। मदीयवसनाभरणनयनाञ्जनपाणिरुहरागादिकलापः क्रमेण तद्दृष्टिविषयोऽभूत्। ततस्तस्मिन् प्रेमाङ्कुरोदयलक्षणान्यपश्यम्। तदवलोकनेन सुतरां मनसिजशरविद्धेव रोमाञ्चिताङ्गी स्वान्तर्भावविकारमगोपयमहं सप्रयत्नं ततः। सोऽपि पृथग्भावमाश्रित्य चिन्तापरो नित्यमास्त। अथैकदा सायमुद्याने विहरतोरावयोरवादीत्स कुमारो गन्तव्यमिदानीमितो मयेति। वचस्तस्याकर्ण्य सुतरामवदीर्णहृदयेव विषण्णान्तरात्मा गात्रस्खलिताऽवोचम्। क्व प्रस्थास्यते त्वयेति। यत्र कुत्रापि, अलं चिन्तया मदर्थमिति सविशिथिलवचनविन्यासं सशोकं च स प्रत्युवाच। इत्थं ब्रुवाणमेनं परिसान्त्वयितुमालिङ्गितुं च भृशमैच्छम्। परं लज्जया तदप्रसादभिया चावरुद्धा क्षणं जोषं स्थित्वाऽप्राक्षमहम्—किमितो निर्गन्तुमुद्यतोऽसि। अपि नास्ति क्षेमं तवात्रेति पृष्टः कृतज्ञतासूचकं हस्तनिक्षेपं कुर्वाणो निरुत्तरोऽ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वतस्थे स युवा। अपि स्ववृत्तिं पुनर्ग्रहीतुमिच्छसि प्रायः, किं निकटबान्धवानाहोस्विद्दिदृक्षुरसीति मयानुयुक्तः प्रत्युत्तरमदत्त्वा सकन्धरकम्पं तूर्ष्णीं स्थितवान्।

अत्रान्तरे धवलयति वसुधातलं धवलकरैर्धवलरश्मौ धवलोज्ज्वलतामसीप्लावितमुद्यानमिदम्। चरणपथेषूत्पलखण्डानि देदीप्यमानान्यग्न्युपलानीव विलक्षणभावोत्सेकं मय्यजीजनत्।

स एव क्षणो निश्चायको मजीवनस्येति प्रतीताभवम्। शनैः सभयं तत्करमादाय समार्दवं परामृशम्। निजपारतन्त्र्यमाविष्कुर्वन् सविश्वासं सविनयं चान्वमंसि तेन मां ग्राहयितुं हस्तमात्मनः। क्वचिदुत्कण्ठिता क्वचित्संभ्रान्ता क्वचित्कम्पमाना क्वचित्संत्रस्ताहं कियत्क्षणानि जोषमवास्थाम्। अब्रवीच्च स तावत्—अहो भवत्परमसौजन्यभारेणाभिभूतोऽस्मि किल। न खलु भवत्याः प्रेमपात्रं भवितुमर्हति जनोऽयम्। वचनं तन्निशम्य मदीयकरो निःसत्त्व इवागलत्तदीयहस्तात्। अभाणि च कथमपि मया—"भवन्तं परिसेवमानामन्दानन्दतुन्दिलास्मि। एकाकिन्येवास्मि मन्दिरेऽस्मिन्। सदैव भवतां पदाब्जयुगलमुपासितुमनुमोद्यतां जनोऽयम्। अस्ति पर्याप्तं धनं मत्सविधे उभयोरावयोः पोषणाय" इत्युक्त्वा रुद्धकण्ठा व्यरमम्। स च मां सदयमालोकयन्मत्करं परामृशत् समार्दवम्। पूर्वनैजकथास्मरणाग्निना तप्यमान इव स प्रत्यभात्। कयापि निर्दययाङ्गनया क्वचित्प्राग्वञ्चितः स्यादिति व्यतर्कि मया। परं नाक्षरेणापि तेन किञ्चिदपि व्यक्तीकृतम्। मौनमस्य तावन्मां किञ्चिदाश्वासयामास। चिरं च पतत्रिकुलकूजितं दविष्ठजलाशयनिर्झरध्वनिं श्रावं श्रावं चन्द्रिकाया रामणीयकेन प्रहृष्टान्तरङ्गौ कुन्दकुसुमैः सुवासिते लतामण्डपे जोषमवास्थिष्वह्यानिशीथम्।

परेद्युः प्रातस्तरां यदा जागृताऽऽसं तदा हृदयवल्लभस्य शयनागारं रिक्तमलोकि मया। दुग्धापूपादिकप्रातराशं परिवेषयितुं तस्मै गृहतलं यावदवारोहं तावन्मुखशालायां मध्यस्थफलकोपरि स्थापितं तद्धस्तलिखितं पत्रमेकमद्राक्षम्। सवेपथुरवसन्नगात्री सचकितं सभयं पत्रं तदपठं यथा—"भवत्याः सौहार्दातिशयभारेण सुतरां निमज्जितोऽस्मीति वचनं पुनरुक्तिरेव स्यात्खलु। अयोग्यो जनोऽयं भवत्या विस्मरणीयः। सन्ति मदपेक्षया परश्शतं जना भवत्सौजन्यार्हाः। अज्ञातक्षुद्रजनस्यास्यानेकनतिततयोऽङ्गीक्रियन्तामिति प्रार्थये। स्वस्ति भवत्यै" इति स्वल्पसंदेशं हृदयेश्वरस्येमं पठित्वा निश्चला चिरमवातिष्ठमहम्। निखिलाहनि सर्वतस्तं गवेषयामासुर्ग्रामवासिनः परं हन्त न केनापि विलोकितोऽसौ आप्रभातादासूर्यास्तमनम्। ततश्च तन्त्रीद्वारा संदेशाः प्रेषिता मया समीपवर्तिनगररक्षाधिकारिभ्यस्तरुणस्योदान्तोपलब्धये। महार्हपारितोषिकप्रदाने शोधकाय प्रतिश्रुतेऽपि नैष्फल्यादन्तरा नान्यत्फलमुपानतं गवेषणस्य। अहं च पाताल-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तलमवतीर्णेव क्वाहमगमं किमकरवं क्वास्वपं किं भुक्तं किं पीतं केन सेवितेति न किञ्चिदप्यज्ञासिषम् । अनेकापत्सहिष्णोर्मम कस्य जन्मान्तरोपात्तस्य कर्मणः फलेन भाव्यमिति । आदौ हिं कामवराको मामपारानन्दपयोनिधौ विनिमज्य ततो हृदयेश्वरसमागमसुखनगशिखरात्तद्विरहान्धकूपे न्यपातयत् ।

इत्युक्त्वा दीना रुद्धकण्ठा शिथिलवचनविन्यासा विललाप सकरुणं दया । निशम्य च दयाया दयनीयकथां स्वस्वदयितार्थिन्योऽङ्गनास्तिस्रस्ताः सदयाम्बुनयना बभूवुः । न चिरात्सर्वा इमाश्चतस्रः स्वस्वकल्पितस्थानं बकुलकुसुमगुच्छहस्ता देवमन्दिरं प्राविशन् । दैवज्ञस्यादेशानुरूपं स्वस्वहृदयेश्वरस्य नामाक्षररेखाः पुष्पैरालेख्य परेद्युस्तत्र पुनरागमननिश्चितास्ततो निर्ययुः । अथ प्रातस्तरां दैवज्ञेनालोकितेषु नामाक्षरकुसुमालेख्येषु प्रतिस्थलं सममार्जि । तदन्वेकेनैव पद्येनालंकृतमासीत्प्रत्येकाङ्गनायाः स्थानं निभृतम् । संदेशोऽस्याभूद्यथा—

पतङ्गो रसमास्वाद्य चतुस्सुमनसां पृथक् ।
मायाजाले गृहीतः सन् विमुक्तोऽपि तिरोऽभवत् ॥

परेद्युर्भानूदये चतुष्टयं योषितां स्वस्वगुह्यस्थानं पुनरुपेत्य मूकबधिरस्य पद्यमयं संदेशमपठत्परं तद्गूढार्थमवगन्तुं नैकापि तासु प्राभवत् । पश्चाद्दैवज्ञो मायाजालसदृशं जीवनं संग्रथ्नात्येव प्राणिन इति हस्तचेष्टया योषितो निवेदयितुं प्रायतत ।

तास्तु संभ्रान्ता अधिकाधिकं भग्नमनोरथाश्च सुरागारान्निर्ययुः । परं नाज्ञासत ता यत्ताभिश्चतसृभिरभ्यन्विष्यमाणो रमण एक एवासीद्युवेति ॥

———

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यायनये शब्दार्थसम्बन्धविचारः[1]

श्रीबदरीनाथशुक्लः, राजकीयसंस्कृतमहाविद्यालयप्रधानाध्यापकः, काशी।

अनादिकालादनन्तकर्मपाशयन्त्रिता जीवा भोगेनात्मतत्त्वसाक्षात्कारेण च पूर्वजन्मार्जितं कर्मजातं मिथ्याज्ञानं च निरन्वयमुन्मूल्यात्यन्तिकाखिलदुःखनिवृत्तिलक्षणमपवर्गमासाद्य कृतकृत्या भवेयुरिति कान्तकामनया सर्वविषयकनित्यज्ञानेच्छाप्रयत्नसम्पन्नः परमेश्वरः कृत्स्नानिमाँल्लोकानरचयत्। परं निर्मितेऽपि निखिले यदि व्यवहारानुगुणः शब्दराशिः सृष्टो नाभविष्यत्तदा न कश्चित्स्वाभिप्रायं प्रकटयितुं पराभिप्रायमवगन्तुं वा प्राभविष्यदिति समग्रं जगदेव मूकं प्रगतिहीनं च भवन्न कथञ्चिदपि वर्तमानामवस्थामध्यरोक्ष्यन्न वा जगद्रचनोद्देश्यं मनागप्यसेत्स्यदिति स शब्दानसृजत्। सर्वज्ञेन सर्वसमर्थेन च परमात्मनाऽसाधूनामसंस्कृतशब्दानामुत्पादनमनुचितमिति तत्तदर्थबोधौपयिकाः साधवः संस्कृतशब्दा एव तेन सृष्टाः। ततस्तानेवोपजीव्य संस्कृतभाषा तां च समाश्रित्य बहुविधं विस्तृतं विपुलं संस्कृतसाहित्यं प्रावर्तत। परमेश्वरोच्चारितशब्दानामयथातथाभ्यां श्रवणानूच्चारणाभ्यां च संस्कृतेतरभाषाः प्रासरन्नित्येव निरवद्यो निश्चयः।

तत्र न सर्वः शब्दः सर्वमर्थं बोधयति किन्तु कश्चिदेव शब्दः कञ्चिदेवार्थमिति शब्दः स्वसम्बद्धमेवार्थं विज्ञापयतीति नियमो नूनमभ्युपेयः। स च सम्बन्धो न संयोगस्तस्य द्रव्यमात्रनिष्ठत्वात्, शब्दस्य च न्यायनयेऽद्रव्यत्वात्। नापि समवायस्तत्र शब्दानुयोगिकत्वेन जातीतरप्रतियोगिकत्वस्य शब्दप्रतियोगिकत्वेन वा गगनेतरानुयोगिकत्वस्याभावाज्जातिगगनातिरिक्तानां शब्दासम्बद्धत्वप्रसङ्गेन शब्दवेद्यत्वानुपपत्तेः। नापि तादात्म्यं प्रभूतवैधर्म्यालिङ्गितयोः शब्दार्थयोस्तदभ्युपगमासम्भवात्। नापि भेदसहाभेदपर्यवसायि विलक्षणं तादात्म्यं तादृशे प्रमाणाभावात्। नापि कालिको वर्तमानेन शब्देनातीतानागतयोरप्यर्थयोर्बोधात्। नापि दैशिको विरुद्धदिक्कयोरप्यर्थशब्दयोर्बोध्यबोधकभावात्। नापि स्वरूपं तत्तच्छब्दस्य तत्तदर्थमिवार्थान्तरं प्रत्यपि स्वरूपाविशेषात्। अतस्तयोः सम्बन्धः क्लृप्तसम्बन्धव्यतिरिक्त एव कश्चिदित्यकामेनापि मन्तव्यम्।

---

१ आचार्यपरीक्षामुत्तितीर्षूणामन्तेवसतां निबन्धरचनाऽऽदर्शभूतौ द्वौ लेखावत्र प्रकाश्येते। यथावसरं निबन्धान्तराण्यप्यत्र प्रकाशयिष्यन्ते—सम्पादकः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स च सम्बन्धः शब्दार्थसम्बन्धविज्ञैर्वृत्तिशब्देन व्यवह्रियते। वृत्तिश्च शक्तिलक्षणान्यतररूपा। शक्तिश्चाभिधासामर्थ्यवाचकतादिप्रचुरपर्याया परमेश्वरेच्छारूपा। सा च विनिगमकविगमेन "अयं शब्द एतदर्थबोधको भवतु", "अयमर्थ एतच्छब्दबोध्यो भवतु", "एतदर्थबोध एतच्छब्दाद् भवतु" इत्यादिरूपाऽऽकारतोऽनेकापि स्वरूपत एकैव। शब्दविशेषादर्थविशेषबोधोदयस्य व्यवस्थितस्य वाच्यवाचकत्वव्यवहारस्य चान्यथानुपपत्त्यास्याः सम्बन्धत्वं तदनुगुणं च शब्दार्थानुयोगिप्रतियोगिकत्वं शब्दार्थप्रतियोग्यनुयोगिकत्वं वा कल्प्यते।

तत्राद्याकारायाः शब्दानुयोगिकत्वे स्वीयार्थबोधजनकत्वनिष्ठप्रकारतानिरूपितविशेष्यताया-स्तदनुयोगितानियामकत्वम्, स्वीयशब्दनिष्ठविशेष्यतानिरूपितजनकत्वनिष्ठप्रकारतानिरूपितबोध-प्रकारतानिरूपितविषयित्वसम्बन्धावच्छिन्नप्रकारतायास्तत्प्रतियोगितानियामकत्वम्, अर्थानुयोगि-कत्वे चोक्तप्रकारताया अनुयोगित्वस्योक्तविशेष्यतायाश्च प्रतियोगित्वस्य नियामकत्वम्।

द्वितीयाकारायाः शब्दानुयोगिकत्वे स्वीयार्थनिष्ठविशेष्यतानिरूपितविषयत्वनिष्ठप्रकारता-निरूपितबोधप्रकारतानिरूपितजन्यत्वसम्बन्धावच्छिन्नप्रकारताया अनुयोगितानियामकत्वम्, स्वीय-शब्दनिष्ठप्रकारतानिरूपितबोधप्रकारतानिरूपितविषयत्वप्रकारतानिरूपितविशेष्यतायाः प्रतियोगि-तानियामकत्वम्, अर्थानुयोगिकत्वे तूक्तविशेष्यताया अनुयोगितानियामकत्वमुक्तप्रकारतायाश्च प्रतियोगितानियामकत्वम्।

तृतीयाकारायाः शब्दानुयोगिकत्वे स्वीयबोधनिष्ठविशेष्यतानिरूपितजन्यत्वप्रकारतानिरू पितप्रकारताया अनुयोगितानियामकत्वम्, स्वीयतादृशप्रकारतानिरूपितबोधनिष्ठविशेष्यतानिरू-पितविषयित्वसम्बन्धावच्छिन्नप्रकारतायाः प्रतियोगितानियामकत्वम्, अर्थानुयोगिकत्वे त्वनुपदो-क्ताया द्वितीयप्रकारताया अनुयोगित्वस्य प्रथमप्रकारतायाश्च प्रतियोगित्वस्य नियामकत्वम्।

इत्थं च प्रथमाकारायाः परमेश्वरेच्छायाः शब्दार्थसम्बन्धत्वे तदीयाया उक्तविशेष्यता-यास्तत्सम्बन्धेन तदिच्छाया वा वाचकत्वस्य तदीयाया उक्तप्रकारतायास्तत्सम्बन्धेन तदिच्छाया वा वाच्यत्वस्य, द्वितीयाकारायास्तस्यास्तत्त्वे तु तदीयाया उक्तप्रकारतायास्तत्सम्बन्धेन तदिच्छाया वा वाचकत्वस्य तदीयाया उक्तविशेष्यतायास्तत्सम्बन्धेन तदिच्छाया वा वाच्यत्वस्य, तृतीया-कारायास्तस्यास्तत्त्वे तु तदीयायाः प्रथमोक्तप्रकारतायास्तत्सम्बन्धेन तदिच्छाया वा वाचकत्वस्य तदीयाया अनन्तरोक्तप्रकारतायास्तत्सम्बन्धेन तदिच्छाया वा वाच्यत्वस्य व्यवस्थापकत्वम्। गगनं न पारिमण्डल्यादित्यादिप्रामाणिकप्रयोगशतानुरोधेन वृत्त्यनियामकस्यापि प्रतियोगितावच्छेदक-सम्बन्धताया अवश्यमभ्युपगमनीयतया "पटो न घटपदवाच्यः" इत्यादेश्च नानुपपत्तिगन्धोऽपि।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ईश्वरेच्छायाः शब्दार्थसम्बन्धत्वे तथाविधस्येश्वरज्ञानस्यापि विनिगमनाविरहेण तत्त्वमवश्यमङ्गीकार्यं स्यादित्यतो हेयोऽयं पक्ष इति तु न संशयितव्यमधुनातनैर्निर्मितेषु यन्त्रग्रन्थगृहादिषु तदीयानां तादृशेच्छानामेव तत्तन्नामव्यवहार्यत्वनियामकतयाऽनादिपरम्पराप्राप्तशब्दार्थव्यवहारस्यापीच्छानिर्वाह्यत्वस्वीकारस्यैवौचित्यात् सम्बन्धतावच्छेदकशरीर इच्छात्वादेरप्रवेशेनानुगमस्य सम्भवतया ज्ञानस्यापि तत्त्वोपगमे बाधकाभावाच्च।

अत्र प्रयोज्यप्रयोजकवृद्धव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय ज्ञानस्य चोपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वाऽसम्बद्धस्य कारणत्वानुपपत्तिज्ञानपूर्वकं कल्प्यमानस्य सम्बन्धस्य स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वघटितस्य ग्रहणमशक्यमिति केषाञ्चित्कथनं न कमनीयम्, तत्तच्छब्दे तत्तदर्थबोधजनकत्वप्रकारकेश्वरेच्छाविषयत्वस्य ग्रहे यदंशे यः प्रकारस्तदंशे तद्विपरीतप्रकारकज्ञानस्यैव विरोधितया तस्य च प्रकृतेऽभावेन तद्ग्रहोत्पत्तेर्निरुपद्रवत्वात्। अनुपपद्यमानतया गृहीतायास्तत्तदर्थबोधजनकताया उपपादकत्वं तद्घटितस्यानुपपन्नमनुपपद्यमानघटितस्य स्वयमनुपपन्नत्वादित्येषापि शङ्का न शोभना, अन्यत्र तस्याः सम्भवेऽप्यत्रासम्भवात्, ईश्वरेच्छाया नित्यतया विषयानधीनत्वेन तदुपपत्तौ तत्र प्रकारविधया स्फुरन्त्या अर्थबोधकतायाः प्रागनपेक्षणात् तत्प्राक्त्वस्यैवाभावात्, विसंवादितायास्तूदीच्ययाऽपि तन्निष्पत्त्या प्रतीघातसम्भवात्। किञ्च वाच्यं नित्येच्छाया जनकत्वानपेक्षणे, जन्येच्छाया अपि जनकत्वप्रकारिकायास्तदनपेक्ष्यैव निष्पद्यमानत्वात्। अत एव तदर्थबोधजनकत्वप्रकारकेच्छाविषयत्वस्य तदर्थबोधजनकत्वतन्त्रत्वेन तदर्थबोधजनकत्वस्य तादृशेच्छाविषयत्वतन्त्रताङ्गीकारेऽन्योन्याश्रय इत्युक्तिरपि न प्राप्यास्पदा।

ईश्वरेच्छायां तत्तच्छब्दे तत्तदर्थबोधकत्वप्रकारकत्वस्य तत्तच्छब्दनिष्ठतत्तदर्थबोधकत्वतन्त्रत्वं नूनमुपगन्तव्यमन्यथा तदर्थावाचकेऽपि तदर्थबोधजनकत्वप्रकारकत्वस्य तत्रापत्तेः; इत्यप्याशङ्का न सङ्गता, तत्र तस्य निसर्गसिद्धताया एव स्वीकर्तव्यत्वादन्यथा शक्तिभ्रमेण लक्षणया वा तदर्थबोधकेऽपि तस्यास्तदर्थबोधकत्वप्रकारकत्वस्यापरिहार्यत्वापत्तेः।

तत्तदर्थबोधजनकत्वस्य तत्तदर्थबोधजनकत्वभ्रमाप्रयुक्ततत्तदर्थबोधजनकत्वप्रकारकेच्छाविषयत्वव्यापकतया तादृशजनकत्वाभावेन तादृशेच्छाविषयत्वाभावस्य सुग्रहतया तत्तच्छब्दे तत्तदर्थबोधजनकत्वाभावग्रहदशायां तादृशेच्छाविषयत्वग्रहो दुर्घट इत्यपि भणितमभव्यमेव; तत्तच्छब्दे तत्तदर्थबोधजनकत्वाभावग्रहदशायां तत्तच्छब्दे तत्तदर्थसम्बन्धग्रहाकल्पनात्, किन्तु तत्तदर्थसम्बन्धे तत्तदर्थबोधजनकत्वाभावव्यापकाभावप्रतियोगित्वरूपान्यथानुपपत्तिज्ञाने सति तादृग्ग्रहदशायामेव तत्कल्पनात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्दस्यार्थबोधकताया ईश्वरेच्छानियम्यतां स्वीकृत्य तयोः सम्बन्धान्तरकल्पनाया निरर्थकीकरणे जन्यजनकयोर्बोध्यबोधकयोः सम्बन्धः क्वापि स्वीकार्यो न स्यात्सर्वत्र "इदमस्माद्भवतु" "अयमनेन साक्षात्कार्यो भवतु", "असावस्मादनुमेयो भवतु" इत्येवमाकारया परमेश्वरेच्छयैव सामञ्जस्यसम्भवादित्यापत्त्युद्भावनमपि न समीचीनम्; "दण्डादितः कपालयोः कलशो भवतु" इतीच्छायास्तज्ज्ञानस्य च सत्त्वेऽपि तयोरसम्बन्धे कलशस्य, "चक्षुषा घटः साक्षात्कार्यो भवतु" इतीच्छायास्तज्ज्ञानस्य च सत्त्वेऽपि तयोरसन्निकर्षे घटचाक्षुषस्य, "धूमाद्वह्निरनुमेयो भवतु" इतीच्छायास्तज्ज्ञानस्य च सत्त्वेऽपि धूमे वह्नेर्व्यभिचाराग्रहे व्यभिचारग्रहे वा वह्न्यनुमितेश्चानुत्पादेन तत्र तत्रापेक्षितसम्बन्धस्य तादृशेच्छया व्यर्थीकरणासम्भवात्। शब्दस्थले तु शब्दार्थयोर्न कश्चित्सम्बन्ध एतादृशोऽनुभवसिद्धो यस्य यज्ज्ञानस्य वाऽभावे "अमुकशब्दादमुकोऽर्थो बोद्धव्यः" इतीश्वरेच्छागोचरज्ञानसत्त्वेऽप्यर्थबोधो न समुन्मिषेत्।

सम्बन्धस्य सम्बन्धिभिन्नत्वविशिष्टद्विष्ठतानियमेन शब्दार्थयोरविद्यमानाया ईश्वरेच्छायास्तयोः सम्बन्धत्वं न सङ्गच्छत इत्यपि वचनं नोचितम्; "यो यः सम्बन्धः स वस्तुविशिष्टः, वैशिष्ट्यं च स्वभिन्नत्व-स्ववृत्तित्व-स्वप्रतियोगिकत्व-स्वभिन्नवस्तुमत्त्वैः। स्वभिन्नवस्तुमत्ता च स्वभिन्नत्व-स्ववृत्तित्व-स्वानुयोगिकत्वैः" इत्येतद्रूपे पर्यवसन्नस्योक्तनियमस्येश्वरेच्छाया विषयतया शब्दार्थनिष्ठत्वोपगमेन निर्वाहात्। संयोगमात्रस्य विस्पष्टद्विष्ठताया दर्शनेन केवलतत्सादृश्यसंरक्षणानुरोधात् स्वत्व-स्वामित्व-जन्यत्व-जनकत्व-स्वरूप-तादात्म्य-कालिक-दैशिक-प्रकारता-विशेष्यता-संसर्गताऽऽधेयताऽऽधारता-प्रतियोगिताऽनुयोगिता-निरूपितत्व-निरूपकत्वादीनामनेकेषां सम्बन्धतोपेक्षाया अनौचित्यात् सामान्यस्य ज्ञानस्य चेन्द्रियसन्निकर्षत्ववादिभिः सम्बन्धस्य निरुक्तद्विष्ठतानियमस्य नितरामेव हेयत्वाच्च।

"विशिष्टबुद्धिनियामकः सम्बन्धः" इति नियमोऽपि नात्र बाधकतया सम्भाव्यः, "घटशब्दो घटीयः, घटो घटशब्दीयः" इत्यादिविशिष्टबुद्धीनामीश्वरेच्छात्मकसम्बन्धनियम्यतोपगमात्। एतादृशी विशिष्टबुद्धिर्नानुभवसिद्धेति तु न शङ्कनीयम्; सम्बन्धान्तरवादिनाप्येतादृश्या एव विशिष्टबुद्धेरङ्गीकार्यत्वात्, "घटशब्दो घटवान्, घटो घटशब्दवान्" इत्याद्याकारायास्तस्याः केनापि सम्बन्धेन स्वाभाविकीत्वस्योपपादनासम्भवात्।

प्रमाणानां जनकत्वतद्घटितसम्बन्धातिरिक्तसम्बन्धेनैव प्रमेयसम्बद्धानां ज्ञानजनकत्वदर्शनेन शब्दार्थयोरपि तादृश एव सम्बन्धो युक्त इत्यपि न वाच्यम्; प्राचीनैश्चक्षुरादिनिष्ठलौकिकचाक्षुषजनकतावच्छेदकसन्निकर्षविशिष्टविशेष्यकचक्षुरादिजन्यज्ञानप्रकारतापन्नधूमत्वादिरूपेण जनकता-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घटितसम्बन्धेन चक्षुरादेर्धूमादिग्राहकत्वस्वीकारात्, प्रकारतादीन् स्वरूपेऽन्तर्भाव्य सम्बन्धत्वे द्रव्याद्यन्यतमत्वनैयत्यं चाभ्युपेत्य शब्दार्थयोः पदार्थान्तरात्मकसम्बन्धकल्पनाया अपि कण्टकाकीर्णीकरणसम्भवाच्च ।

गङ्गायां घोष इत्यादौ गङ्गादिपदेन तीरादेर्बोधात्तदौपयिकज्ञानगोचरीभूतो गङ्गादिपदतीराद्यर्थयोरपि सम्बन्धोऽवश्यं स्वीकार्यः । स च न शक्तिः, तीरादौ गङ्गादिपदप्रयोगाप्राचुर्यात् । किन्तु सामीप्यादिरूपः शक्यसम्बन्ध एव । अप्रसिद्धा शक्तिरेव लक्षणेति तु न शोभनम्; लाक्षणिकशब्देषु लक्ष्यार्थशक्तेस्तज्ज्ञानस्य कारणतायाश्च कल्पने गौरवात्, शक्यसम्बन्धस्य लक्षणात्वे तु स्वरूपतस्तस्य क्लृप्ततया तज्ज्ञाने कारणत्वमात्रस्य कल्पनीयतया लाघवात् । तल्लक्षणं तु शक्तिग्रहाजन्यशाब्दज्ञानौपयिकशब्दार्थसम्बन्धत्वम् ।

लक्षणा च स्वारसिकी निरूढा चेति द्विविधा । तत्राधुनिकतात्पर्यविषयार्थनिष्ठा स्वारसिकी, अनादितात्पर्यविषयार्थनिष्ठा च निरूढेति विवेकः । द्विरेफादिशब्दस्य भ्रमरादौ स्ववाच्यरेफद्वयघटितपदवाच्यत्वरूपा लक्षितलक्षणापि निरूढायामन्तर्भवन्ती न पृथग्गणनार्हा । उक्तयोराद्या जहत्स्वार्थाऽजहत्स्वार्था चेति द्विविधा, अन्तिमा तु प्रायो जहत्स्वार्थैव । आलङ्कारिकास्तु स्वारसिकीं प्रयोजनवतीसंज्ञया व्यपदिश्य तस्याः—गौणी शुद्धेति, गौण्याश्च—सारोपा साध्यवसानेति, शुद्धायाश्च—जहत्स्वार्थाऽजहत्स्वार्था सारोपा साध्यवसाना चेति भेदं वर्णयन्ति । वेदान्तिनश्च शुद्धाभेदेषु जहदजहत्स्वार्थां भागत्यागापरनाम्नीमामनन्ति । तत्सर्वं तैः स्वस्वाभिमतप्रयोजनानुरोधादुपगम्यत इति नात्र तत्तन्मतानामौचित्यानौचित्यचर्चाऽऽचर्यते ।

आलङ्कारिकाः शक्तिलक्षणातो व्यतिरिक्तां व्यञ्जनामपि शब्दार्थसम्बन्धतया गणयन्ति, गङ्गायां घोष इत्यादौ गङ्गादिपदेन तीरादिबोधोत्तरमनुभवसिद्धस्य तीरे शैत्यपावनत्वप्रत्ययस्य प्रकारान्तरेण दुरुपपादत्वात् । परं न्यायनये व्यञ्जनात्मकः सम्बन्धो नावश्यककल्पनाकः, तदुपपादनीयतयाऽभिमतानां प्रतीतीनां क्वचिल्लक्षणया क्वचिल्लिङ्गेन क्वचिच्च ज्ञानलक्षणसन्निकर्षसम्पन्नेन मनसा चोपपादनसम्भवादिति कृतं विस्तरेण ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शाब्दिकमते शब्दशक्तिस्वरूपम्

श्रीभूपनारायणझा, राजकीयसंस्कृतमहाविद्यालयः, काशी।

सामान्येन शक्तिर्द्वेधा—सहजा शक्तिराधेया च। सहजा नाम स्वाभाविकी। यथा वह्नेर्दाहानुकूला, विहङ्गमानामुड्डयनानुकूला च शक्तिः। आधेया नाम कृत्रिमा। यथा प्रस्तरादौ प्रतिष्ठापनया शैवी वैष्णवी च शक्तिः।

तयोः शब्दशक्तिः सहजास्वेव शक्तिष्वन्तर्भवति। शाब्दिकसमये शब्दानां बौद्धविषयाऽर्थानां च नित्यत्वेन तदुभयसम्बन्धरूपायास्तस्या अपि तत्त्वस्यैवौचित्यात्। नैयायिकनये कामं शब्दानामर्थानां च मा भून्नित्यत्वम्, परमीश्वरेच्छारूपतया तस्यास्तत्त्वमेवावकल्पते।

एवं च शब्दशक्तेः सहजात्वेन वह्न्यादिशक्तिभिः साम्यम्। परमियं ज्ञायमानतयैवोपयुज्यते, वह्न्यादिशक्तिस्तु स्वरूपसत्तयैवेति वैषम्यमपि।

सेयं शक्तिस्तार्किकैः प्रतिनियतधर्मावच्छिन्नविषताकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितप्रतिनियतपदत्वावच्छिन्नविशेष्यताशालिनीश्वरेच्छारूपैवाऽमानि। यथा घटपदे घटत्वावच्छिन्नविषयताकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितघटपदत्वावच्छिन्नविशेष्यताशालिनी घटपदं घटत्वविशिष्टं बोधयत्विति वाक्याभिलप्यमानेश्वरेच्छा। तस्याश्च स्वविशेष्यतासम्बन्धेन घटपदे, स्वविषयबोधविषयत्वनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन घटव्यक्तौ, तादृशप्रकारतावच्छेदकतासम्बन्धेन घटत्वजातौ, तादृशप्रकारतावच्छेदकतावच्छेदकतासम्बन्धेन समवाये च सत्त्वेन यथाक्रमं वाचकत्वं वाच्यत्वं वाच्यतावच्छेदकत्वं वाच्यतावच्छेदकतावच्छेदकसंसर्गत्वं च व्यवतिष्ठते।

सा चैकादशे दिवसे पित्रादिसङ्केतितेषु चैत्रादिनामधेयेष्वपि वर्तत एव, "एकादशेऽहनि पिता नाम कुर्यात्" इति श्रुत्या जन्मदिवसानन्तरैकादशदिवसकालिकपित्राद्युच्चारणकर्मत्वरूपेणेश्वरेच्छायास्तत्रापि बोधनात्। आधुनिकसङ्केतितेषु नदीवृद्ध्यादिपदेषु तु सा नास्त्येव मानाभावादिति प्राचीननैयायिकाः।

नव्यनैयायिकास्तु नदीवृद्ध्यादिपदैरप्यर्थबोधमनुरुध्येश्वरेच्छायाः शक्तित्वमिच्छात्वेनैवाभ्युपयन्ति। तथा च पाणिन्यादीच्छाया अपि शक्तित्वेन तादृशैरपि पदैरर्थबोधमुपपादयन्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैयाकरणभूषणकारस्तु चक्षुरादीन्द्रियाणां स्वप्रतिनियतविषयग्राहकत्वमिव शब्दानां यदनादिभूतं स्वप्रतिनियतार्थबोधकत्वं तदेव शक्तिमङ्गीचकार। एवं च तन्नये घटपदं घटत्वावच्छिन्नविषयकबोधजनकत्वेन ज्ञायमानं तदवच्छिन्नविषयकबोधं जनयति।

सौगतास्तु शब्दानामर्थैः सह तादात्म्यमेव शक्तिमूरीकृत्य यस्य शब्दस्य येनार्थेन सह तादात्म्यं तेन तद्बोधं व्यवस्थापयन्ति।

अत्रोच्यते—न तावत्तार्किकाभ्युपेतं शक्तिस्वरूपमुपपद्यते, शक्तिग्राहकशिरोमणिना प्रयोज्यप्रयोजकवृद्धव्यवहारेण तस्या दुर्ग्रहत्वात्। तथा हि—प्रयोजक-(प्रवर्तक)वृद्धोदीरितं घटमानयेति वाक्यमाकर्ण्य घटमानयन्तं प्रयोज्य-(प्रवर्त्य)वृद्धमवेक्षमाणो बालको घटानयनं प्रवृत्तिजन्यं चेष्टात्वाद् मदीयस्तन्यपानादिचेष्टावदित्यनुमानेन प्रयोज्यवृद्धस्य घटानयनानुकूलप्रवृत्तिमनुमाय, सा प्रवृत्तिर्घटकर्मकानयनधर्मिककार्यताज्ञानजन्या प्रवृत्तित्वाद् मदीयप्रवृत्तिवदित्यनुमानेन घटकर्मकानयनधर्मिककार्यताज्ञानं प्रयोज्यवृद्धस्यानुमाय, तच्च कार्यताज्ञानं घटमानयेति वाक्यजन्यं तदन्वयव्यतिरेकानुविधायित्वादित्यनुमानेन तत्र वाक्ये तादृशज्ञानजनकत्वमनुमिनोति। अनन्तरं चावापोद्वापगृहीतान्वयव्यतिरेकाभ्यां पदेष्वपि पदार्थबोधजनकत्वमवगम्य तत्तद्विषयासन्निकृष्टानामिन्द्रियाणां तत्तद्विषयकप्रत्यक्षजनकत्वस्येवार्थासम्बद्धानां पदानामर्थबोधजनकत्वस्यानुपपत्त्या तदुपपादकत्वेनार्थपदयोः शक्तिरूपमेवासौ सम्बन्धं कल्पयति।

सा च शक्तिरनुपपद्यमानत्वेन ज्ञायमानार्थबोधजनकत्वघटिता स्वयमसिद्धन्यायेन नार्थबोधजनकत्वमुपपादयितुमीष्टे, आत्माश्रयात्। नतरां च तदुपपादकविधया कल्पनामर्हतीति व्यवहारस्य शक्तिग्राहकत्वोच्छेदापत्तिः।

किञ्च, प्रतियोग्यनुयोगिभ्यां व्यतिरिक्तत्वे सति तदुभयवृत्तित्वे सति तयोर्विशिष्टबुद्धिनियामकत्वरूपं सम्बन्धत्वमपि तस्या नोपपद्यते, समवायेनात्मवर्तिन्या इच्छाया अर्थशब्दरूपप्रतियोग्यनुयोगिवृत्तित्वाभावात्; तन्निरूपितविषयतासम्बन्धस्य वृत्त्यनियामकत्वेन तेनापि तदुभयवृत्तित्वस्य दुरुपपादत्वाच्च। अत एव इच्छाविषयेऽपि घटे 'इच्छावान् घटः' इति प्रतीतिर्न कस्यचिदुन्मिषति।

अथ विषयताया आश्रयतानियामकत्वमकामैरपि वैयाकरणैरङ्गीकरणीयमेव। अन्यथा औपश्लेषिकाभिव्यापकवैषयिकभेदैस्त्रिविधेष्वाधारेषु वैषयिकाधारगणनमनुपपन्नम्, विषयतासम्बन्धावच्छिन्नाधेयतानिरूपिताधारताया एव वैषयिकाधारतात्वात्। अत एव मोक्षे इच्छाऽस्तीत्यत्र सप्तमी सिद्ध्यति। तदेव च वाक्यं मोक्षेच्छयोरतादृशमाधाराधेयभावमप्यभिलपति। एवं च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तुल्यवित्तिवेद्यन्यायेन मोक्ष इच्छावानिति प्रतीतिरपि वैयाकरणैरुररीकरणीयैव, एवं घटो ज्ञानवानिति प्रतीतिरपि। तथा च पदेऽपीच्छावत्त्वप्रतीतिः किं न भवेदिति चेत्; एवमपि मुख्यविशेष्यतासम्बन्धस्य पदे पदमुख्यविशेष्यकेच्छाश्रयतानियामकत्वसम्भवेऽपि स्वविषयबोधविषयत्वनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेनार्थे तादृशेच्छाश्रयत्वप्रतीतेरनुपपत्तिरेव, रसो रूपवानिति प्रतीतेः प्रमात्वापत्तिवारणाय परम्परासम्बन्धस्याश्रयतानियामकत्वानभ्युपगमात्।

किञ्च, विनिगमनाविरहेणोक्तपदविशेष्यकेश्वरेच्छायाः, अस्मात्पदादयमर्थो बोद्धव्य इत्यर्थविशेष्यकेश्वरेच्छाया वा, अस्मात्पदादेतदर्थबोधो भवत्विति बोधविशेष्यकेश्वरेच्छाया वा, एतदर्थनिष्ठविषयतैतत्पदजन्यबोधनिरूपिता भवत्वित्यर्थनिष्ठविषयताविशेष्यकेश्वरेच्छाया वा, तादृगीश्वरज्ञप्तेर्वा, तादृगीश्वरीयकृतेर्वा शक्तित्वमिति निर्णेतुमशक्यम्। सर्वासामपि तासां तत्त्वे तु महद्गौरवम्।

किञ्चैवं घटजनकत्वप्रकारकेश्वरेच्छाविशेष्यत्वरूपमेव दण्डे घटजनकत्वं स्यादेवमन्यस्याप्यन्यजनकत्वमिति लोकतन्त्रप्रसिद्धं तद्व्यतिरिक्तं कारणत्वमप्युच्छिद्यताम्। ननु दण्डस्य घटोत्पत्त्यधिकरणे घटोत्पत्तिपूर्वक्षणावच्छिन्नस्वरूपसत्तयैव घटजनकत्वमिति तदनुसारमन्यथैतन्निरुच्यते, पदानां तु स्वज्ञानपुरस्कारेणैवार्थबोधजनकत्वमिति तदीया शक्तिरीदृगुच्यत इति चेदेवमपि धूमज्ञानजन्योत्पत्तिकत्वप्रकारकेश्वरेच्छाविषयज्ञानविषयत्वस्यैव धूमस्य वह्निना व्याप्तिस्थानीयसम्बन्धस्य सम्भवेन विलीयेत व्याप्तिरपि वराकीति महाननर्थ आपतेद्व्याप्तिमुपजीवतां तत्र भवतां नैयायिकानाम्।

किञ्च, "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रे भगवदक्षपादोपक्षिप्तप्रमाणचतुष्टयान्तःपातिनः शब्दप्रमाणस्यापि प्रमाणान्तरवदेव प्रमेयसम्बन्ध आस्थेयः, असम्बद्धप्रमेयविषयकप्रमाकरणत्वस्याव्यवस्थापत्तिग्रस्तत्वात्। प्रमाणान्तराणां च प्रमेयविषयबोधजनकत्वतद्घटितान्य एव प्रमेयसम्बन्ध इति शब्दप्रमाणस्यापि तादृशेनैव प्रमेयसम्बन्धेन भाव्यं नान्यादृशेन। तस्मादीश्वरेच्छायाः स्वरूपतः कार्यसामान्यं प्रति कारणतायाः क्लृप्ततया काममस्तु पदैरर्थबोधरूपं कार्यं प्रत्यपि कारणता, परं शब्दशक्तिविधया कारणत्वं न सम्भवत्येवेत्यवधेयम्।

भूषणकारवैयाकरणोक्ता बोधजनकत्वरूपा शक्तिरपि नोपपद्यते, दर्शितदिशा शब्दनिष्ठार्थबोधजनकत्वानुपपत्तिज्ञानेन कल्प्यमानायाः शक्तेरर्थबोधजनकत्वरूपत्वासम्भवात्। नहि स्वेनैव स्वमुपपादयितुं शक्यते, आत्माश्रयग्रस्तत्वात्।

किञ्च, अर्थबोधजनकत्वस्य शब्दवृत्तित्वेऽप्यर्थवृत्तित्वाभावेन प्रतियोग्यनुयोगिवृत्तित्वघटितं शब्दार्थसम्बन्धत्वमपि नावकल्पते। विषयविधयाऽर्थस्यापि स्वबोधजनकत्वमिति चेत्; एवमप्यर्थ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्दयोर्विशिष्टबुद्ध्यनुपपत्तिः, दण्डकुलालयोर्घटजनकत्वेऽपि तेन सम्बन्धेन दण्डवान् घट इति विशिष्टबुद्ध्यनुदयात्। संयोगसम्बन्धेनैव तदुदयाच्च।

सौगताभ्युपगतमर्थशब्दयोस्तादात्म्यस्यापि शक्तिरूपत्वं नोपपद्यते। तादात्म्यं हि तद्भिन्नत्वे सति तदभेदप्रकारकारोपविशेष्यत्वरूपं वाच्यम्। इतरथा कृपाणपदोच्चारणे वदनविदारणापत्तिः, मधुशब्दोच्चारणे मुखे मधुरिमापत्तिश्च।

एवं च तद्धटकभेदस्य किमुताभेदस्य शब्दार्थसम्बन्धत्वमास्थीयते तैः? नाद्यस्य, तस्य सम्बन्धतायाः क्वचिदप्यदृष्टत्वात्। नान्त्यस्य, तस्यानुयोगिप्रतियोगिव्यतिरिक्तत्वाभावेन सम्बन्धत्वायोगात्।

स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वेन नैयायिकैर्निरुच्यमानस्य तस्य प्रतियोग्यनुयोगिवृत्तितद्व्यक्तित्वरूपासाधारणधर्मरूपतया प्रतियोग्यनुयोगिव्यतिरिक्तत्वेन तत्त्वमुपपन्नमिति चेत्; तथापि तस्य संसर्गत्वे नीलो घट इत्यत्रापि नीलशब्दात् षष्ठ्यापत्तिः। कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनेति व्युत्पत्त्यनुसारं राजपौरुष्यमित्यादौ राजपुरुषयोः स्वस्वामिभावादिसम्बन्धस्येव नीलघटत्वमित्यत्र घटे नीलाभेदसम्बन्धस्याभिधानापत्तिश्चेत्यकामेनापि तस्य संसर्गत्वाभाव एष्टव्यः।

राहोः शिर इत्यादावप्यवयवावयविभावसम्बन्ध एव षष्ठी, दिवसात्मककालावच्छिन्नस्य शिरसो राहुपदबोध्यतया घटिकात्मककालावच्छिन्नस्य तु तस्य शिरःपदबोध्यतया औपाधिकावयवावयविभावस्य तत्रापि सूपपादत्वात्। एतेन तत्र षष्ठ्यर्थमभेदस्य संसर्गत्वाभ्युपगमोऽपास्तः। तथा सति तत्रैव नीलो घट इत्यत्रापि षष्ठ्यापत्तेश्च।

कस्तर्हि नीलो घट इत्यत्र नीलत्वावच्छिन्नप्रकारतावच्छेदकः संसर्ग इति चेत्; तादृशवाक्यनिष्ठशक्तिभास्यः सम्बन्धानवच्छिन्नविशेष्यविशेषणभाव एवेत्यवेहि। विशेष्यविशेषणभावस्य च वाक्यसामान्यशक्यतया प्रथमान्तेतरप्रकारताप्रयोजकपदघटितवाक्यजन्यबोधे स्वस्वामिभावादिसम्बन्धावच्छिन्नस्य तस्य संसर्गता, प्रथमान्तप्रकारताप्रयोजकपदघटितवाक्यजन्यबोधे तु सम्बन्धानवच्छिन्नस्य व्यवस्थोपपत्तिः। एवं च विशेष्यविशेषणभावसंसर्गस्य वाक्यार्थतया घटघटत्वादिपदार्थपदार्थतावच्छेदकयोः समवायसंसर्गस्येव शेषपदार्थत्वाभावेन नापद्यते षष्ठ्यपीति सर्वमुपपद्यते।

ननु ज्ञानीयविषयताविशेषयोर्विशेषणताविशेष्यतयोर्ज्ञाननिरूप्यतया ज्ञानात् प्रागप्राप्ततया ज्ञानीयविषयताप्रयोजकत्वं कथमिति चेन्न; ज्ञानीयप्रकारताविशेष्यताभ्यामनयोर्वैलक्षण्यात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथा हि—विशेषणत्वं नाम तदधीनस्थितिकत्वम्। विशेष्यत्वं च तत्स्थितिनियामकत्वम्। यथा नीलो घट इत्यत्र गुणद्रव्ययोः। एवं चास्य विशेष्यविशेषणभावस्य ज्ञानानपेक्षवस्तुधर्मतया ज्ञानीयविषयतावच्छेदकत्वं निर्बाधम्। राज्ञः पुरुष इत्यादौ तु राज्ञः स्वरूपतो न पुरुषाधीन-स्थितिकत्वम्, किन्तु स्वामित्वेनैव। एवं पुरुषस्य न स्वरूपतो राजस्थितिनियामकत्वमपि तु स्वत्वेनैवेति तयोर्विशेष्यविशेषणभावस्य स्वस्वामिभावप्रयोज्यतया स्वस्वामिभावसम्बन्धावच्छिन्न-त्वमुपपद्यते। एवं चेदृशविशेष्यविशेषणभावप्रयोजकसम्बन्ध एव षष्ठी प्रवर्तते। गुणादीनां द्रव्येण सह तु स्वरूपत एव विशेष्यविशेषणभाव इति तत्प्रयोजकतया कस्यचित् सम्बन्धस्य कल्पनायां मानाभावेन न तत्र षष्ठीत्यलम्।

भूतले घटो नास्तीति प्रत्यक्षे भूतले घटाभावभाननियामकसन्निकर्षविधयेदृशविशेष्य-विशेषणभावस्य नैयायिकैरप्यङ्गीकारेण नास्माकमक्लृप्तकल्पनाप्यापद्यते। पदार्थयोस्तादृश-विशेष्यविशेषणभावभानप्रयोजको वाक्यशक्तिग्रहः, पदार्थपदार्थतावच्छेदकयोस्तद्भाननियामकस्तु घटपदं घटत्वनिष्ठविशेषणतानिरूपितविशेष्यत्वावच्छिन्ने शक्तमिति पदशक्तिग्रहः, प्रत्यक्षे तद्भान-नियामकस्तु स्वरूपविशेष एवाभ्युपेयते।

तादृशविशेष्यविशेषणभावस्य ज्ञाने भानादेवानुव्यवसायेऽपि सर्वानुभवसाक्षिकं भानमुप-पद्यते। व्यवसायेऽभातवस्तुनोऽनुव्यवसाये भानायोगात्। अत एव च तदुत्तरं मनागपि तत्संशयो नोन्मिषति।

तस्मान्मीमांसकदिशा वाच्यवाचकभावाख्यं पदार्थान्तरमेव शब्दशक्तिपदेऽभिषेकमर्हति। तद्ग्रहे चेतरेतराध्याससिद्धं शब्दार्थयोस्तादात्म्यमेव सङ्केतात्मनोपयुज्यते। इत्यलम्॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विविधम्

शून्य-निःस्वभाव-निरालम्बशब्दार्थविचारः

भारतीयदर्शनं परस्परमादानप्रदानाभ्यां प्रचयमुपगच्छद्यथा नवनवप्रस्थानानि प्राकाशयत्तथैव संप्रदायभेदाद् ग्रन्थलोपात् स्वगुरुपरम्परायातमिथ्याज्ञानगौरवाद्वा तत्त्वार्थमहत्त्वमनपेक्ष्य परस्परं धूलिप्रक्षेपेणाऽशास्त्रार्थवैपुल्यमपि व्यदधात् । शास्त्रार्थविपर्ययेणानेन न केवलं तत्त्वार्थचिन्तनमेव प्रहीणमभवत्, अपि तु भारतीयदर्शनेषु नूतनतत्त्वानामाचयनमप्यस्तमिवागात् । एतज्ज्ञानविप्लवं दूरीकर्तुमधुना विद्वद्भिः स सकलः पूर्वपक्षभूतः शास्त्रार्थः पुनस्तत्प्रस्थानानुरोधिसंप्रदायग्रन्थैः परिष्करणीयः, येन प्राचीनाभिमतानि तत्त्वजातानि सम्यग् विज्ञाय भारतीयदर्शनेषु प्रमाणप्रमेययोर्नवीनमालोचनं पुनः प्रभवेत् ।

शून्यता

नाविदितं मनीषिणां यन्न्यायवेदान्तादिमूर्धन्यदर्शनानां विकासो विस्तारो वा बौद्धदार्शनिकानां प्रतिवादितयैवाभवत् । परं चैतेषु वादिप्रतिवादिदर्शनेषु स्वस्वमतव्यवस्थापनायाचार्यैर्व्याख्यातृभिश्च तदनुकूलं पूर्वपक्षं प्रकल्प्य यो हि परकीयशास्त्रविपरीतोऽर्थः प्रख्यापितः स सर्वोऽपि साक्षात्परम्परया वा तत्त्वार्थाधिगमविरुद्ध एव । माध्यमिकानां शून्यवादमधिकृत्य परैर्ये विकल्पाः कृतास्ते प्रायशः शून्यतत्त्वानाकलनमूला एव । भारतीयदर्शनेषु वेदान्तस्य तत्राप्यद्वैतवादस्य प्रामुख्यमित्यत्र नास्ति प्रायशो विमतिः, नापि च शून्याद्वयवादस्तदुपजीवकस्य शाङ्कराद्वैतवादस्य पूर्वभूमिरित्यत्र । यद्यपि ब्रह्मतत्त्वस्य निर्विकल्पकत्वं प्रपञ्चस्य च मायिकत्वमन्तरा निःस्वभावाजातवादयोस्तत्त्वज्ञानं न बुद्धिपथमारोहति तथापि महर्षिवात्स्यायन-कुमारिलभगवत्पादशङ्कराचार्या अपि पामरैराख्यातोऽभावाऽसदलीकनिषेधापरपर्याय एव शून्यशब्द इति स्वीकृत्य शून्यतत्त्वं खण्डयन्तीति चित्रम् ।

"न स्वभावसिद्धेर्भावानाम्" [न्याय० ४।१।३८] इति सूत्रस्य व्याख्यानं कुर्वता महर्षिणा वात्स्यायनेन—"सोऽयमभावस्य निरुपाख्यत्वात् संप्रत्यायकोऽर्थभेदो न स्यात् । अस्ति त्वयम् । तस्मान्न सर्वमभाव इति" इति यदुक्तं तद्वाचस्पतिना तात्पर्यटीकायाम्—"कुतोऽत्यन्ताऽसतः कल्पनागोचरत्वमपि" [४।१।३७] इत्याद्युक्त्या सुदृढीकृतम् । भट्टपादैः श्लोकवार्त्तिके शून्यवादखण्डनावसरे—"अपोहो नह्यभावस्य कथञ्चिदुपपद्यते", "कल्पितं स्यादपोह्यं चेन्नात्यन्ता-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्यकल्पना", "भावो न गृह्यते येन तस्याभावेषु का कथा", "इति बहिर्विषयप्रतिपादनात्तद्भावकृता मतिसंवृतिः" इत्यादिभिर्न शून्यवादे प्रमाणप्रमेयभावसिद्धिरिति सिद्धान्तितम्। भगवत्पादैश्च शून्यवादिपक्षे प्रमाणप्रमेयभावं सर्वथाऽसहमानैः "क्षणिकत्वाच्च" [ब्र०सू० २।२ ३१] इति सूत्रव्याख्याने—"शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्धः" इत्युक्त्वा तन्निराकरणायाध्यादरो न क्रियते। अत्र च भामत्यां वाचस्पतिमिश्रमहाभागाः—"विचारासहत्वं वस्तूनां तत्त्वं व्यवस्थापयद्बाधकमतात्त्विकत्वं प्रमाणानां दर्शयति" इति बौद्धपक्षं स्वीकृत्यापि, "आरोपितं निषेधनीयम्। आरोपश्च तत्त्वाधिष्ठानो दृष्टः" इति प्रख्यातयुक्त्या शून्यवादं खण्डयन्ति। परं च सर्वं एवैतादृशा वादा अनाकलितशून्यतत्त्वानामिति शून्यवादिनां ग्रन्थालोचनेनानायासेनैव प्रतीयते। तदिह स्तोकं प्रतन्यते।

माध्यमिकत्वं खल्वस्तिनास्तिदृष्ट्योः परिहाणम्। शाश्वतवादिनां वेदान्तिप्रभृतीनामस्तिदृष्टिरित्येकोऽन्तः, उच्छेदवादिनां चार्वाकादीनां नास्तिदृष्टिरित्यपरोऽन्तः। एतावुभावपि विकल्पप्रत्ययौ। अतस्तौ विहाय मध्ये तत्त्वं स्फुरतीति मध्यमागमाध्येतृत्वेनैतेषु माध्यमिकत्वं निष्पद्यते। उक्तं च समाधिराजसूत्रे—"मध्ये हि स्थानं प्रकरोति पण्डितः" इति। अत एव संसारस्य निर्वाणस्य चापि द्वे कोटी स्तः, तयोरन्तरा एव किञ्चित् सुसूक्ष्मं परमार्थतत्त्वं जृम्भते। तदुक्तं निर्वाणपरीक्षायामाचार्यनागार्जुनेन—"विद्यादनन्तरं किञ्चित् सुसूक्ष्मं विद्यते" इति। समाधिराजे चाग्रे उक्तम्—"अस्तीति नास्तीति उभेऽपि मिथ्या" इति। एतद्धि तत्त्वं न सत्, नाऽसत्, न सदसत्, नानुभयात्मकमिति कृत्वा चतुष्कोटिविनिर्मुक्तं परिपश्यन्तः शून्येत्याख्यया संबोधयन्ति शून्यवादिनः। भावमपेक्ष्यैव यतोऽभावो भवति भावश्च प्रतिषिद्ध्यते, अतः शून्यं कथमप्यभावपर्यवसन्नं न भवति। एतदेवाभिलक्ष्योक्तमाचार्यचन्द्रकीर्तिना—"भावाभावदर्शनद्वयप्रसङ्गो यावत्तावत्संसार इत्यवेत्य मुमुक्षुभिरेतद्दर्शनद्वयनिरासेन सद्भिर्मध्यमाप्रतिपद्भावनीया" [मा० वृ०–पृ० २७६] इति। एवं च सहस्रशो माध्यमिकवचनैर्माध्यमिकत्वसिद्धयेऽभावदृष्टेः प्रतिषेधः करणीय इति सिद्ध्यति।

एतेषां माध्यमिकत्वमनवधार्यैव परैरसत्त्वारोपोऽपि कृतः। लङ्कावतारे त्वसद्दृष्ट्यपेक्षया पुद्गलदृष्टिरेव श्रेयसीति शून्यवादिनामाग्रहो दृश्यते—"वरं खलु सुमेरुमात्रा पुद्गलदृष्टिर्न त्वेव नास्त्यस्तित्वाभिमानिकस्य शून्यतादृष्टिः" [पृ० १४६] इति। आचार्यनागार्जुनेन च विग्रहव्यावर्त्तन्यां सत्सु सर्वभावेषु शून्येषु, अविद्यमाने प्रतिषेध्ये, न माध्यमिकेषु प्रतिषेधवादित्वारोपः समीचीन इत्यभिप्रेत्योक्तम् - "प्रतिषेधयामि नाहं किञ्चित्, प्रतिषेध्यमस्ति न च किञ्चित्" [का० ६४] इति। प्रपञ्चं निरस्याद्वैतनिर्वाणवद्योतनायैव माध्यमिकानामस्तिनास्तिकोटिनिरासे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आग्रहः। एतदुद्दिश्यैव चन्द्रकीर्तिनोक्तम्—"न वयं नास्तिकाः। अस्तित्वनास्तित्वनिरासेन तु वयं निर्वाणपुरगामिनमद्वैतपथं विद्योतयामः" [मा० वृ०–पृ० ३६८] इति। माध्यमिकानामयमत्राभ्युपगमो यन्नास्तिकाः प्रपञ्चस्यापवादं कुर्वन्ति न तु माध्यमिकाः, तैः प्रपञ्चस्य संवृतिसत्त्वाभ्युपगमात्। अतो न नास्तिकैर्माध्यमिकानां तुल्यता युक्ता।

अपि च माध्यमिका द्वे सत्ये समामनन्ति—लोकसंवृतिसत्यं परमार्थसत्यं च। उपेयस्य परमार्थसत्यस्यावाप्तये उपायभूतस्य व्यवहारसत्यस्यास्तित्वं ते साधयन्ति। अतिगभीरं शून्यं तत्त्वमवबोद्धुं सत्यद्वयस्वीकारोऽनिवार्यो भवति। अत एवोक्तं नागार्जुनेनार्यसत्यपरीक्षायाम्—"येऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः। ते तत्त्वं न विजानन्ति गभीरं बुद्धशासने॥" इति। यतश्च -"व्यवहारमनाश्रित्य परमार्थो न देश्यते। परमार्थमनाश्रित्य निर्वाणं नाधिगम्यते॥" [मा० का० २४।१६–२०], अतोऽलीकविरुद्धं सत्यद्वयमाश्रीयते माध्यमिकैरित्यत्र न विवादः। इत्थं तत्त्वस्यापि शून्यताभिधानं सांवृतिकमेव। एवं च सत्यद्वयाधिगम्येऽनुच्छिन्नेऽशाश्वतेऽद्वयरूपे निर्वाणे स्वीकृतेऽपि माध्यमिकैः, तेष्वलीकाभ्युपगन्तृत्वारोपः कल्पित एव।

निःस्वभावता

शून्यशब्दवद् माध्यमिकानां निःस्वभावशब्देनाप्यन्येषां तेष्वसद्वादित्वभ्रमो भवति। परं चालोच्यमाने, आवरणनिवृत्त्या सर्वारोपविनिर्मुक्ततत्त्वप्रकाशनार्थं निःस्वभाववाद एकमेव शरणमिति सिद्धयति। उक्तं हि लङ्कावतारे—"बुद्धया विवेच्यमानो हि स्वभावो नावधार्यते। तस्मादनभिलप्यास्ते निःस्वभावाश्च देशिताः॥" [पृ० १७५] इति। निःस्वभावत्वं हि प्रतीत्यसमुत्पन्नस्य भवति। प्रतीत्यसमुत्पादो हि न स्वतः, नापि परतः, न द्वाभ्याम्, नाप्यहेतुतो भावा उत्पद्यन्त इति साधयन् शून्यं निर्विकल्पं तत्त्वमपि प्रकाशयति। अत एव प्रतीत्यसमुत्पादस्य शून्यतेत्यप्यभिधानम्—"यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्षते" [मा० का० आ० प०] इत्यादौ। भगवताप्युक्तम्—"यः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति" इति। आचार्यनागार्जुनेनाप्युक्तम्—"यदि स्वभावतो भावा भवेयुर्हेतुप्रत्ययाभावेऽपि भवेयुः। न चैवं भवन्ति, तस्मान्निःस्वभावाः। निःस्वभावाच्छून्या इत्यभिधीयन्ते" [वि० व्या०टी०–पृ०२२]। शून्यताबोधश्च सम्यग्ज्ञानम्, तदेव च तत्त्वम्। इत्थं संसारनिर्वाणयोरेकमेव तत्त्वं ख्यापितं भवति। एकमेव तत्त्वमविद्यावशात् प्रपञ्चस्तदेव विद्यावशात्तत्त्वमिति सिद्धयति। उक्तं च बोधिचर्यावतारपञ्जिकायाम्—"सम्यग्दृशां यो विषयः स तत्त्वं मृषादृशां संवृतिसत्यमुक्तम्" [पृ० ३६१] इति। एतेन जगति स्वभावशून्यता तत्त्वे च प्रपञ्चशून्यताऽवधेया। वस्तुतस्तु शून्यतादृष्टिर्निर्विकल्प-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्त्वप्रकाशाय सर्वग्राहाभिनिवेशानां निषेधमात्रम्। तस्या अपि सांवृतिकत्वात् परिहाणमेवेष्टम्। उक्तं हि नागार्जुनेन—"येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे" [मा० का० २५।२४] तथा—"शून्यमिति न वक्तव्यमशून्यमिति नो भवेत्। उभयं नोभयं चेति प्रज्ञप्त्यर्थं तु कथ्यते॥" [मा० का० २२।११] इति। एवमेवान्यानात्मवादिनामिव माध्यमिकानां नयेऽनात्मदृष्टिर्न प्रसक्ता भवति। उक्तं च—"बुद्धैरात्मा न चानात्मा कश्चिदित्यपि देशितम्" [मा० का० १८।६] इति। अयं हि निःस्वभाववादो भावानां निःस्वभावत्वं प्रतिपादयन्नपि प्रमाणप्रमेयाद्यभावं न सहते। उक्तं ह्याचार्यचन्द्रकीर्तिना—"न कर्मकर्तृफलादिकं नास्तीति ब्रूमः। किन्तर्हि निःस्वभाव-मेतदिति व्यवस्थापयामः" [मा० वृ०—पृ० ३२९]। एवं माध्यमिकनये निर्विकल्पतत्त्वपरया एतया निःस्वभावदेशनया जगतः सांवृतिकसत्यत्वं तत्त्वस्य पारमार्थिकसत्यत्वं च सिद्ध्यति। तस्यालीकत्वमसत्त्वं च दूरेऽपास्तम्।

निरालम्बता

शून्यनिःस्वभावशब्दार्थवद् निरालम्बशब्दार्थेऽपि परेषां भ्रमो दृश्यते। ते हि माध्यमिकानां प्रत्ययेषु निरालम्बनत्वाभ्युपगमात् सर्वालीकत्वं प्रतियन्ति। परं चायं बौद्धानां निरालम्बनतावादो निष्ठायां परमार्थतत्त्वे विश्राम्यति। अनेनैव निरालम्बबोधेन तत्त्वस्याद्वयीकरणम्, बुद्धेश्च निरा-धारायाः प्रशमः, प्रपञ्चस्याजातत्वम्, मुक्तिः, महाकरुणालाभश्चेत्यादि सर्वं संपद्यते। उक्तं हि भवसंक्रान्तिसूत्रे—"अनाधारमिदं सर्वम्" इति। न केवलं बुद्धिरेव निरालम्बाऽपि तु बुद्धः, निर्वाणम्, बुद्धवचनं सर्वं चैतन्निरालम्बमेव। अत एवाऽवाङ्मनसगोचरमेतत्तत्त्वमिति बुद्धानामपि देशनानर्हतां प्रतिपादयताऽऽचार्यासङ्गेनोक्तम्—"बुद्धो नैव च देशितो भगवता प्रत्यात्मवेद्यो यतः" [महा० सूत्रा० १२।२] इति। अपि च—"अनक्षरस्य धर्मस्य श्रुतिः का देशना च का। श्रूयते देश्यते चापि समारोपादनक्षरः॥" [बोधि० पं—पृ० ३६५] इति भगवतो वचनम्।

तथागतो हि प्रतिबिम्बभूतः कुशलस्य धर्मस्य अनास्रवस्य।
नैवात्र तथता न तथागतोऽस्ति बिम्बे च संपश्यति सर्वलोकः॥
अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम्।
आकाशे न स्थिता ग्रन्थिराकाशे नैव मोचिता॥ [मा० का० २५।३०-३१]

इति च पद्यद्वयं तममुमेवार्थं प्रतिपादयतः।

अस्यामेव निरालम्बभूमौ निराधारकरुणाप्रज्ञाचक्षुरुदेति। अयमेव भगवतो बुद्धगुणनीत-भागीयो धर्मकायः, यः प्रज्ञापारमितयाऽन्वितः स्वानुत्तरया बोध्या युक्तः सन् करुणाप्रवाहेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चिरतप्तान् सत्त्वान् शीतीकरोति। उक्तं च राष्ट्रपालपरिपृच्छायाम्—"बोध्यङ्गधारसुखशीतलवृष्टिजालैः शीतीकरोति च जगच्चिरकालतप्तम्" इति। इमामवस्थामधिगम्यैव महायानिकैर्निर्वाणमपि नीरसं परिज्ञाय परिहीयते। उक्तं च भगवता—"मुच्यमानेषु सत्त्वेषु ये ते प्रामोद्यसागराः। तैरेव ननु पर्याप्तं मोक्षेणारसिकेन किम्॥" इति। अस्यां निरालम्बभूमावधिगतायां स्वभावानुपगतत्वान्न मोक्षस्यापि सत्त्वमित्युक्तं चतुःशतके नित्यार्थप्रतिषेधसंदर्शने—"उपायाद् बन्धनाद् बन्ध्यादन्यो भवेद्यदि। न तस्माज्जायते किञ्चिन्मोक्षः स इति नोच्यते॥" इति।

एतदद्वयं निरालम्बमचिन्त्यमनाश्रयं मोक्षस्वरूपमभिलक्ष्यैवोक्तं सद्धर्मपुण्डरीके—"सर्वधर्माः समाः सर्वे समाः समसमाः सदा। एवं ज्ञात्वा विजानाति निर्वाणममृतं शिवम्॥" इति। एवं निरालम्बभूमौ तत्त्वस्यैतत्सर्वेषां समत्वं पर्यालोच्योक्तमाचार्यनागार्जुनेन—"अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम्। निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम्॥ अप्रहीणमसंप्राप्तमनुच्छिन्नमशाश्वतम्। अनिरुद्धमनुत्पन्नमेवं निर्वाणमुच्यते॥" [मा० का० १८।६] इति। एवं च सर्वविकल्पोपशमान्निरिन्धनवह्निवन्निर्वृत्तिमुपयाति जीवः। एतदेव निरालम्बतत्त्वं प्रज्ञापारमिता, शून्यता, तथता, भूतकोटिः, धर्मधातुः, ध्रुवम्, अमृतम्, अच्युतम्, निर्विकल्पमित्यादिशब्दैः संवृत्या समारोपेणाभिधीयते। अमुं निरालम्बतत्त्वमनधिगम्यैव परैर्मोक्षाय सदधिष्ठानसाक्षात्कारोऽपेक्ष्यते, अनैवंवादिनि पक्षे जगतो मिथ्यात्वासंभवो निर्वाणासंभव इति चारोप्यते। परं च निरालम्बपक्षे प्रपञ्चस्याजातत्वेन मायोपमस्वीकारान्न मायावादविवर्तवादयोः प्रसरः, दूरे तदुपजीवकस्य सदधिष्ठानो भ्रम इति वादस्य। अपोहवादेनापि तत्त्वस्य निर्विकल्पत्वरूपनिरालम्बत्वमन्यानारोपानपोह्य सङ्केत्यते। अत एवावस्तुप्रतिभासिनः शाब्दाः प्रत्यया इति सिद्ध्यति। उक्तं चाचार्यधर्मकीर्तिना प्रमाणवार्त्तिके—"समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते" [३।४८], "मिथ्यावभासिनो वैते प्रत्ययाः शब्दनिर्मिताः" [२।१६६] इति। आचार्यरत्नकीर्तिना चापोहसिद्धौ—"स्थाप्यो वाच्यस्तत्त्वतो नैव कश्चित्" [पृ० १६] इति।

एवं तत्त्वपर्यालोचनया माध्यमिकेष्वसत्त्वाभावालीकनिषेधवादित्वारोपोऽनालोच्यैव कृत इत्यनायासेन सिद्ध्यति। शून्यतत्त्वस्य गभीरत्वमनालोच्य तद्ग्रहणे तस्मात् त्रास एवोत्पद्यत इति युक्तमुक्तम्—"विनाशं याति दुर्दृष्टो धर्मोऽयमविपश्चितः" इति। आर्यदेवेन चोक्तं चतुःशतके—"स च शून्यतार्थो जगतामतीवोत्रासकरत्वादप्रियावेदननिपुणपुरुषेण राज्ञः प्रियभार्यामरणक्रमावेदनसौमनस्योत्पादनवत् कयापि युक्त्या विदुषामवतार्यः" इति॥

श्रीजगन्नाथ उपाध्यायः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वास्तवचन्द्रशृङ्गोन्नतौ स्थलविशेषद्वयविमर्शः

(१)

महामहोपाध्यायपरमगुरुश्रीसुधाकरद्विवेदिविरचितवास्तवचन्द्रशृङ्गोन्नतिः सिद्धान्तरस-लोलुपानां चेतो हर्षभरेण समुद्वेलयतीति सामाजिकानां विदितमेव। तत्र वास्तवदृश्यचन्द्रबिम्बे (वृत्ते) वास्तवशुक्लवृत्तस्य परिणतं स्वरूपं किमिति प्राच्यपाश्चात्त्ययुक्तिभिः साधु विवेचित-मस्ति। तद्रूपं च चन्द्रबिम्बाद्बहिरभीष्टदृष्टिस्थानतो दर्शनेन दीर्घवृत्ताकारं भवतीति युक्तिप्रयुक्तिभिरन्यमतानि सम्यग् निरस्य साधितम्। तत्र दृष्टिस्थानतो वास्तवदृश्यवृत्ते वास्तवशुक्लवृत्तस्य परिमाणनावसरे ग्रन्थकारेण व्यासद्वयं साधितम्। किन्तु तस्मिन् को महानिति निर्णयो न विहितः—"अल्पा तयोर्यस्य मितिस्तदग्रादन्यार्धमानेन विधाय वृत्तम्" इत्यादौ। परमत्र विचार्यमाणे इदमाभाति यत् प्रथमव्यासोऽन्यव्यासाल्लघुरिति। तदेव युक्त्या साध्यते।

दैवज्ञप्रवरपण्डितगङ्गाधरमिश्रविरचितवासनायुक्तायां तेनैव संशोधितायां वास्तव-चन्द्रशृङ्गोन्नतौ ६६ पृष्ठे ६९ श्लोकव्याख्यायां क्षेत्रं द्रष्टव्यम्। क्षेत्रे यथा अ इ उ वास्तवदृश्यवृत्त-धरातलम्, इ व उ ग दीर्घवृत्तप्रतिमास्वरूपम्, व ग आद्यव्यासः, इ ल उ अन्यव्यासः, इ उ व्यासार्धबिन्दौ व ग व्यासो लम्बरूपः, लम्बश्च वास्तवदृश्यवृत्तकेन्द्रगत इति क्षेत्रमित्या सुस्पष्टम्। अतः इ उ अन्यव्यासरेखाया वास्तवदृश्यवृत्तव्यासोपरि लम्बरूपत्वात् (वास्तवदृश्यवृत्तस्य व्यासापरप्रान्ते च बिन्दुस्तथा च वास्तवदृश्यवृत्तव्यासदीर्घवृत्तीयान्यव्याससंयोगस्थले ल बिन्दु-रस्त्येव) अल × लच = इल^2 (क्षे० मि० ३ अ० ३४ प्र०)। परं अल = अव + वल। लच = लग + गच। अतः अल × लच = (अव + वल) × (लग + गच) = अव × लग + अव × गच + वल × लग + वल × गच। यतः वल = गल। अतः इल^2 = वल^2 + अव × लग + अव × गच + वल × गच अर्थात् इल^2 ∟ वल^2। तेन इल ∟ वल। परं २ इल = इउ। २ वल = वग। अतः इउ ∟ वग। अनेनेदं सिद्ध्यति यदन्यव्यास आद्यव्यासान्महान्। एतदर्थमेव वासनाकारेणापि यतितं तत्स्पष्टतया न सिद्धम्। परिस्थिति-पर्यालोचनया व्यासयोरेको महानन्यश्च लघुः (आद्यव्यासः) रिति सुस्पष्टं प्रतिभाति। एतदर्थं मदीयं पद्यं यथा—

प्रथमान्येष्टयोर्नित्यं स्वल्पो हि प्रथमेष्टकः।
दीर्घवृत्तस्वरूपार्थं दृश्यवृत्ते प्रजायते॥ इति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(२)

एवं च तत्रैव वास्तवचन्द्रशृङ्गोन्नतौ वास्तवदृश्यवृत्तधरातले वास्तवशुक्लवृत्तस्य परिणतस्वरूपज्ञानाय यः प्रथमव्यास इष्टाभिधः साधितः स आद्यान्ययोर्योगरूपः। परिस्थितिविशेषे चाद्यान्यमाने समाने भवत इति ग्रन्थकारेण स्वयमभिहितम्—

शृङ्गोन्नतौ क्रान्तिसमाख्यजीवा त्रिज्याहृता बिम्बदलघ्न्यकाप्ता।
चन्द्रस्य लब्धेन समा सिताख्यकोटिज्यका तर्हि समौ पराद्यौ॥ इति।

लक्षणमेतद्गौरवप्रसक्तम्, तद्वासना च वासनाकारेण विस्तृताऽभिहिताऽस्ति। तदुपपत्तिश्च संक्षेपेणापि साधयितुं शक्यते। सा च सत्यवसरे प्रदर्शयिष्यते। प्रकृतपरिस्थित्यर्थं लाघवाद् यल्लक्षणं कर्तुं शक्यते तदेतन्मत्कृतम्—

दृष्टिस्थानगतः कोणो द्विगुणक्रान्तिसंमितः।
यदा भवेत्तदा विद्वन्नाद्यान्यौ भवतः समौ॥ इति।

अस्य वासनार्थं दैवज्ञप्रवरपण्डितगङ्गाधरमिश्रसंशोधितस्य तस्यैव ग्रन्थस्य १५ श्लोकव्याख्यायां २६ पृष्ठे क्षेत्रं द्रष्टव्यम्। तत्र क्षेत्रे दृ अ रेखा वृत्तं यत्र छिनत्ति तत्र स बिन्दुर्विशेषः कल्प्यः। तथा च क्षेत्रे इ च पृ पार्श्वेऽ(परिधिखण्डस्य) वास्तवदृश्यशुक्लव्यासप्रान्तयोः क्रमशः प थ बिन्दू तदपरपार्श्वे च घ म बिन्दू कल्पनीयौ।

वासना चात्र साध्यमेव सिद्धं मत्वा प्रदर्श्यते। तद्यथा—आद्यान्यमानयोः समत्वात् पृ च चापं=पृ स चापम्। तेन ∟पृ अ दृ = ½ ⟨ ९०–(सि+क्रां) ⟩। (पथचापम्=घमचापम्=कमलाकरीयसितांशाः। वास्तवावास्तवशुक्लवृत्तयोरन्तरं क्रान्तिरिति लक्षणं ग्रन्थकारेणैव विहितमस्ति)। तथा च ∟अपृके = ½ ⟨ ९०–(सि–क्रां) ⟩। परं ∟केपृअ = ∟पृदृअ+दृअपृ। अतः ∟पृदृअ = ∟केपृअ-∟पृअदृ =

½ ⟨ ९०–(सि-क्रां) ⟩ – ½ ⟨ ९०–(सि+क्रां) ⟩ = ½ ⟨ (सि+क्रां)-(सि–क्रां) ⟩
= क्रान्तिः। २∟पृदृअ = ∟चदृअ = २ क्रान्तिः। अत उपपन्नम्॥

अथ प्रसङ्गाद् ग्रन्थकारोक्तस्याद्यान्यमानयोः समस्थलीयलक्षणस्य "शृङ्गोन्नतौ क्रान्तिसमाख्यजीवा" इत्यादेर्वासनाऽतिसरला सिद्धान्तरसिकानां मनोविनोदिनी परीक्षार्थिनां चोपकारिणी प्रदर्श्यते। तद्यथा–कल्प्यतां चन्द्रबिम्बीयसितवृत्तम् (परमान्तरवृत्तम्) = प द ग स म थ इ ट च त। तत्केन्द्रम् = के। वास्तवदृश्यवृत्तकेन्द्रम् = क। वास्तवशुक्लवृत्तकेन्द्रम् = ल। द ट = अवास्तवशुक्लवृत्तम्। वास्तवशुक्लवृत्तम् = ग इ। अवास्तवदृश्यवृत्तम् = स त। वास्तव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

दृश्यवृत्तम् = म च । लकेसु = बिम्बान्तरसूत्रम् । सू = वृत्ताद्बहिः सूर्यबिन्दुः । के ल = क्रान्तिः । के क = भुजः । कमलाकरीयसितांशाः = ∟ प के सू = ∟ ल के क । अतः सितांशकोटिः = ∟ के क ल । ∟ के ल क = ९० ।

△ के क ल भुजक्रान्तिवास्तवदृश्यशुक्लवृत्तगर्भीयकेन्द्रान्तररूपभुजेत्यवयवत्रयविशिष्टे जात्येऽनुपातेन सितांशकोटिज्या $= \frac{\text{त्रिज्या} \times \text{क्रान्तिः}}{\text{भुजः}}$ ।

अत्र गद = के ल = क्रान्तिः । ज्या∟ ल ग के = ज्या∟ ग के द = क्रान्तिज्या । (के ग = चन्द्रबिम्बदलम् = इयं विशेषरेखा विधेया) । ततः △ के ग ल त्रिभुजेऽनुपातेन क्रान्तिः $= \frac{\text{चंबिंद} \times \text{क्रांज्या}}{\text{त्रिज्या}}$ । (∟ ग ल के = ९०)

एवं चापरपार्श्वे के च विशेषरेखा करणीया, तेन △ के क च त्रिभुजे च बिन्दौ दृष्टिस्थानागतसूत्रस्य स्पर्शरूपत्वात् ∟ के च क = चन्द्रबिम्बदलचापमानम् । ∟ के क च = ९० । के च = चन्द्रबिम्बव्यासदलचापम् । ततोऽनुपातेन भुजः $= \frac{\text{चंबिंद} \times \text{चंबिंदज्या}}{\text{त्रि}}$ ।

प्रथमानीतस्वरूपेऽनयोः स्वरूपयोरुत्थापनेन सिताशकोज्या

$$= \frac{\text{त्रिज्या} \times \text{चंबिंद} \times \text{क्रां ज्या} \times \text{त्रिज्या}}{\text{त्रिज्या} \times \text{चंबिंद} \times \text{चंबिंदज्या}} = \frac{\text{त्रिज्या} \times \text{क्रां ज्या}}{\text{चंबिंदज्या}}$$

अतो ग्रन्थकारोक्तलक्षणपद्यमुपपन्नम् । अत्र क्षेत्रदर्शनाभावाच्छन्दगौरवेण बृहत् स्वरूपं दृश्यते । वस्तुतस्त्वनुपातत्रयेणैव सर्वं सिद्धयति । क्षेत्राङ्कने च दृक्सूत्रस्य चन्द्रबिम्बे ऊर्ध्वसंपाते प बिन्दुः कल्प्य इति शम् ॥

श्रीमीठालाल ओझा

कालिदासीयपद्येऽस्थानस्थपदता ?

साहित्यदर्पणेऽस्थानस्थपदतादोषस्योदाहरणत्वेनेदं रघुवंशभक्तं पद्यं समुपन्यस्तम्—"तीर्थे तदीये गजसेतुबन्धात्प्रतीपगामुत्तरतोऽस्य गङ्गाम् । अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ॥" [१६।३३] इति । अत्र 'तदीये तीर्थे' इत्यस्य 'गङ्गासंबन्धिनि तीर्थे' इत्यर्थमभिमत्यायं दोषो दर्पणकृतोद्भावितः । मल्लिनाथेन तु 'तदीये तीर्थे' इति पदद्वयम् 'वैन्ध्येऽवतारे' इत्यर्थकतया व्याख्यातम्, न चात्रास्थानस्थपदतादोषस्य संभावनापि कृता ! विन्ध्यवर्णनं चास्मात्पद्यात्प्राक् प्रकान्तम्, अतो विन्ध्य एव तत्पदपरामर्शयोग्य इति न महाकविकृतौ धूलिप्रक्षेपः समुचितः ॥

श्रीरघुनाथशर्मा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

महाभाष्यपाठविमर्शः

'तृज्वत्क्रोष्टुः' [७।१।९५] इति सूत्रस्य भाष्ये पठ्यते–"एवं तर्हि—न चापरं निमित्तं संज्ञा च प्रत्ययलक्षणेन" इति। पाठोऽयं प्रामादिक इति प्रतिभाति। सम्यक् पाठस्तु—"एवं तर्हि–न चापरं निमित्तं च संज्ञा प्रत्ययलक्षणा" इत्येव। अत्र युक्तयः—

(क) नेत्यारभ्य कृत्स्नं वचनं खलु वार्त्तिकरूपेण मन्तव्यम्, अत एवास्य व्याख्यानभूतं भाष्यं दृश्यते–'न चापरं निमित्तमाश्रीयते·····' इत्यादिना। अत एव यस्मिन् संस्करणे वचनमिदं न वार्त्तिकरूपेण गणितं तत् प्रामादिकमेव।

(ख) यदीदं वार्त्तिकमिति निश्चितं तर्हि श्लोकवार्त्तिकं वा गद्यनिर्मितं वेत्यपि चिन्तनीयम्। अस्मन्मत इदं श्लोकवार्त्तिकमेव। तथा हि—वचनमिदं पूर्ववार्त्तिकोक्तदोषसमाधानपरम्, अत इमे द्वे वचने एककर्तृके एव स्यातामित्येव तर्कलाघवतः स्वीकार्यम्, भाष्यकृच्छैलीसंमतत्वाच्च।

एवं सति यदि पूर्ववार्त्तिकम् (तेनैव भावनं चेत् स्यादनिष्टोऽपि प्रसज्यते) अनुष्टुभा रचितं स्यात्, तर्हीदं वचनमप्यनुष्टब्विरचितमित्यत्र न सन्देहलेशोऽपि।

वचनमिदमादावनुष्टुभैव रचितम्, पश्चात् कारणविशेषेण पाठभ्रंशोऽभवदित्यत्रान्यदपि बलवत् प्रमाणमस्ति। विवेचनीयपाठस्थ–'प्रत्ययलक्षणेन' इत्यस्य स्थाने 'प्रत्ययलक्षणा' इति पाठान्तरं दृश्यते, अतश्चकारव्यत्यासेन 'संज्ञा प्रत्ययलक्षणा' इति चतुर्थचरणस्य पाठः समीचीनतया प्रतीयते। चकारस्तु तृतीयचरणे पठनीयः, येन 'न चापरं निमित्तं च' इत्येव तच्चरणस्य पाठः स्यात्।

नन्वेकस्मिन्नेव चरणे (न चापरं निमित्तं च) द्वौ चकारौ किमर्थं पठितौ ? वृत्तसंरक्षणार्थमिति ब्रूमः। नियमतोऽयं चकारः संज्ञाशब्दात् पश्चात् पठितव्यः (ततश्च–'संज्ञा च प्रत्ययलक्षणा' इति पाठः स्यात्)। यतः संज्ञायाः समुच्चय एवात्र भाष्यकृदभीष्टः। यथोक्तं भाष्ये–'अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन' इति। परन्तु छन्दोदोषप्रसङ्गात् 'च' अस्थाने पठितः। एतादृशस्यास्थानपठितस्य चकारस्योदाहरणं व्याकरणादिषु पुष्कलम्। किञ्च 'न चापरम्' इत्यत्र पाठान्तरमपि दृश्यते–'न वापरम्' इति। अत्र वाशब्दो निर्दुष्टं पक्षान्तरं सूचयति। एवं सत्येकस्मिन्नेव चरणे द्वौ चकारौ किमर्थं पठिताविति प्रश्नस्यावकाश एव नास्ति।

किमत्र पाठभ्रंशस्य कारणमिति प्रश्नस्योत्तरे ब्रूमः—भाष्यकृता 'अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन' इति व्याख्यातम्, अत एव कालान्तरे केनचिच्चिन्तितं यदस्मिन् वार्त्तिकेऽपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'प्रत्ययलक्षणेन' इत्येव प्रयुक्तमासीद् वार्त्तिककृता। प्रायेण वार्त्तिकशब्दानेव पतञ्जलिर्गृह्णाति व्याख्यानावसरे। ततश्च लिपिकरेण 'प्रत्ययलक्षणेन' इत्येवानवधानेन लिखितम्। एतेन च श्लोकवार्त्तिकस्य श्लोकत्वमेवापगतम्, अधिकाक्षरोपजननात्। एवं च 'निमित्तं च संज्ञा प्रत्ययलक्षणेन' इति जाते केनचिच्चकारः संज्ञेति शब्दात् पश्चात् स्थापितः, यतो हि संज्ञाया अत्र समुच्चयो भवति। यस्य समुच्चयस्ततः परं चकारः प्रयोक्तव्य इत्येव पुष्कलो व्यवहारः। पाणिन्यादिभिरपि तथैवाकारि। एवं कालक्रमेण 'न वेति' स्थले 'न चेति' इत्येवंरूपं पाठान्तरमपि जातम्, यद्वा निपातस्यानेकार्थत्वाच्चघटितपाठोऽपि साध्विति कथयितुं शक्यते ॥

सिद्धान्तकौमुदीपाठविमर्शः

'हे मपरे वा' [८।३।२६] इति सूत्रेऽस्ति वार्त्तिकम्—"यवलपरे यवला वेति वक्तव्यम्" इति। सिद्धान्तकौमुद्यामस्योदाहरणानि दत्तानि। यथा—"किय्ँ ह्यः, किं ह्यः; किव्ँ ह्वलयति, किं ह्वलयति; किल्ँ ह्लादयति किं ह्लादयति" इति। अत्रोदाहरणेषु सानुनासिकानां यवलानां पाठः प्रामादिक इति प्रतिभाति। यथोक्तं नागेशेन—"वार्त्तिकेन यवला निरनुनासिका एव, विधीयमानत्वात्। उदाहरणेषु सानुनासिकपाठस्तु लेखकप्रमादादित्याहुः" [उद्द्योते ८।३।२६] इति। अत्रैतान्येवोदाहरणानि भाष्येऽपि दत्तानीति ज्ञेयम्। भाष्यकोशेषु निरनुनासिकपाठान्तरमपि दृश्यते, तदेव रमणीयम् ॥

फिट्सूत्रसमीक्षा

सुषमायाः गताङ्के एकस्मिन् फिट्सूत्रविषये श्रीशान्तिभिक्षुणा स्वीया समीक्षा प्रदत्ता। तत्रास्माकमिदं वक्तव्यं यद् यद्यपि सिद्धान्तकौमुद्याः संस्करणेषु 'वाचादीनामुभावुदात्तौ' [८३ सू०] इत्येव पठ्यते, तथापि तन्मुद्रणाशुद्धिजमिति प्रतीयते। ग्रन्थसंपादकानामनवधानमेव तत्कारणमिति मन्यामहे। यतो हि शब्देन्दुशेखरे तद्व्याख्यानविवरणकाले वाचेति स्थले वावेति पाठ एव नागेशेन व्याख्यातः, अतो मूलपाठोऽपि तथैवासीदित्येव युक्तं प्रतिभाति। किञ्च प्रक्रियाकौमुद्यां [पृ० ७५३] 'वावादीनामुभावुदात्तौ' इति पठितम्। अपि च संप्रदाये सर्वत्र 'वावादीनामुभावुदात्तौ' इत्येव पठ्यते पाठ्यतेऽद्यापि। नागेशेन तु 'वावादीनामुभौ' इत्येव सूत्रपाठः स्वीकृतः, 'उदात्तौ' इति चानुवृत्तिप्रदर्शनार्थमिति तेनोक्तमित्यप्यत्र ज्ञेयम्। अतो वाचेत्यादिपाठः संपादकानवधानप्रयुक्तमुद्रणप्रमादज इत्येवाभ्युपेयम् ॥

श्रीरामशङ्करभट्टाचार्यः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पादकीयम्

देवनागरीलिपिप्रतिसंस्कारसंमेलनम्

विगतमार्गकृष्णाष्टमीनवम्योः शनिरविवासरयोः (२८-२९ नवम्बर) उत्तरप्रदेश-राजधान्यां लक्ष्मणपुर्यां राजभवने महामान्यानामुपराष्ट्रपतीनां दार्शनिकप्रवराणां डा०राधाकृष्णन्महोदयानामाध्यक्ष्ये देवनागरीलिपिप्रतिसंस्कारसंमेलनं समजायत । तत्र भारतसंघस्थितानां प्रायः समेषां राज्यानां प्रधानमन्त्रिणः शिक्षामन्त्रिणोऽन्ये च समाहूता मनीषिणः समवेता अभवन्। समुपस्थितानां प्रतिनिधीनां स्वागतवाचनं महामान्यैरुत्तरप्रदेशप्रधानमन्त्रिभिः श्रीगोविन्दवल्लभपन्तमहोदयैरकारि । उत्तरप्रदेशराज्यपालमहामहिमश्रीकन्हैयालालमाणिकलालमुंशिमहोदयाश्च संमेलनमिदं समुद्घाटयन्ति स्म ।

१९४७ ई० वर्षे उत्तरप्रदेशीयप्रशासनेन देवनागरीलिप्या सह हिंन्दी राजभाषापदवीं प्रतिष्ठापिता, अथ च तस्मिन्नेव हायने मनीषिप्रवराणामाचार्यनरेन्द्रदेवमहोदयानामाध्यक्ष्ये देवनागरीलिपिप्रतिसंस्कारसमितिः संघटिता । अनया समित्या वर्षद्वयं यावद् विभिन्नाभिः संस्थाभिर्व्यक्तिभिश्च समुद्भाविता एकाधिकपञ्चाशत्परिमिता योजनाः सम्यक् परीक्ष्य, विधानपरिषदा मनीषिप्रवरकाकाकालेलकरमहोदयानामाध्यक्ष्ये निर्मितया समित्या सह विचारविनिमयं च विधाय स्वकीया निश्चयाः प्रशासनस्य पुरतः समुपस्थापिताः ।

भारतीयसंविधानेनापि देवनागरीलिप्या सह हिन्दीभाषा राष्ट्रभाषात्वेनाङ्गीकृता विद्यते। संविधानस्वीकारस्य पञ्चदशवर्षाभ्यन्तरे तदनन्तरं वा हिन्दीभाषाऽथ च देवनागरीलिपिरांग्लभाषाया रोमनलिप्याश्च स्थानमाप्स्यतीति सुनिश्चितमेव । पुराऽऽनुश्रविकयुगे भाषाया एव प्राधान्यमासीन्न तु लिपेः । साम्प्रतं तु तद्विपरीतं लेखन-शीघ्रलेखन-मुद्रण-टङ्कन-दूरटङ्कनादिषु विविधक्रियाकलापेषु लिपेरेव प्राधान्यं विद्यते । वैज्ञानिकेऽस्मिन् युगे प्रायः समेषां ध्वनीनां याथातथ्येनाभिव्यञ्जिका विश्वस्य समासु लिपिषूत्कृष्टतमापि देवनागरी नूतनासु यन्त्रयोजनासु पश्चाद्वामितामेव दधाति । कथं ह्यस्य दोषस्यापनोदनं भवेदित्येव समेषां देवनागरीप्रतिसंस्कारप्रयत्नानां मूलम् । नरेन्द्रदेवसमितिनिश्चयेषु दोषापनोदनेन सह मौलिकताया ह्रासोऽपि यथा न भवेत्तथा साध्ववहितम् ।

सम्पूर्णे राष्ट्रे संस्कृतभाषायाः प्रचारो विद्यते, संस्कृतस्य ग्रन्थाः प्रकाश्यन्ते । संस्कृतग्रन्थानां च प्रकाशनं सर्वत्र प्रायो देवनागरीलिप्यामेव भवति । अतोऽस्याः लिपेः प्रचारः सार्वत्रिको वरीवर्त्येवेति स्वभावत एव तस्या राष्ट्रलिपित्वं सिद्धम् । अपि चापहाय दूरदक्षिणराज्यीया

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वित्रलिपीः सर्वासां गुर्जरबङ्गगुरुमुखीप्रभृतिलिपीनां जननी प्राचीना देवनागरीलिपिरेव। अन्यच्च सम्पूर्णे महाराष्ट्रे बिहारोत्तरप्रदेशहिमाञ्चलप्रदेशविन्ध्यप्रदेशमध्यप्रदेशमध्यभारतराजस्थानादि-हिन्दीभाषिराज्येषु देवनागरीलिपेरेवाप्रतिहतं साम्राज्यं वर्तते। सत्येवमस्याः प्रतिसंस्कारवेलायां मा भूत्क्वचन विरोधाशङ्काऽथ च सर्वेषामेषां देवनागरीप्रियाणां संमत्यैव भवतु किञ्चित् सर्वमान्यं प्रतिसंस्करणमिति धीरेवास्य संमेलनस्य पृष्ठभूमिमरीरचत्।

लिपिषु प्रतिसंस्काराय पुरैतादृशं संमेलनमभून्न वेति विचारणीयो विषयः। तथापि लिपिषु विकासवादन्यायेन समये समये परिवर्तनमजायतेति पुरातत्त्वविदां सुविदितमेव। पुरा हि भारते ब्राह्मी खरोष्ठी चेति द्वे लिपी प्रचलिते आस्ताम्। तत्र खरोष्ठी साम्प्रतिक्यरबीलिपिवद्दक्षिणतो वामपार्श्वे लिख्यते स्म। अस्याः प्रचारश्च पश्चिमोत्तरसीमावर्तिषु कतिपयेषु प्रदेशेष्वेवासीत्। खरोष्ठनामकेनान्येन वा केनचिद्विदुषा पारसीकदेशीयाम् 'अमरइक्'-नाम्नीं लिपिमाधारीकृत्य निर्मितैषा लिपिः खरोष्ठीति नाम्ना प्रथिताभवत्। ई० पूर्वतृतीयशतकादारभ्य ई० तृतीशतकपर्यन्तमस्याः प्रचारः पश्चिमोत्तरसीमाप्रदेशेष्वासीत्। अनन्तरं तत्रापि ब्राह्मीलिपेः प्रचारातिशयात्तस्या लोप एव संजातः।

देवनागर्यादिलिपिवद्वामतो दक्षिणपार्श्वे लिख्यमानाया ब्राह्मीलिपेः प्रचारस्तु पुरा प्रायः सम्पूर्णे भारते आसीत्। एषैव भारतस्य प्राचीनतमा लिपिः। यतो ह्येषा ब्रह्मणा प्रदत्ताऽतोऽस्या ब्राह्मीति नाम। यद्वा स्वाध्यायप्रवणेन ब्राह्मणसमाजेन निर्मिताऽतोऽस्या ब्राह्मीतिनाम। भारतीयेषु ऋतुपरिवर्तनेषु तूलपत्रभूर्जपत्रतालपत्रादिषु लिखिता ग्रन्था नैवातिवेलमवस्थातुं सहन्ते। अतः प्राचीनतमाया भारतीयलिपेः स्वरूपं गण्डशैलेषु शैलशिखरेषु स्तम्भस्तूपादिषु मुद्रासु चैवावलोकयितुं शक्यते। अत्र च प्राचीनतमौ द्वौ शिलालेखौ ब्राह्मीलिपेरेव समधिगतौ। एकस्तयोर्नेपालराज्यीये पिप्रावास्थाने, अपरश्च अजमेरमण्डलस्थबड़लीग्रामे। पुरातत्त्वज्ञैस्तयोः समयः ई०वर्षाच्चतुःशतकपूर्वं स्वीक्रियते। इतोऽपि पूर्वमत्र लेखनकलायाः प्रचार आसीदिति ब्राह्मीलिपेश्चरमविकासेन बौद्धजैनसाहित्यतोऽष्टाध्यायीनिरुक्तब्राह्मणवेदादिग्रन्थेभ्यश्च सम्यक् प्रतीयते। "त्रिषष्टिश्चतुःषष्टिर्वा वर्णा शम्भुमते मताः" इति पाणिनिशिक्षोक्तानां समेषां वर्णानामभिव्यञ्जिका आकृतयस्तत्समयेऽपि तस्यामासन्नेव। अतः प्राचीनतमेऽपि तस्मिन् काले एषा पूर्णविकसिता लिपिरासीदेवेति स्वीकर्तव्यमेव। इतोऽपि प्राचीना काचिल्लिपिरत्राऽऽसीन्न वा, चित्रलिपितो मिस्रदेशीयप्राचीनलिपिवदस्या विकासः संजातोऽन्यया वा कयाचित्पद्धत्येति प्रमाणाभावान्न किञ्चिदपि कथयितुं शक्यते।

केचित्तु तान्त्रिकोपासनायां प्रयुक्तेभ्यः सांकेतिकचिह्नेभ्यस्त्रिकोणचक्रादियन्त्रेषु लिखितेभ्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एव भारतीयायाः प्राचीनतमाया लिपेर्विकासं संमन्वते । तान्त्रिकी कामकला हि बिन्दुत्रयेभ्यो निर्मीयते। या हि–"मुखं बिन्दुं कृत्वा कुचयुगमधस्तस्य" इत्यादिना स्तूयते सौन्दर्यलहर्यां शङ्कराचार्यैः। एतच्च कामकलाबीजं ब्राह्मीलिपेरिकारं सर्वथानुकरोति । वैदिकी तान्त्रिकी चेति द्विविधा हि श्रुतिरभ्युपेयते । अतस्तान्त्रिकश्रुतेर्वाङ्मय एवं कुत्रापि निहितं भारतीयलिपिविकासतत्त्वमित्यनुमातुं शक्यते । तान्त्रिकसाहित्ये च लिपिर्मातृकाऽक्षमालेतिनामभ्यां प्राचुर्येण स्मर्यते ।

जैनानां पन्नवणासूत्रे समवायाङ्गसूत्रे च ब्राह्मीसहितानामष्टादश लिपीनाम् , बौद्धानां ललितविस्तरे च ब्राह्मीखरोष्ठीसहितानां चतुष्षष्टिलिपीनां नामान्युपलभ्यन्ते । तान्त्रिकसाहित्येऽपि भूतमातृका मालिनीमातृकेत्यादिबह्वीनां मातृकाणां समुल्लेखः ।

वैखरी हि वाणी कण्ठताल्वादिस्थानेभ्योऽभिव्यक्ता चतुष्षष्टिवर्णात्मिका निरालम्बे आकाशे कानप्याकारानाविर्भावयति। योगिन एव तद्द्रष्टुं प्रभवन्ति । विभिन्नेषूच्चारणेषु विभिन्ना आकारा जायन्ते । तेषामेवाकाराणां प्रतीकरूपा इमा लिपयः । भारतीयरागरागिणीनां या हि मूर्तयः कल्पितास्ता गायकस्य पुरतो यद्धि रूपं विशिष्टासु वेलासु प्रादुर्भवति तत्प्रतिकृतिरूपा एव। चिररात्राय संचितो ज्ञानराशिरानुश्रविकपद्धत्योपलभ्यतेऽस्याभिर्यद्यपि; तथापि तपःपूतैर्ऋषिमहर्षिभिर्मनीषिभिश्च प्रणीतमतीव विशालं वाङ्मयं लिपिरूपमादधदेवास्माभिरधिगतम् । अत एव निखिलानुदात्तभावान् संवहन्ती लिपिरेषा भगवती भगवत्याः सरस्वत्या विग्रहत्वेनार्च्यते । अत एव च–"नमो बंभीए लिविए" इत्यादिना भगवतीसूत्रे स्तुता सा ।

अस्तु विशेषप्रमाणानामभावेन ब्राह्मयेव प्राचीनतमा भारतीया लिपिः । तस्याश्च विकासवादन्यायेन समये समये यानि रूपान्तराणि संजातानि तानि क्रमशो गुप्तलिपिकुटिललिपिनागरीलिपिरिति नाम्नाऽभिधीयन्ते । नागरीलिपेराविर्भाव ई० अष्टमे शतके जातः। सा च विकासमापद्यमाना शनैः शनैः साम्प्रतिकीमवस्थां प्रापत्, प्रकारान्तरेण बङ्ग-शारदा-गुर्जरादिलिपीनां च रूपमदधात् । एवं च स्वयमेव विकासपथमनुवर्तन्त्या अस्या देवनागरीलिपेर्युगानुरूपं प्रतिसंस्करणं नैव क्षोदक्षमम्, अपि त्वावश्यकमेव । इयानेवावधातव्यो विषयो यन्नहि सहसा तादृशेन परिवर्तनेनापातरमणीयेन भाव्यं येन भारतीयसंस्कृत्या सर्वदा तिरस्कृतानामसुरसंस्कृतिप्रतीकभूतानां यन्त्राणां प्रवाहे वैज्ञानिकतमैषा देवनागरी प्रवहिता स्यात् । नहि यन्त्रसौकर्यार्थं परिवर्तनेन भाव्यमपि तु यन्त्रैरेव लिपेरनुसरणं विधेयम्। अस्यां सरणौ च या बाधाः स्युस्ता एवापनोदनीयाः । अतीव प्रमोदस्यायं विषयो यदत्र संमेलने एषैव सरणिः शरणीकृतेति ।

संमेलने संजातान्निर्णयाननुरुद्धय भविष्यति विचारः करिष्यते ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यज्ञं स्तौति—

[1]सप्तास्यासन्परिधयस्त्रिःसप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥

सप्त समुद्राः परिधय आसन् । सप्त छन्दांसि सप्त संस्थाः प्रकृतय आसन् । [2]त्रिःसप्त सप्तकास्त्रयो वर्गाः । त्रिः तिस्रः । समिधः समिन्धना आसन् । देवा यद् यदा । यज्ञं तन्वानाः यज्ञान् विस्तारयन्तः । पुरुषं पशुमबध्नन् पशुत्वेन बन्धनमकुर्वन् । तदाऽस्य यज्ञस्य समुद्राः परिधय आसन्निति संबन्धः ॥ १५ ॥

निगमयति—

[3]यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

त्रिष्टुप् । इदानीं साध्यानां यज्ञफलमुच्यते । यज्ञेन हविर्भूतेन । देवा यज्ञमयजन्त । तानि धर्माणि प्रथमान्यासन् । यज्ञात्मकस्य कर्मणः सूक्ष्मरूपाणि तानि कर्माणि, फलस्य पूर्वरूपाणि वा यानि, तानि प्रथमानि कर्मसाध्यफलेभ्यः पूर्वरूपाणि तानि धर्माणि [4]हविषां सूक्ष्मरूपाणि वाऽऽसन् । ते ह ते ऋषयः । महिमानः देवाः । सचन्त नाकम् । [5]कं सुखम्, अकमसुखं न विद्यते यत्र स स्वर्गो नाकः, तं नाकं स्वर्गं सुखविशेषम् । सचन्त सेवितवन्तः । कुत्रेति तदाह— यत्र पूर्वे साध्याः सन्ति देवाः । यत्र [6]स्वर्गे स्थानविशेषे । पूर्वे पुरातना ऋषयो देवाः [7]प्रजापतेः प्राणा एव साध्या देवाः स्वर्गसुखमनुभवन्तस्तिष्ठन्ति । तं नाकं महिमानो देवा ऋषयश्च सचन्तेति । एवमेव मन्त्रं श्रुतिर्व्याचष्टे—"यान्वै तान् सप्त पुरुषानेकं पुरुषमकुर्वन् । स प्रजापतिरभवत् । स प्रजा असृजत स प्रजाः सृष्ट्वोर्ध्व उदक्रामत् । स एतं लोकमगच्छद्यत्रैष एतत्तपति नो ह तर्ह्यन्य एतस्मादत्र यज्ञिय आस तं देवा यज्ञेनैव यष्टुमध्रियन्त ॥१॥ तस्मादेतदृषिणाभ्यनूक्तम्— 'यज्ञेन यज्ञमयजन्त देवाः' इति । यज्ञेन हि तं यज्ञमयजन्त देवाः । 'तानि धर्माणि प्रथमान्यासन्' इति ते हि धर्माः प्रथमेऽक्रियन्त । 'ते ह नाकं महिमानः सचन्त' इति स्वर्गो वै लोको नाको

---

१ (मा० ३१।१५)। २ त्रिःसप्तकाः–ख० ३ (मा० ३१।१६)। ४ हविषा–क·ग० ।
५ 'कम्' नास्ति–क-ग० । ६ स्वर्गस्थविशेषेषु–क·ग०, स्वर्गस्था विशेषे–ख० ।
७ 'प्रजापतेः' · · 'देवाः' नास्ति–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

देवा महिमानस्ते देवाः स्वर्गं लोकं सचन्त ये तं यज्ञमयजन्नित्येतत् ॥२॥ 'यत्र पूर्वे साध्याः सन्ति देवाः' इति। प्राणा वै साध्या देवास्त एतमग्र एवमसाधयन्" [शत० ब्रा० १०।२।२।१-३] इत्यादिका। 'यत्र पूर्वे साध्याः सन्ति देवाः' इति [1]यज्ञे ऋषीणां प्रवाहस्य नित्यतां दर्शयति ॥ १६ ॥

उत्तरनारायणेनादित्यमुपतिष्ठत इत्याह—

[2]अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥

उत्तरनारायणेनादित्यमुपतिष्ठते। [3]षड् ऋच उत्तरनारायणमन्त्राः। तत्राद्यास्तिस्रस्त्रिष्टुभः, ततो द्वे अनुष्टुभौ, अन्त्या त्रिष्टुप्। "उत्तरनारायणेनादित्यमुपस्थायानपेक्षमाणोऽरण्यमभिप्रेयात्" [शत० ब्रा० १३।६।२।२०] इति श्रीनारायणदेवत्या मन्त्रा आदित्योपस्थाने विनियुक्ताः। [4]पूर्वकल्पान्तरीयेषु पुरुषमेधयज्ञादिभावमापन्नः परम्पराकोटिसंचारीति श्रूयते[?]। यः अद्भ्यः [5]उदकस्य सकाशात् [6]संभृतः। पृथिव्यै पृथिव्याः सकाशाच्च [6]संभृत इति। पृथिव्युदकग्रहणं पञ्चमहाभूतानामुपलक्षणम्, "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" [ब्र० सू० ३।१।१] इत्यधिकरणसिद्धत्वात्। अग्रे प्रथमम्। यः भूतपञ्चकात्संभृतः, 'भृञ् भरणे' [८९८ भ्वादिः]। पुण्यसंस्कारानुरञ्जितभूतपञ्चकपरिवेष्टित इत्यर्थः। एवं संभृतः सन् पश्चाद् रसाच्च विश्वकर्मणः समवर्तत। रसो रागस्तस्माद्रसात्। विश्वानि सर्वाणि कर्माणि यस्य स विश्वकर्मा सविता, तस्माद्विश्वकर्मणः। रसात् सर्वजगत्कर्तुरीश्वरस्य रागादीश्वरेच्छया। समवर्तत समभवत्। सूक्ष्मशरीरावस्थितस्य उत्पद्यमानसूक्ष्मदेहस्य त्वष्टा श्रीभगवानादित्यः। यद् रूपं विदधत् कालात्मकः सविता विशिष्टं रूपं कुर्वन्। एति आगच्छति। तन्मर्त्यस्य पूर्वं मनुष्यस्य सतः। देवत्वम्। व्यत्ययः। देवत्वेन। [7]आजानम्, जननम् उत्पत्तिः। एवं[8] तस्य जन्माभवदित्यादित्यः स्तूयते ॥ १७ ॥

---

१ 'यज्ञे' नास्ति—ख०। २ (मा० ३१।१७)। ३ 'षड् ऋचः' नास्ति—ख०।
४ पूर्वकल्पे पुरुषमेधयाजी आदित्यरूपं प्राप्तः स्तूयते—इति मही०, पूर्वकल्पान्तरीयेषु पुरुषगन्धयागन्यादिभावमापन्नः परापरसंचारीति श्रूयते—ख०।
५ उदकात्—क-ग०। ६ संभूतः—ख-ग०। ७ आजानन्—ग०। ८ उत्पत्तिरेवैतस्य—ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१]वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥

एवं प्रतीयमानं पुरुषम्। पुरि शेत इति पुरुषस्तम्। अनेन प्राप्तं परिच्छेदं व्यावर्तयति—[२]महान्तमिति। महान्तमपरिच्छिन्नमनन्तम्। आदित्यवर्णमादित्यस्य वर्ण इव वर्णो यस्य स आदित्यवर्णः, स्वयंप्रकाश इत्यर्थः। तमसः परस्तात्। अज्ञानान्धकारादुपरि स्वतेजसाऽज्ञानान्धकारमधःकृत्य वर्तमानमेतं महान्तमादित्यान्तःस्थं पूर्णं पुरुषमेतं साक्षादपरोक्षरूपम्। अहं शोधिततत्त्वंपदार्थोऽहम्। वेद जानामि। एतं पुरुषं [३]महान्तमादित्यवर्णं पुरुषं वेद, आदित्यवर्णं महान्तं पुरुषमेतं, पुरुषं वेदेत्येवं व्यतिहारेणाहं वेद जानामि। सर्ववेदान्तैस्तात्पर्येण प्रतिपाद्यार्थमाह—तमेव विदित्वातिमृत्युमेति। 'सहस्रशीर्षा' [३१।१] इत्यादिना योऽभिहितः परमेश्वरस्तमेव विदित्वा नान्यं तं विदित्वैव। मृत्युं मृत्युयुक्तं संसारम्। अत्येति अतिक्रामति न कर्मणा। अथ तमेव तं विदित्वैव मृत्युमत्येति। मृत्युमतिक्रम्य एति स्वस्वरूपं प्राप्नोति। परब्रह्म एति गच्छति इत्युपचारः। पक्षान्तरशङ्कां [४]निरस्यति—[५]नान्यः पन्था विद्यतेऽयनाय। अयनाय गमनाय स्वस्वरूपप्राप्तये। अन्यः पन्था मार्गो न विद्यते ॥ १८ ॥

[६]प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥

प्रकर्षेण जायन्त इति प्रजाः, तासां पतिः। गर्भे अन्तः [७]सर्वप्राणिनामुदरमध्येऽन्तर्यामिरूपेण यश्चरति। स च स्वस्वरूपेणाजायमानो देहादेर्जन्मन्यपि स्वयं जन्मशून्योऽप्युपाधिवशात्। बहुधा बहुप्रकारेण विजायते। यद्वा 'अज[८]गतिविक्षेपणयोः' [२३० भ्वादिः] [९]इति। स्वमायया सर्वानजायमानो विक्षेपयन् संमोहयन् स्वयं बहुधा विजायत इति। तस्य बहुधा वर्तमानस्यापि प्रजापतेः। योनिं स्थानं स्वरूपं च। धीराः सम्यग्ज्ञानिनः। परिपश्यन्ति

---

१ (मा० ३१।१८)। २ 'महान्तमिति' नास्ति—ग०। ३ आदित्यवर्णं महान्तम्—ग०। ४ निवारयति—ख०। ५ 'नान्यः पन्था······न विद्यते' इत्यस्य स्थाने 'नेति। अन्यः पन्था मार्गः। न विद्यतेऽयनाय गमनाय स्वरूपप्राप्तये' इति—क-ग०। ६ (मा० ३१।१९)। ७ 'सर्वप्राणिनामुदर' नास्ति—ख०। ८ गतिक्षेपणयोः—धातु०। ९ 'इति' नास्ति—क-ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साक्षात्कुर्वन्ति । तस्मिन् प्रजापतौ । ह्रि एव स्वकारणभूत एव । विश्वा विश्वानि । भुवनानि भूतानि । तस्थुः तिष्ठन्ति ॥ १६ ॥

[1]यो देवेभ्य आतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ २० ॥

देवेभ्यः अर्थाय । आतपति आतपं करोति प्रकाशयति [2]प्रकाश्यते च । यो देवानां पुरोहितः । यश्च देवानामग्रतः स्थित्वा हितमाचरति । पूर्वो यो देवेभ्यः । यश्च देवेभ्यः पूर्वः सर्वदेवाग्रणीर्जातः । तस्मै ब्राह्मये रुचाय नमः । ब्रह्मणो योग्यं ब्राह्मं तस्मै [3]ब्राह्मये । रुचाय रोचमानाय दीप्यमानायादित्याय नमः ॥ २० ॥

[4]रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ २१ ॥

रुचं रोचमानम् । ब्राह्मं ब्रह्मावयवभूतम् । '[ब्राह्मोऽ] जातौ' [६।४।१७१] इत्यणि टिलोपे च ब्राह्ममिति भवति । रुचं ब्राह्मं देदीप्यमानं ब्राह्मं ब्राह्मणजातिम् । जनयन्त उत्पादयन्तो देवाः । अग्रे प्रथमम् । तत् तदिदमेवाब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । यस्त्वा एवम् । त्वा रुचं ब्राह्मं ब्राह्मणजातिं त्वाम् । एवं पूर्वोक्तप्रकारेण, [5]परब्रह्मैव ब्राह्मणजातिरिति यो ब्राह्मणो विद्यात् । तस्य ब्राह्मणस्य । वशे देवा [6]असन् अभवन् भवन्ति । परब्रह्मवशवर्तिनो देवास्तदंशभूतस्यापि वशवर्तिनो भवन्तीत्यर्थः ॥ २१ ॥

[7]श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२ ॥

श्रीश्च लक्ष्मीश्च ते सवितुस्तव पत्न्यौ । यया [8]आश्रयणीयो [9]भवति सा श्रीः । आदित्यो यया तु लक्ष्यते सा लक्ष्मीः । श्रीः [10]शोभानुरूपा । लक्ष्मीः दीप्तिलक्षणचिद्रूपिणी । उभे ते पत्न्यौ

---

१ (मा० ३१।२०)। २ 'प्रकाश्यते' नास्ति–ख० । ३ "ब्रह्मणोऽपत्यं ब्राह्मिः, इञि टिलोपः" इति–मही० । ४ (मा० ३१।२१)। ५ परं ब्रह्मैव–ग० । ६ आसन्–ख·ग० । ७ (मा० ३१।२२)। ८ आश्रयणि–ख० । ९ भवन्ति–ख० । १० शोभानुरूपिणी–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भार्ये। ते के ? [1]अहोरात्रे ये पत्नीत्वेन कल्पिते। पार्श्वे उभयपार्श्ववर्तिन्यौ ते। नक्षत्राणि अश्विन्यादीनि तव रूपम्। अश्विनौ द्यावापृथिव्यौ। तव व्यात्तं [2]मुखम्, [3]मुखमिव। एवंरूपं त्वामिदमहं याचे–इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाणेति[4]। एतत्पदद्वयमपि इषुधातोः [१५२६ क्र्यादिः] रूपम्। विकरणव्यत्ययश्च। इष्णन् इच्छन् कर्मफलमिच्छन्। [5]इदमिषाण इदं फलमिच्छ। किं तदिति? अमुं म इषाण। अमुं लोकं मे मदीयत्वेन। इषाण इच्छ। सर्वलोकं मे मदीयत्वेन। इषाण इच्छ। आत्मत्वेन वा इषाण। अहमेवेदं सर्वमिति सर्वात्मभावमेवेच्छेति। एवमादित्यः स्तूयते ॥ २२ ॥

[6]तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म तदापस्तत्प्रजापतिः ॥ २३ ॥

"अप्तोर्यामः सप्तममहर्भवति" इत्युपक्रम्य–"सर्वं जुहोति....सर्वस्याप्त्यै सर्वस्यावरुध्यै" [शत० ब्रा० १३।७।१।६] इति, तत्रायमनुवाको विनियुक्तः। "ब्रह्म वै स्वयम्भु तपोऽतप्यत" [शत० ब्रा० १३।७।१।१] इत्यभिधानात् सर्वमेधिकोऽयमनुवाकः। अस्यानुवाकस्य ब्रह्मा ऋषिः। आत्मदेवत्यः। सप्तमेऽहनि सर्वहोमे विनियुक्तः। तत्राद्ये द्वे ऋचावनुष्टुभौ। तदेवाग्निः अग्न्यादीनां यद् ब्रह्म अधिष्ठानं तदुपादानकारणं च, तदेव अयं प्रतीयमानोऽग्निः। तदेव तद् ब्रह्मैव आदित्योऽपि। तदेव वायुरपि। तदेव चन्द्रमाः। तदेव शुक्रम्। शुक्रं शुद्धं रागादिदोषप्रयुक्तिरहितं यत् शुक्रं तद् ब्रह्मैव। तद् ब्रह्म। ऋग्यजुःसामलक्षणं ब्रह्म [7]वेदः, ब्रह्म अपि तदेव ब्रह्मैव[8]। आपः [9]तदेव। तत् प्रजापतिः तदेव तद् ब्रह्मैव ॥ २३ ॥

[10]सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ॥ २४ ॥

[11]पुरुषादधि। अधीति सकाशवचनः। पुरुषात् सकाशात्। सर्वे निमेषाः परमाणुत्रुटिलक्षणाश्च। निमेषादयः कालावयवविशेषाः। सर्वे जज्ञिरे जाताः। विद्युतः [12]विद्युत्पर्जन्यादयः।

---

१ 'अहोरात्रे ये' इत्यस्य स्थाने 'अहोरात्र्यौ' इति–ख०। २ 'मुखम्' नास्ति–ख०। ३ मुखमीत–ख०। ४ 'इति' नास्ति–क०। ५ 'इदमिषाण इदं फलमिच्छ' नास्ति–क-ग०। ६ (मा० ३२।१)। ७ धेदम्–क०, देवम्–ख०। ८ ब्रह्म च–ख०। ९ 'तदेव' नास्ति–क-ख०। १० (मा० ३२।२)। ११ 'पुरुषादधि' नास्ति–क०, पुरुषादधीति–ख-ग०। १२ विद्युत्पर्जन्याश्च–ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुरुषादधि जज्ञिरे। नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभदिति[1]। एनं साक्षादपरोक्षरूपं पुरुषं सर्वस्यापि जनकं [2]सन्तं सर्वसाक्षिणम्। न परिजग्रभत् न परिगृह्णाति। एवमूर्ध्वमूर्ध्वभागम्। न किञ्चिदपि प्रमाणं परिजग्रभत् न परिगृह्णाति न [3]स्पृशति न ज्ञापयतीत्यर्थः। तिर्यञ्चं पार्श्वभागं न परिजग्रभत्। [4]मध्ये मध्यं न परिजग्रभत्। [अ]प्रसिद्धरूपतया प्रत्यक्ष[ाऽ]गोचरत्वात्, स एव व्याप्तिग्रहणशून्यतयाऽनुमानस्याविषयत्वात्, अत एव पदपदार्थसंगतिग्रहण[ाऽ]योगाच्छब्द[स्य] प्रवृत्तिनिमित्त[5]दृष्टजात्यादेरभाव[व]त्त्वेन [च] अगोचरः पुरुषः। "स एष नेति नेत्यात्मा [अगृह्यो] नहि गृह्यते" [बृहदा० ३।९।२६] इत्यादिश्रुतेश्च ॥ २४ ॥

[6]न तस्य॑ प्रति॒मा अ॑स्ति॒ यस्य॒ नाम॑ म॒हद्यशः॑।
हि॒र॒ण्य॒ग॒र्भ इत्ये॒षः ॥ २५ ॥

गायत्री आत्मदेवत्या। तस्य [7]पुरुषस्य प्रतिमा नास्ति। प्रतिमा प्रतिमानं [8]प्रतिमाभूतं किञ्चिदप्येतत्सदृशं नास्ति न दृश्यते। यस्य परमेश्वरस्य महद् यशः कीर्तिः। नाम [9]नमतीति नाम। महद्यश एव यस्य नाम तस्य प्रतिमा नास्तीति। हिरण्यगर्भ इत्येषः। परमात्मैव हिरण्यगर्भ इति वेदान्तवादिनो वदन्ति ॥ २५ ॥

[10]ए॒षो ह॑ दे॒वः प्र॒दिशोऽनु॒ सर्वाः॒ पूर्वो॑ ह जा॒तः स उ॒ गर्भे॑ अ॒न्तः।
स ए॒व जा॒तः स ज॑नि॒ष्यमा॑णः प्र॒त्यङ् जना॑स्तिष्ठति स॒र्वतो॑मुखः।
यस्मा॒न्न जा॒त इत्ये॒षः ॥२६॥

[11]आत्मदेवत्या त्रिष्टुप्। एषो ह देवः। ह एष एव देवनादिगुणयुक्तो देवः। दिशः प्रदिशश्च सर्वा व्याप्यानुवर्तते तिर्यगूर्ध्वमधश्चेति। पूर्वो ह जातः। पूर्वः सर्वेभ्य उत्पत्तिमद्भ्यः पदार्थेभ्यश्च पूर्व एव। करणत्वेन कारणत्वेन च यद्यदुद्भाव्यते तस्मादपि पूर्व एव। जातः सिद्ध इत्यर्थः। स्वभावतस्त्वेवंरूपोऽपि लीलया स उ स एव। गर्भे अन्तः। मातुरुदरेऽन्तः स्थितः सन्नवतिष्ठते। स एव लीलया जातः स एव [च] जनिष्यमाण इति व्यपदिश्यते, द्वितीयस्याभावादेव। प्रत्यङ् जनाः। व्यत्ययः। जनानां प्रत्यङ् प्रत्यगात्मा भूत्वाभितिष्ठतीति।

---

१ 'इति' नास्ति—ख-ग०। २ 'सन्तम्' नास्ति—ख०। ३ मृशति—क-ग०।
४ 'मध्ये' नास्ति—ख०। ५ 'दृष्ट' इत्यस्य स्थाने 'षष्टि' इति—ख-ग०, 'इष्ट' इति—क०।
६ (मा० ३२।३)। ७ परमपुरुषस्य—ख-ग०। ८ 'प्रतिमाभूतम्' नास्ति—ख०।
९ नमयतीति—ग०। १० (मा० ३२।४)। ११ 'आत्मदेवत्या' नास्ति—ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत एव सर्वतोमुखः। [1]तथा च गीतायाम्—"सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति" [गीता १३।१३] इत्यभिधीयते। यस्मान्न जात इति। यस्मात् परमेश्वरात्। जातोऽन्यो नास्त्येव वस्तुतः। अपि तु इत्येष इति। एवंरूपेण एष एव प्रतीयते नान्य इति ॥ २६ ॥

[2]वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीळम्।

तस्मिन्निदꣳ सं च वि चैति सर्वꣳ स ओतः प्रोतश्च विभूः प्रजासु ॥२७॥

आत्मदेवत्या त्रिष्टुप्। वेनः कश्चिन्मेधावी श्रीहरिगुरुकारुण्यसंपन्नः। तद् ब्रह्मस्वरूपम्। पश्यत् पश्यति। निहितं गुहा। छान्दसो विभक्तिलोपः। गुहायां निहितम्। सर्वगृहगुहायां निहितमिव स्थितं दुर्दर्शमिव स्थितमपि तदेवं पश्यति। किं तदिति तदाह–यत्र विश्वं भवत्येकनीडम्। यत्र यस्मिन् स्वरूपे। इदं विश्वं सर्वविकारजातमेकनीडम् एकनिलयं पक्षिणामाश्रयस्थानमिव स्थितं विश्वं यत्र भवति प्रतिष्ठितं भवति। तस्मिन्निदं तस्मिन्नेव परमात्मनि। इदं विकारजातमपि चोपसंहारकाले समेति। समित्येकीभावे [निरु० १।३]। स्वकारणेनैकतामाप्नोति। सर्गकाले प्राप्ते पुनर्व्येति च उदेति। तस्मात् कारणात् स ईश्वरः। ओतः शरीरादिभावेन ओतः, जीवभावेन प्रोतश्च। पटतन्तुवदोतप्रोतभावेन प्रजासु विभूः यः स्वयम्भूर्वर्तत इति परमात्मा निरूप्यते स्तूयते च ॥ २७ ॥

[3]प्र तद्वोचेदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत्।

त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥२८॥

आत्मदेवत्या त्रिष्टुप्। हिरण्यगर्भः प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वः। नु क्षिप्रम्। विद्वान् पण्डितः। शाश्वतं तदात्मतत्त्वमेव। नु क्षिप्रमेव[4]। प्रवोचेत् प्रब्रूयात्। धाम विभृतं गुहा सत्। तदात्मतत्त्वम्। गुहा गुहायामन्तःकर[ण? णे]। धाम प्रकाशरूपम्। विभृतं वि[वृ?द्ध]तम्। अन्तर्यामिरूपेण[5] लीलया विहरदासीत्। किं च, त्रीणि पदानि। निहिता निहितानि। गुहा गुहायामिव बहिरपि। अस्य [6]आवृतस्य परमात्मनः। त्रीणि पदानि निहितानि। त्रयः प[ा]दा बहिरपि निहिता अस्य। सर्गस्थितिलयाः, त्रयो

---

१ 'तथा च गीतायाम्' नास्ति–ख-ग०। २ (मा० ३२।८)। ३ (मा० ३२।९)। ४ 'एव' नास्ति–ख०। ५ अन्तर्यामिरूपया–क-ग०। ६ अमृतस्य–उव० मही०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वेदाः, त्रयो लोकाश्च । त्रिशब्दो भूयसामुपलक्षणम् । भूयांसो हि गुणाः श्रूयन्ते सत्यकामादयः, जाग्रदादयो ह्यवस्थाश्च । यस्तानि त्रीणि पदानि[1] जानाति स आत्मा पितुः सर्वस्य जनको ब्रह्मा तस्य ब्रह्मणश्च पितुः पिता श्रीमहाविष्णुः । पिता सत् [2]भगवतस्तदात्मतत्त्वं प्रब्रूयादिति संबन्धः ।। २८ ।।

[3]स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ।। २९ ।।

आत्मदेवत्या त्रिष्टुप् । स एव ऋषिः । स परमात्मा ईश्वरः । नः अस्माकम् । बन्धुः बध्नात्यनुबध्नातीति निरुपाधिको बन्धुः । नः जनिता जनयिता । स च नः विधाता धारकः पोषकश्च । धामानि नः अस्माकम् । धामानि स्थानानि नामानि जन्मानि च । स एव वेद जानाति । विश्वानि भुवनान्यपि स एव वेद । यत्र देवाः । यत्र यस्मिन् वस्तुस्वरूपे । अमृतं मोक्षरूपम् । आनशानाः सम्यग्ज्ञानेन व्याप्नुवाना देवाः । द्योतनात्मके तृतीये त्रिपादलक्षणे ब्रह्मस्वरूपे । धामन् धामनि स्थाने । देवा अध्यैरयन्त अधिभावेन प्राप्तवन्त इति ।। २९ ।।

[4]परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश ।। ३० ।।

आत्मदेवत्या त्रिष्टुप् । परीत्य 'इण् गतौ' [१०४५ अदा०] । परीत्य भूतानि । भवन्तीति भूतानि । सर्वाणि भूतानि परीत्य परिज्ञाय, भूतानां तत्त्वं सम्यक्परीक्ष्य । परीत्य लोकान् । "लोकस्तु भुवने जने" [अमर० ३।३।२] । परिज्ञाय पर्यालोच्य । परीत्य सर्वाः प्रदिशो दिशश्च । सर्वा दिशः प्रदिशश्च [5]विदिशश्च परीत्य तत्र तत्रानुगतं यद्वस्तुतत्त्वं तत्सम्यङ्निरीक्ष्य अवधार्य निश्चित्य । स्थितो विद्वान् पुनरपि–उपस्थाय प्रथमजामृतस्य । सत्यस्य ब्रह्मणः । प्रथमजां निःश्वासवत् समुद्गतां वाचम् ऋग्यजुःसामलक्षणां महावाक्यस्वरूपिणीम् । उपस्थाय संप्रा[र्थ्यापू्य]। अत्रोपस्थानं नाम वाक्यस्थपदानां शक्तिविवेकद्वारेण वाक्यतात्पर्यावधारणम् । एवं वाक्यतात्पर्यं निश्चित्य वाक्यार्थज्ञानेन आत्मना स्वरूपेण केवलचिदानन्दमात्ररूपेण । आत्मानं

---

१ स आत्मा जानाति–क-ख-ग० । २ भगवता तदा–ख० । ३ (मा० ३२।१०) ।
४ (मा० ३२।११) । ५ दिशश्च–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वस्वरूपभूतं ब्रह्म । अभिसंविवेश अभिसंविशति । सर्वोपाधिपरित्यागेन स्वस्वरूपमेव प्राप्त इव भवतीत्यर्थः ॥ ३० ॥

[1]परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥ ३१ ॥

आत्मदेवत्या त्रिष्टुप् । स्वस्वरूपप्राप्तिप्रकारं पुनर्विविनक्ति—[2]परि द्यावापृथिवीति । द्यावापृथिव्यौ [परि] इत्वा परीत्य परिज्ञाय तत्संप्राप्य च । एवं लोकान् [3]परीत्य दिशः [3]परीत्य । स्वः [4]स्वर्गलोकं स्वः आदित्यं च [5]परीत्य परिदृष्ट्वा स्वोपाधिपरित्यागेनादित्यस्वरूपेण च सच्चिदानन्दस्वरूपेण संप्राप्य । ऋतस्य यज्ञादेः । तन्तुम् अदृष्टरूपम् [6]अनेकभोगोपहेतुम् । विततं विस्तृतम् अनेकजन्मार्जितं च । सम्यग्ज्ञानेन विचृत्य विच्छिद्य परिसमाप्य उपसंहृत्य ज्ञानाग्निना दग्ध्वेत्यर्थः । तद्ब्रह्म अपश्यत् साक्षात्करोति । तदभवत् । ब्रह्मात्मभेदनिर्वचनेन स्वयं तद्ब्रह्माभवत् । तदासीत् । आसीद् अहङ्काराज्ञानयोर्निःशेषनिवृत्त्या ब्रह्मैवासीदित्यनुवादः ॥ ३१ ॥

मेधाफलमिदं श्रुत्वा कश्चिन्मेधाकामो मेधां याचते द्वाभ्याम्—

[7]सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषꣳ स्वाहा ॥ ३२ ॥

सदसस्पतिदेवत्या गायत्री । सदसस्पतिं ([8]यज्ञसदसः पतिं यज्ञगृहस्य पतिम् । अद्भुतमत्यभिनवमाहात्म्यमचिन्त्यशक्तिम् । प्रियमात्मरूपम् । इन्द्रस्य काम्यं कामसंयुक्तं कामनार्हं कमनीयम् । एवंगुणविशिष्टं सदसस्पतिम् । सनिं दानम् । सामान्येन दाननिर्देशः । मेधां च । [मेधा] धारणावती धीः, तां मेधाम् । अयासिषं याचे । द्विकर्मकोऽयं धातुः । सदसस्पतिं याचे, मेधां याच इति । स्वाहेति होमार्थः ॥ ३२ ॥

[9]यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥ ३३ ॥

---

१ (मा० ३२।१२) । २ 'परि द्यावापृथिवीति' नास्ति—क० । ३ परित्वा—ख० । ४ स्वर्गं लोकम्—ख० । ५ परित्वा—क-ख-ग० । ६ अनेकभोगाय हेतुम्—क-ग० । ७ (मा० ३२।१३) । ८ 'यज्ञसदसः पतिम्' इत्यारभ्याध्यायसमाप्तिपर्यन्तं कोष्ठकान्तर्गतः पाठः खपुस्तके नास्ति, तत्र ९६–१०१ संख्यकानां पत्राणां त्रुटितत्वात् । ९ (मा० ३२।१४) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आग्नेय्यनुष्टुप्, यजुरन्ता । मेधाकामोऽनया मेधां याचते । हे श्रीभगवन्नग्ने, मेधां देवगणा उपासते प्रार्थयन्ते । पितरश्च उपासते । तया मेधया । अद्य अस्मिन्नहनि । मां मेधाविनं कुरु । स्वाहेति होमार्थः ॥ ३३ ॥

श्रीकामोऽनेन मन्त्रेण श्रियं याचते—

[1]इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ ३४ ॥

श्रीदेवत्याऽनुष्टुप्[2], यजुरन्ता । इदं ब्रह्म ब्राह्मणजातिः, क्षत्रं च क्षत्रियजातिश्चेत्येते उभे ब्रह्मक्षत्रे । मे मदीयाम् । श्रियमश्नुतामुपजीवताम् । अत एव मयि देवाः देवनादिगुण-युक्ता देवाः । उत्तमामुत्कृष्टां विच्छेदरहिताम् । श्रियं धनधान्यादिसम्पदम् । दधतु स्थापयन्तु । तस्यै श्रियै देवतायै तुभ्यम् । स्वाहेति होमार्थः ॥ ३४ ॥

'अपेतः' [३५।३५–५५] इत्यनुवाकः [3]पितृदेवत्यः । आदित्य[स्या]र्चं देवानां वा । पलाशशाखया [4]व्युदूहति [का० श्रौ० २१।३।३१; शत० ब्रा० १३।८।२।३]—

[5]अपेतो यन्तु पणयोऽसुम्ना देवपीयवः ।
अस्य लोकः सुतावतः ॥ ३५ ॥

पितृदेवत्या गायत्री । अप इतः पणयः । इतः अस्मात् श्मशानस्थानलक्षणात् स्थानात् । पणयः असुराः । अपयन्तु अपगच्छन्तु । पुनश्च कथंभूता पणयः ? असुम्नाः । सुम्नं सुखं न विद्यते येषां तेऽसुम्ना असुखकराश्च । देवपीयवः । पीयतिर्हिंसाकर्मा [निरु० ४।२५] । देवान् पीयन्ति घ्नन्ती[ति] देवपीयवः देवानां हिंसितारः पणय इतोऽपयन्तु । किमिति ? अस्य लोकः सुतावतः । सुतवतः लोकस्थानं सुतवतः सोमाभिषवं कृतवतः सोमयाजिनोऽस्य यजमानस्यायं लोकः, न तु युष्माकमिति ॥ ३५ ॥

दक्षिणां शाखां निरस्य [ति?]....परिश्रयति [का० श्रौ० २१।३।३२]—

[6]द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥ ३६ ॥

---

१ (मा० ३२।१६)। २ त्रिष्टुप्–क-ग० । ३ 'पित्र्यः' इति गपुस्तकस्थः पाठः, "पितृदेवत्यः" इति च तस्यार्थस्तत्रैव टिप्पण्याम् । ४ व्यूहति–क-ग० । ५ (मा० ३५।१) । ६ द्युभिरिति मन्त्रो माध्यन्दिनसंहितायामपेत इति मन्त्रस्यैवान्तिमो भागः, काण्वसंहितायां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पितृदेवत्या [1]गायत्री । द्युभिः । द्युशब्देन श्रुतौ ऋतवोऽभिधीयन्ते । द्युभिः ऋतुभिः । अहोभिः प्रसिद्धैः । अक्तुभिः रात्रिभिः । व्यक्तं स्पष्टम् । [क्षि क्षये ?] । अवस्यन्त्यस्मिन्निति अवसीयत इति वा अवसानं शवसंस्कारस्थानम् । अस्मै यजमानाय । यमो ददातु ॥ ३६ ॥

[2]सविता ते शरीरेभ्यः पृथिव्याँ लोकमिच्छतु ।
तस्मै युज्यन्तामुस्रियाः ॥ ३७ ॥

पितृदेवत्या गायत्री । सविता ते तव यजमानस्य तव । शरीरेभ्यः । व्यत्ययः । शरीराणाम् । अस्यां पृथिव्याम् । लोकं स्थानम् । सविता इच्छतु सविता अनुजानातु । तस्मै क्षेत्राय शरीराय । संस्कारार्थं युज्यन्ताम् । तस्मै सवित्रा अनुज्ञातक्षेत्राय क्षेत्रगमनाय । उस्रियाः रश्मिसंबन्धिनोऽनड्वाहः । युज्यन्तां नियुज्यन्ताम् ॥ ३७ ॥

सीताः कृषति [का० श्रौ० २१।४।१]—

[3]वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा ।
विमुच्यन्तामुस्रियाः ॥ ३८ ॥

पितृदेवत्या गायत्री । पुनातिरत्र विदारणार्थः । वायुः पुनातु विदारयतु । अग्नेर्भ्राजसा सूर्यस्य वर्चसा दीप्त्या । सविता पुनातु विदारयतु । विमुच्यन्तामुस्रियाः अनड्वाहः । विमुच्यन्तां विमोक्षणं क्रियन्ताम् ॥ ३८ ॥

[4]सर्वौषधं वपति [का० श्रौ० २१।४।४]—

[5]अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ३९ ॥

[6]अयं मन्त्रो व्याख्यातः [१२।८०] ॥ ३९ ॥

च परवर्तिनः सविता त इति मन्त्रस्यादिमोंऽशः । अत्रानन्दबोधेन स्वेष पृथगेव व्याख्यातः ।

१ परं यजुः—सर्वा० । २ (मा० ३५।२) । ३ (मा० ३५।३) ।

४ सर्वौषधिं वाचयति—क-ग० । ५ (मा० ३५।४) । ६ 'अयम्' नास्ति—ग० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शरीराणि निवपति [का० श्रौ० २१।४।५]—

[1]सविता ते शरीराणि मातुरुपस्थ आवपतु । तस्मै पृथिवि शं भव ।

प्रजापतौ त्वा देवतायामुपोदके लोके निदधाम्यसौ ॥ ४० ॥

पितृदेवत्या गायत्री । शरीराणि शरीरोपलक्षितानि [2]अस्थीनि । मातुः पृथिव्याः । उपस्थे उत्सङ्गे । सविता ते तव । आवपतु स्थापयतु । तस्मै पृथिवि । तस्मै अस्थिरूपाय यजमानाय । शं सुखं सुखरूपिणी भव । [3]प्रजापतौ त्वेति यजुः । प्रजापतौ देवतायाम् । उपोदके उदकसमीपे । लोके स्थाने । त्वा अस्थिभूतं त्वाम् । निदधामि स्थापयामि । असौ । असाविति नामग्रहणम् ॥ ४० ॥

[4]परं मृत्यो अनु परेहि पन्थाँ यस्ते अन्य इतरो देवयानात् ।

चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥ ४१ ॥

मृत्युदेवत्या त्रिष्टुप् । परं मृत्यो अनु परा इहि पन्थाम् । पन्थानम् । हे मृत्यो परं पन्थां [5]परानु इहि पराङ्मुखो भूत्वा गच्छ । यस्ते अन्य इतरो देवयानादिति[6] पन्थानं विशिनष्टि । यस्ते त्वदीयोऽयं[7] पन्थाः । तस्माद्देवयानात् । अस्माद्देवयानमार्गादितरः स्वरूपतः पृथक् । अन्यश्च नामतोऽपि पितृयान इति । तं पितृयानं पन्थानं गच्छ । चक्षुष्मते अतिशयेन चक्षुरस्यास्तीति चक्षुष्मान्, तस्मै । शृण्वते श्रवणं कुर्वते । ते तुभ्यं ब्रवीमि । नहि त्वया अदृष्टमश्रुतं विद्यते । मा नः प्रजां रीरिषो मोत वीरान् । नः अस्माकम् । प्रजां त्वं मा रीरिषः मा हिंसीः । उत अपि च । वीरान् पुत्रान् मा रीरिषः । स्नेहविशेषाद्विभज्य वचनम् ॥ ४१ ॥

[8]शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः ।

शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभिशूशुचन् ॥ ४२ ॥

पितृदेवत्याऽनुष्टुप्[9] । शं वातः । ते तव एवंविधस्य यजमानस्य । शं वायुः । शं सुखरूपो भूयात् । शं हि ते घृणिः । घृणिः सूर्यः शं भूयात् । शं ते भवन्त्विष्टकाः । अत्र स्थापिताः ।

---

१ (मा० ३५।५–६) । २ स्थानानि–क-ग० ३ 'प्रजापतौ त्वेति' नास्ति–क० ।
४ (मा० ३५।७) । ५ अनु परा–उव० । ६ 'इति' नास्ति–क० ।
७ 'अयम्' नास्ति–क० । ८ (मा० ३५।८) । ९ त्रिष्टुप्–क-ग० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ते शं भवन्तु । शं ते भवन्त्वग्नयः । शं भवन्तु । पार्थिवासः पृथिवीसंबन्धिनोऽग्नयः । त्वा त्वाम् । मा अभि[शो ? शू]शुचन् तव मा शोकं कुर्युरिति ॥ ४२ ॥

जपति—

[1]कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः ।
अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥ ४३ ॥

वैश्वदेवी बृहती । ते तुभ्यम् । दिशः शिवतमाः कल्पन्ताम् । आपश्च तुभ्यं शिवाः शिवतमाः शान्ततमाः कल्पन्ताम् । तुभ्यं सिन्धवः नद्यः शिवतमा भवन्तु । अन्तरिक्षं तुभ्यं शिवतमं भवतु । कल्पन्तां ते दिशः सर्वाः । दिशो विदिशश्च शिवतमाः कल्पन्ताम् ॥ ४३ ॥

[2]अश्मन्वती रीयते सꣳरभध्वमुत्तिष्ठत प्रतरता सखायः ।
अत्रा जहीमोऽशिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान् ॥ ४४ ॥

वैश्वदेवी त्रिष्टुप् । [3]सुचीकः [ऋषिः] । अश्मन्वती । [4]अश्मवतीयं नदी पाषाणवती । रीयते । 'ऋृ गतौ' [१४९८ क्र्यादिः] रीयते अस्माभिर्गम्यते । यतो विषमा अतो ब्रूमः । संरभध्वमुत्तरणे यत्नं कुरुध्वम् । अतस्तदुत्तरणार्थमुत्तिष्ठत सखायः अभिमुखा भवत । प्रतरता प्रतरत प्रतारयत वा, प्रतरणं कुरुत कारयतेति वा । किं तद्व्याहर इति । अत्र ये अशिवा अशान्ता [5]असन् अशिवा आसन् । तान् जहीमः त्यजामः । शिवान् वाजान् अन्नविशेषान् । अभि प्रति । उत्तरेम वयमतितरेम ॥ ४४ ॥

अपामार्गैरपमृजते[6] [का० श्रौ० २१।४।२२]—

[7]अपाघमप किल्बिषमप कृत्यामपो रपः ।
अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव ॥ ४५ ॥

लिङ्गोक्तदेवत्याऽनुष्टुप्[8] । शुनःशेप ऋषिः । इयं दुःस्वप्ननाशनी । हे अपामार्ग, त्वम् । अघं सामान्यतः । अस्मत् अस्मत्तः । अपसुव अपगमय । अप किल्बिषम् अभक्ष्यभक्षणनिमित्तं पापम् । अस्मत्तः अपसुव अपगमय । अप कृत्यां निन्दितप्रवृत्तिम् । अस्मत् अस्मत्तः । दूरत एव

---

१ (मा० ३५।१९)। २ (मा० ३५।१०)। ३ सूचीकः—क-ग०। ४ अश्मवतीनामियम्—ग०। ५ अस्मात्वः—क-ग०। ६ अपमृजन्ति—क-ग०। ७ (मा० ३५।११)। ८ त्रिष्टुप्—क-ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपसुव । रप इति पापनाम [निरु० ४।२१] । अपो रपः । पापम् अपसुव अपगमय। [पापं] महापातकोपपातकसंकरीकरणमलिनीकरणप्रकीर्णकादि । केचित्तु [1]चतुर्विधानि पापानि चतुर्भिर्वर्ज्यैरपनुदत्विति [व्याचक्षते]। अप दुःस्व[प्नं ? प्न्यं] दुःस्वप्नप्रयुक्तं दुःस्वप्नफलस्य हेतुभूतं दुरितम्। अस्मत् [अस्मत्तः]। अपसुव अपगमयेति ॥ ४५ ॥

[2]सुमित्रिया न इति स्नाति [का० श्रौ० २१।४।२३]—

[3]सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ ४६ ॥

मन्त्रोऽयं[4] व्याख्यातः [६।३१] ॥ ४६ ॥

अनडुत्पुच्छमन्वारभ्य [का० श्रौ० २१।४।२३]—

[5]अनड्वाहमन्वारभामहे स्वस्तये ।
स न इन्द्र इव देवेभ्यो वह्निः संतारणो भव ॥ ४७ ॥

आनडुह्यनुष्टुप्। शुनःशेपः। अनड्वाहमन्वारभामहे अनडुत्पुच्छमन्वारभामहे, अन्वारम्भणं कुर्मः। कस्मै ? स्वस्तये अविनाशाय। स वह्निः वहनाद्वह्निः अग्निः । नः अस्माकम्। संतारणः संतारकः। भव भवतु। इन्द्र इव देवेभ्यः। इन्द्र इव यथा देवानां सर्वापद्भ्यः संतारको वर्तते, तथाऽग्निरस्माकं संतारणः संतारकः। भव भवतु ॥ ४७ ॥

[6]उत्क्रामन्ति —

[7]उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ४८ ॥

व्याख्यातोऽयं[8] मन्त्रः [२२।६] ॥ ४८ ॥

---

१ चतुर्भिर्वर्ज्यैः कायिकवाचिकमानसपरकृताभिचाररूपैश्चतुर्विधानि पापानि हे अपामार्ग भवान् अपनुदत्विति योजना। २ 'सुमित्रिया न इति स्नाति' नास्ति–क०। ३ (मा० ३५।१२)। ४ 'अयम्' नास्ति–ग०। ५ (मा० ३५।१३)। ६ आगच्छन्ति–का० श्रौ० [२१।४।२३]। ७ (मा० ३५।१४) ८ 'अयम्' नास्ति–ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[[1]अग्न आयूंꣳषि पवस आसुवोर्जमिषं च नः।
आरे बाधस्व दुच्छुनाम् ॥ ४८ ॥]

जुहोति [का० श्रौ० २१।४।२५]—

[2]आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमान्स्वाहा ॥ ४९ ॥

आग्नेयी त्रिष्टुप्, यजुरन्ता। [3]वैश्वानरः। हे श्रीभगवन्नग्ने, हविषा वृधानः। हविषा वर्धमानः। घृतप्रतीकः घृतमुखः। घृतयोनिः घृतं योनिः कारणं स्थानं यस्य स घृतयोनिः। एधि वर्धस्व। घृतप्रतीको भव। घृतं पीत्वा मधु चारु। मधुमत् स्वादु रुचिकरम्। गव्यं गोभ्यो हितम्, गवां घृतं पीत्वा। पितेव। [पिता] पुत्रं यथाभिरक्षति तथेमान् यजमानान् एवं-दशामापन्नान् रक्षतात्। इत उत्तरकालं सुखं यथा भवति तथाभिरक्षतादिति। स्वाहेति होमार्थः ॥ ४९ ॥

ग्रामश्मशानान्तरे मर्यादालोष्टं निदधाति [का० श्रौ० २१।४।२४]—

[4]इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ ५० ॥

मृत्युदेवत्या त्रिष्टुप्। [5]सङ्कसुक ऋषिः। इमं जीवेभ्यः। इमं लोष्टम्। जीवेभ्यः अर्थाय। [6]परिधिं परिधीयत इति परिधिस्तं लोष्टम्। दधामि स्थापयामि। किमिति? मैषां नु गात्। एषां नु गात्। अपरः जीवानां मध्ये अपरः अस्मादपि। नु क्षिप्रम्। मा अगात्। पितृलोकमिति [वि?]शेषः। पितृलोकं मा गच्छेत्। अर्थमेतम् एतमर्थं पुरस्कृत्य प्रार्थयामः। शतं जीवन्तु शरदः पुरूचीः। [7]यज्ञाञ्चनाः दानाध्ययनयागाद्यञ्चनवतीः शरदः। सर्वजीवाः जीवन्तु। अन्तर्मृत्युं दधतां पर्वतेन। मृत्युमन्तर्दधतामन्तर्धानं तिरोधानं कुर्यात् ॥ ५० ॥

---

१ (मा० ३५।१६)। एष मन्त्रोऽत्रानन्दबोधेन नैव स्थापितो न च व्याख्यातः। अस्य व्याख्यानम् [१९।३८] द्रष्टव्यम्। २ (मा० ३५।१७)। ३ वैखानस ऋषिरिति पाठेन भाव्यम्। द्रष्टव्या—सर्वा०। ४ (मा० ३५।१५)। ५ सङ्कुसुक—क-ग०। ६ एधिरे—क-ग०। ७ 'यज्ञाञ्चनाः' इत्यत्र—"बह्वञ्चनाः" इति पाठान्तरम्—ग० टि०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथैषां [1]परिदां वदन्ति [का० श्रौ० २१।४।२६]—

[2]परीमे गामनेषत पर्यग्निमहृषत ।
देवेष्वक्रत श्रवः क इमाँ२ आदधर्षति ॥ ५१ ॥

ऐन्द्री अनुष्टुप् । [3]भरद्वाज ऋषिः । परि इमे गामनेषत । इमे जीवाः । गां भूमिम् । पर्यनेषत । नयतेर्लुङि सिच एतद्रूपम्[4] । परितोषं गमयन्ति । पर्यग्निमहृषत । परि अग्निं परि अहृषत हवींषि प्रापयन्त । देवेष्वक्रत श्रवः । अकृषत । कीर्तिर्देवेषु ऋत्विक्षु अक्रत । अकृषतेति प्राप्ते सिचो लोपः । [अबोधनम् अक्रमः ?] । इमान् जीवान् कृतकृत्यान् । कः को नाम आदधर्षति धर्षणं कः करोति ॥ ५१ ॥

अद्वारेणौपासनं निरस्यति[5] [का० श्रौ० २१।४।२७]—

[6]क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ५२ ॥

आग्नेयी त्रिष्टुप् । [7]दमन ऋषिः । क्रव्यम् आमिषमत्तीति क्रव्यात्, तं क्रव्यादं शवदाहदूतकर्माणमग्निम् । प्रहिणोमि प्रक्षिपामि । यमराज्यं गच्छतु रिप्रवाहः । रिप्रमिति पापनाम [निरु० ४।२१] । रिप्रं पापं वहतीति रिप्रवाहः शवदाहकोऽग्निः । यमराज्यं यमलोकं गच्छतु । इहैवायमितरो जातवेदाः । क्रव्यादग्नेरितरः अन्यः । जातवेदाः सवि[ज्ञः ? द्यः] योऽग्निः [स] इहैव तिष्ठत्विति । स च देवेभ्यो हव्यं वहतु प्रजानन् । देवेभ्यः देवतार्थम् । हविः प्रजानन् देवानां हविर्भागमवगच्छन् । हव्यं वहतु हविर्योग्यं हव्यं प्रापयतु ॥ ५२ ॥

[8]वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके ।
मेदसः कुल्या उप तान्स्रवन्तु सत्या एषामाशिषः सन्तु कामाः स्वाहा ॥५३॥

जातवेदसी[ति?] त्रिष्टुप् । हे जातवेदः, पितृभ्यो वपां वह प्रापय । यत्रैनान् वेत्थ । यत्र यस्मिन्पराकेऽतिदूरदेशे निहितान् एतान् पितॄन् । वेत्थ जानासि । तत्रत्येभ्यः पितृभ्यो हव्यं

---

१ परिधीन् दधाति—क-ग० । २ (मा० ३५।१८) । ३ भारद्वाजः शिरिम्बिठः—सर्वा० ।
४ अनर्टर्लिटि शिब्येतद् रूपम्—क-ग० । ५ उद्वारणोपासनम्—क-ग० । ६ (मा०३५।१९) ।
७ मद्न—क०, मदन—ग० । ८ (मा० ३५।२०) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वहतु । मेदसः कुल्या उप तान् स्रवन्तु । तान् पितॄन् प्रति । मेदसः कुल्याः सरितः । उपस्रवन्तु समीपं गच्छन्तु । सत्या एषाम् । एषां दातॄणां यजमानानाम् । आशिषः अभीष्टस्यार्थस्य आशंसनानि आशिषः । सत्याः अवितथाः । सन्तु भवन्तु । कामाश्च आशिषो मूलभूताः । ते च सत्याः सन्तु । स्वाहा सुहुतमस्तु ॥ ५३ ॥

[1]स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः ॥ ५४ ॥

पृथिवीदेवत्या गायत्री । ऋषिर्मेधातिथिः । हे पृथिवि, नः अस्माकम् । स्योना । स्योनमिति सुखनाम [निघ० ३।६; निरु० ८।६] सुखरूपा भव । अनृक्षरा ऋक्षरः कण्टकः न विद्यते ऋक्षरः कण्टको यस्यां सा अनृक्षरा अकण्टका निष्कण्टका । अनृक्षराग्रहणं चौर्यदायादादिनिवृत्त्यर्थम्, तेषामसुखकरत्वात् । निवेशनी नितरां वेशनी, [प्र ?]वेशनं प्रतिष्ठा अस्यास्तीति निवेशनी । सप्रथाः प्रथसा पृथुभावेन सह वर्तत इति सप्रथाः सर्वतो बहुरूपा । शर्म । अस्माकं नः । शरणं गृहम्, "शरणं गृहरक्षित्रोः" [अमर० ३।३।५३] इत्यभिधानात् । यच्छ प्रयच्छ ॥ ५४ ॥

[2]अप नः शोशुचदघम् ॥ ५५ ॥

शोशुचदघम् । व्यत्ययः । नः अस्माकम् । अघं पापजातम् । अपेति परीत्यर्थे । परिशोशुचत् परिशोधय ॥ ५५ ॥

[3]आहुतिं जुहोति [का० श्रौ० २५।७।४०]—

[4]अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः ।
असौ स्वर्गाय लोकाय स्वाहा ॥ ५६ ॥

आग्नेय्यनिरुक्ता गायत्री, यजुरन्ता । ऋषिरादित्यः । अस्मात्त्वमधिजातोऽसि । हे भगवन्नग्ने, अस्मात् यजमानात् । [अधिः] अधिकारार्थः । आधानकाले इमं यजमानमधिकृत्य जातोऽसि । ततस्त्वां ब्रवीमि । त्वदयं जायतां पुनः । अयं यजमानः । त्वत् त्वत्तः । पुनर्जायतां

---

१ (मा० ३५।२१) । २ काण्वमाध्यन्दिनसंहितयोः पूर्वमन्त्रस्यैवायमन्तिमोऽशः, अत्रानन्दबोधेन तु पृथग् व्याख्यातः । ३ 'जुहोति' इत्येव–क-ग० । ४ (मा० ३५।२२) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशिष्टकुले समुत्पद्यताम् । असाविति यजमानस्य विशेषनामवचनम् । तद्यथा—एतन्नामायं देवदत्तः । स्वर्गाय लोकाय स्वर्गलोकप्राप्त्यर्थम् । त्वत्तो ह्ययं जातः पुनस्त्वद्वश्यः स्यादित्यभिप्रायः । स्वाहा सुहुतमस्तु ॥ ५६ ॥

[1]अप॑ नः॒ शोशु॑चद॒घम् ॥ ५७ ॥

[2]अयं मन्त्रो व्याख्यातः [३५।५५] ॥ ५७ ॥

अथ पुरुषसूक्तस्नपनं व्याख्यास्यामः । प्रतिष्ठान्ते मासान्ते पुण्यकाले देवाभिमुखे गोमयेनोपलिप्य, पञ्चवर्णैरलंकृत्य तन्दुलैर्व्रीहिभिर्वा, पञ्चविंशतिपदं पञ्चभागीकृत्य, क्षेत्रे विभज्य, [3]स्वलंकृताभ्यो वा कुम्भकलशान् विन्यस्य, यवाक्ष[त?तं] म[ङ्ग?ङ्ग]ल्यान्तरं वा तन्तुना परिवेष्ट्य, अद्भिः प्रक्षाल्य पूरयित्वा [4]च, वस्त्रमावेष्ट्य, [5]सुवर्णं) निक्षिप्य, प्रणवेन त्वर्चां निधाय, [6]प्रागाद्यष्टपदेषु पुष्पोदकक्षीरोदकगन्धोदकाक्षतोदकफलोदककुशोदकरत्नोदकजप्योदकानि स्थापयित्वा, इन्द्रादिप्रादक्षिण्येन षोडशपदेषु शुद्धोदकानि विन्यस्य, एकैकं प्रधानं द्वौ द्वावुपस्थानानि कल्पयेत् । मध्ये श्रियमावाह्य, अर्चयित्वा, [7]ततः पूर्वां दिशमारभ्य शङ्खचक्रगदापद्मानि क्रमेणार्चयित्वा, 'सहस्रशीर्षा' [३५।१] इत्यादिषोडश ऋग्भिः स्नापयित्वा, [8]ततो वैष्णवैः 'अतो देवाः' [ऋग्वे० १।२२।१६] आदिमन्त्रैः सप्तभिः[?]स्नापयित्वा, 'विष्णोर्नुकम्' [५।२४] इति स्नपनं करोति । [9]'सहस्रशीर्षं देवम्' [महाना० ११।१] इति कुम्भतोयेन स्नापयित्वा सर्वोपचारैरर्चयेत् । कुम्भकलशमध्ये हारिद्रचूर्णेन सर्वसंपत्करमिति विज्ञायते ॥

इति [10]शुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

---

१ काण्वसंहितायां पूर्वमन्त्रस्यैवायमन्तिमोऽशः । माध्यन्दिनसंहितायां तु नैवास्ति ।
२ 'व्याख्यातम्' इत्येव—ग० । ३ सुवासिनीभ्यः कुमारीभ्यो वेति शेषः । ४ 'च' नास्ति—ग० ।
५ १२९ तमपृष्ठस्थकोष्ठकादारभ्यात्रत्यकोष्ठकसमाप्तिपर्यन्तो भाष्यभागः खपुस्तके नास्ति, तत्र ९६—१०१ मितानां षट् पत्राणां त्रुटितत्वात् । ६ प्राणादि—ख० । ७ 'ततः पूर्वां...पद्मानि' नास्ति—ख० । ८ 'ततः' नास्ति—ख० । ९ सहस्रशीर्षं पुरुषं देवम्—क-ख-ग० ।
१० काण्ववेदमन्त्रभाष्यसंग्रहे—ख०, श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ग० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षट्त्रिंशोऽध्यायः

[1]ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये।
वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

ऋचं वाचमिति पञ्चाध्यायान् दध्यङ्ङाथर्वणो ददर्श, अग्निकाश्वमेधिकवर्जम्। अतस्तेषां दध्यङ्ङाथर्वण ऋषिः। अग्निका 'उग्रश्च भीमश्च' [३९।६] इत्येवमादयः। 'अग्निꣳ हृदयेन' [३९।७] इत्याश्वमेधिकाः। तेषामग्निकानामाश्वमेधिकानां च ऋषिः प्रजापतिः। [2]तत्राद्योऽध्यायः शान्त्यर्थः। तत्राद्यो [3]वैश्वदेवः। तत्राद्यानि यजूंषि [4]लिङ्गोक्तदेवत्यानि। ऋचं वाचं प्रपद्ये। प्रसिद्धां वाचम्। ऋचम् ऋग्वेदम्। प्रपद्ये जानामि, शरणं प्रपद्य [5]इति वा। [वाचि ऋग्-] दृष्टिः कार्या। यन्मनस्तद्यजुः प्रपद्ये, मनसि यजुर्दृष्टिः कार्या। साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये वागोजः सहौजः। [6]सह ओजः। एतानि बलरूपाणि [7]मयि तिष्ठन्तु। प्राणापानौ। तौ च मे तिष्ठताम् ॥ १ ॥

[8]यन्मे च्छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

बृहस्पतिदेवत्या पङ्क्तिः। यन्मे मम चक्षुषः यच्छिद्रम्, 'छिदिर् अवखण्डने [द्वैधीकरणे]' [१४४१ रुधादिः]। हृदयस्य। हृदयशब्देन बुद्धिरुपलक्ष्यते, बुद्धेर्यच्छिद्रमवखण्डनम् [9]अपूर्णता-जातम्। [10]मनसो वाऽतितृण्णम्। मनः सुखादिरूपम्, [11]तस्य अतिविहिंसितं प्रवर्ग्यकरणेन। तत्सर्वं मे चक्षुरादेः प्राप्तं दोषं स बृहस्पतिर्दधातु। छिद्रादिदोषं परिहृत्य पूर्वसंस्थं [12]करोतु।

---

1 (मा० ३६।१)। अध्यायारम्भे–'श्रीकृष्णाय नमः॥ हरिः ॐ' इति–ख०, 'हरिः ॐ' इति–ग०। 2 'तत्राद्योऽध्यायः शान्त्यर्थः' नास्ति–ख०। 3 विश्वेदेवाः–क ख०।
4 'लिङ्गोक्तदेवत्यानि' नास्ति–ख०। 5 इति च वाग्दृष्टिः कार्या–ख०।
6 'सह ओजः' नास्ति–ख०। 7 'मयि तिष्ठन्तु' नास्ति–ख०। 8 (मा० ३६।२)।
9 अपूर्वता–ख०। 10 'मनसो वाऽतितृण्णम्' नास्ति–ख०।
11 'तस्य अतिविहिंसितम्' नास्ति–ख०। 12 'करोतु' नास्ति–ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शं नो भवतु भुवनस्य यस्पतिः। भुवनस्य भूतजातस्य। यः पतिः [1]अधिपतिः प्रवर्ग्यरूपो यज्ञः स [बृहस्पतिर्दधात्विति। बृहस्पतिरित्यनुषङ्गः?]। नः[2] अस्माकम्। शं भवतु [3]सुखं भवतु ॥ २॥

[4]भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात् ॥ ३ ॥

[5]कया नश्चित्र आभुवदूती सदावृधः सखा।
कया शचिष्ठया वृता ॥ ४ ॥

[6]कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः।
दृळ्हा चिदारुजे वसु ॥ ५ ॥

[7]अभी षु णः सखीनामविता जरितॄणाम्।
शतं भवास्यूतिभिः ॥ ६ ॥

[8]एते मन्त्रा व्याख्याताः [३।४३; २६।४४–४६]। अत्र–'शतं भवास्यूतिभिः' इति पाठः। ऊतिभिः [9]अवनैः ॥ ३–६ ॥

[10]कया त्वं न ऊत्याभि प्रमन्दसे वृषन्।
कया स्तोतृभ्य आभर ॥ ७ ॥

इन्द्रदेवत्याऽनिरुक्ता गायत्री। [11]हे वृषन्, सेचक हे इन्द्र। कया ऊत्या केन [12]अवनेन। [13]नः अस्मान्। त्वम् अभिप्रमन्दसे अभिमोदयसि। किं च, केन अवनेन [14]रक्षणेन निमित्तेन। स्तोतृभ्यः तव स्तोतृभ्यः प्रदानाय। आभर [15]आहरसि। [16]अर्थमिति शेषः ॥ ७ ॥

---

१ 'अधिपतिः' नास्ति–ख०। २ "नः बृहस्पत्येवमिष्टानामस्माकम्" इति–ग० टि०।
३ 'सुखं भवतु' नास्ति–ख०। ४ (मा० ३६।३)। ५ (मा० ३६।४)।
६ (मा० ३६।५)। ७ (मा० ३६।६)। ८ 'भूर्भुवः स्वरिति, कया नः, कस्त्वा, अभी षु ण इति च मन्त्रा व्याख्याताः–ख-ग०। ९ सवनैः–ख०। १० (मा० ३६।७)।
११ हे वषट्कार हे इन्द्र–ख०। १२ सवनेन–ख०। १३ 'नः अस्मान्' नास्ति–ख०।
१४ रक्षणनिमित्तेन–ख०। १५ 'आहरसि' नास्ति–ख०। १६ 'अर्थम्' नास्ति–क-ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]इन्द्रो विश्वस्य राजति।

शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥

ऐन्द्री[2] [त्रि१द्वि]पदा विराट्। विश्वस्य सर्वस्य जगतः। इन्द्रः सर्वाधिपतिः। राजति देदीप्यते ईष्टे वा। तस्य प्रसादात्, शं नो अस्तु। नः अस्माकं सुखमस्तु। किं च, द्विपदे मनुषेभ्यः। शं सुखमस्तु। व्यत्ययो वा। द्विपदां चतुष्पदां च शमिति। चतुष्पदे पश्वादिभ्यः। शं सुखमस्तु ॥ ८ ॥

[3]शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।

शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥

'शं नो मित्रः' इति, 'शं नो वातः' इति च द्वे अनुष्टुभौ शान्त्याशीर्देवत्यौ। [4]महावीरस्य प्रसादात्। शं नो मित्रः। मित्रो नाम सूर्यः। नः अस्माकम्। शं सुखम्। [5]भवतु अस्तु, सुखरूपोऽस्तु। शं वरुणः। शं सुखरूपोऽस्तु। अर्यमा च नः अस्माकं सुखरूपोऽस्तु। [6]नः अस्माकम्। इन्द्रः सुखरूपोऽस्तु। बृहस्पतिः नः [7]अस्माकं सुखरूपोऽस्तु। नः विष्णुरुरुक्रमः। उरु विस्तीर्णः क्रमः क्रमणं यस्य स उरुक्रमः विष्णुः। शं सुखरूपोऽस्तु ॥ ९ ॥

[8]शं नो वातः पवताᳬं शं नस्तपतु सूर्यः।

शं नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु ॥ १० ॥

[9]वातः वायुः। शं सुखरूपोऽस्तु, अव्याधिजनकः सन् नः अस्माकं पवतां गच्छतां [10]वहताम्। शं नः अस्माकं सूर्यः शं सुखरूपस्तपतु। शं नः अस्माकं कनिक्रदद् देवः कर्म कुर्वाणः वृष्ट्याख्यं कर्म कुर्वाणः कनिक्रदद्देवः [11]करकाशनिरहितं [12]कं गाङ्गमुदकं वा। देवः पर्यन्यः। अभि अभितः सर्वतः। वर्षतु वृष्टिं करोतु ॥ १० ॥

---

१ (मा० ३६।८)। २ द्रष्टव्या–सर्वा०। ३ (मा० ३६।९)। ४ महः इन्द्रस्य–ख०।
५ 'भवतु' नास्ति–ख०। ६ 'नः अस्माकम्। इन्द्रः सुखरूपोऽस्तु' नास्ति–ख०।
७ 'अस्माकम्' नास्ति–ख०। ८ (मा० ३६।१०)।
९ 'शान्त्याशीर्देवत्या त्रिष्टुप्' इत्यधिकम्–ख०। १० वाहयतु–ख०, वीजयतु–क-ग०।
११ नरहितम्–ख०। १२ कम् उदकं वा–ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१]अहानि शं भवन्तु नः

शशूं रात्रिः प्रतिधीयताम् ॥ ११ ॥

द्विपदा गायत्री, शान्त्याशीर्देवत्या । अहानि दिवसाः । नः अस्माकम् । शं सुखरूपाणि भवन्तु । नः शं रात्रिः प्रतिधीयताम् । नः अस्माकम् । रात्रिः प्रतिधीयतां सुखस्य पोषयित्री स्यात् ॥ ११ ॥

[२]शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।

शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥ १२ ॥

शान्त्याशीर्देवत्या [३]त्रिष्टुप् । इन्द्रश्च अग्निश्च इन्द्राग्नी । नः अस्माकम् । अवोभिः रक्षणैः । शं सुखरूपौ भवताम् । [४]शं न इन्द्रावरुणा रातहव्या । 'रा दाने' [१०५७ अदादिः] रातं दत्तं हव्यं ययोस्तौ रातहव्यौ, इन्द्रावरुणौ रातहव्यौ गृहीतहव्यौ । शं सुखरूपौ भवताम् । इन्द्रापूषणा वाजसातौ अन्नभजननिमित्ते । शं नः सुखरूपौ भवताम् । इन्द्रासोमा सुविताय साधुप्रसवाय । [५]योः पृथग्भावे । पृथक्करणहेतोः, रोगाणां पृथक्करणाय । इन्द्रासोमौ शं सुखरूपौ भवताम् ॥ १२ ॥

[६]शं नो देवीरभिष्टय आपो भवन्तु पीतये ।

शं योरभिस्रवन्तु नः ॥ १३ ॥

शान्त्याशीर्देवत्या गायत्री । नः अस्माकम् । देवीः [७]हे देव्यः आपः । [८]अभिष्टये अभिषेकाय अभीष्टाय वा । शं सुखरूपा भवन्तु । पीतये पानाय [९]च । शं सुखरूपा भवन्तु । शं योरभिस्रवन्तु नः । योः रोगाणां पृथक्करणहेतोः । शं सुखरूपाः सत्य आपः । नः अस्मान् । अभिस्रवन्तु ॥ १३ ॥

[१०]स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ॥ १४ ॥

---

१ काण्वमाध्यन्दिनसंहितयोरुत्तरमन्त्रस्यैवायमादिमो भागः, आनन्दबोधेन तु पृथग् व्याख्यातः । २ (मा० ३६।११)। ३ 'त्रिष्टुप्' नास्ति–ख०। ४ 'शं न इन्द्रावरुणा .... इन्द्रासोमा' नास्ति–ख०। ५ यासुद्–क-ग०, सुद्–ख० । ६ (मा० ३६।१२) । ७ हे आपः देव्यः–क०, 'देव्यः' इत्येव–ख०। ८ अभिष्टये अभीषवे–ख० । ९ वा–क-ख० । १० (मा० ३६।१३) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे ॥ १५ ॥
[2]यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः ॥ १६ ॥
[3]तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः ॥ १७ ॥

[4]चत्वारो मन्त्रा व्याख्याताः [३५।५४; १२।५१-५३] ॥ १४-१७ ॥

[5]द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिः शान्तिरेव शान्तिः ॥ १८ ॥

शान्त्याशीर्देवत्या [6]बृहती । द्यौः द्युलोकरूपा या शान्तिः सा भवतु । [7]अन्तरिक्षमिति । अन्तरिक्षरूपा या शान्तिः सा भवतु । यद्वा, नः अस्माकम् । द्यौरेव शान्तिः शान्तिरूपा भवतु । अन्तरिक्षं च शान्तिः अन्तरिक्षरूपा शान्तिर्भवतु । पृथिवी च शान्तिः शान्तिरूपा नो भवतु । [8]आपः ओषधयः वनस्पतयः । एताः शान्तिरूपाः नो भवन्तु । शान्तिरेव शान्तिः [9]या तु शान्तिस्वरूपिणी देवता सा शान्तिः । सदास्माकं शान्तिरूपा भवतु ॥ १८ ॥

[10]धृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे ॥ १९ ॥

---

१ (मा० ३६।१४)। २ (मा० ३६।१५)। ३ (मा० ३६।१६)।
४ स्योना पृथिवीति, आपो हि, यो वः, तस्मा अरमिति चत्वारो मन्त्रा व्याख्याताः-ख-ग०।
५ (मा० ३६।१७)। ६ यजूंषि-सर्वा०। ७ 'अन्तरिक्षमिति' नास्ति-क०।
८ 'आपः···· शान्तिरूपा भवतु' नास्ति-ख०। ९ 'या तु' नास्ति-क०।
१० (मा० ३६।१८) । 'दृते' इति संहितास्थः पाठः, स एव चोवटमहीधराभ्यां व्याख्यातः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मित्रदेवत्या [1]जगती। धृते दृंह मा। धृते मे शरीरे जीविते सति, जरया च जीर्णे सति। दृंहेत्यस्य सामर्थ्यादयमर्थः। हे मित्र, मा मां दृंह मच्छरीरं दृढीकुरु। मित्रस्य मा चक्षुषा। इन्द्रियाभिप्रायेणैकवचनम्। सर्वाणि भूतानि मित्रस्य चक्षुषा। मा माम्। समीक्षन्तां पश्यन्तु। अहमपि मित्रस्य चक्षुषा श्रीभगवतो दृष्ट्या। सर्वाणि भूतानि समीक्षे सम्यक्पश्यामि। मित्रस्य चक्षुषा समीक्षामहे संपश्यामः। आदरार्थमिदं पुनर्वचनम्। अत्रायमभिप्रायः—नहि मित्रः कञ्चन हिनस्ति, नहि मित्रं कश्चिदपि हिनस्ति। मित्रो मित्रस्य हितं पश्यति परम्। एवं सर्वेषु मम मैत्री स्यात्। एवं च द्वेषादयो दोषा मयि न भवन्ति। ततः श्रीभगवदाराधने ममोत्तमाधिकारसिद्धिर्भविष्यतीति ॥ १९ ॥

[2]धृते दृꣳह मा। ज्योक्ते संदृशि जीव्यासं
ज्योक्ते संदृशि जीव्यासम् ॥ २० ॥

[3]गायत्री। यजमानाशीः। धृते मयि जीवति [4]सति शरीरे च जरया जीर्णे सति। हे मित्र, मा मां [5]मच्छरीरम्। दृंह दृढीकुरु। ज्योक्ते संदृशि जीव्यासम्। ज्योगिति चिरन्तनवचनः। ते तव। संदृशि तव [6]संदर्शनरूपे [7]कारुण्यावलोकने सति। ज्योग् अतिबहुकालम्। जीव्यासं जीवेयम्। ज्योक्ते संदृशि जीव्यासम्। आदरार्थमिदं पुनर्वचनम् ॥ २० ॥

[8]नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥२१॥

[9]पूर्वं व्याख्यातः [१८।१२] ॥ २१ ॥

[10]नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २२ ॥

---

१ यजूंषि—सर्वा०। २ (मा० ३६।१९)। 'दृते' इति संहितास्थः पाठः, उवटमहीधरयोश्च। ३ यजूंषि—सर्वा०। ४ 'सति' नास्ति—क-ग०। ५ अस्मच्छरीरम्—क-ग०। ६ 'संदर्शनरूपे' नास्ति—ख०। ७ कारुण्यावलोके—क-ग०। ८ (मा० ३६।२०)। ९ व्याख्यातो मन्त्रः—ख-ग०। १० (मा० ३६।२१)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]बहुदेवत्याऽनुष्टुप् । नमस्ते अस्तु विद्युते । विद्युते [2]विद्युद्रूपाय ते तुभ्यं नमोऽस्तु । नमस्ते स्तनयित्नवे मेघरूपाय ते तुभ्यं नमोऽस्तु । [3]नमस्ते भगवन्नस्तु । हे भगवन् षड्गुणैश्वर्य-निलय, ते तुभ्यं नमोऽस्तु । यतः स्वः । स्वरित्यादित्यनाम [निरु० २।१४; ५।४]। हे श्रीभगवन्नादित्य, यतः यत्र । समीहसे चेष्टसे । तत्र स्वर्गस्थाय तुभ्यं नमोऽस्तु ॥ २२ ॥

[4]यतो यतः समीहसे ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ २३ ॥

आशीर्देवत्या [5]निचृद् गायत्री । यतो यतः समीहसे । यत यस्मान्निमित्ताद् ईहसे तत-स्ततो निमित्तात् । नः अस्माकम् । अभयं कुरु । शं नः कुरु प्रजाभ्यः । नः अस्माकं प्रजाभ्यः अभयं कुरु । नः अस्माकं पशुभ्यश्च अभयं कुरु ॥ २३ ॥

[6]सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २४ ॥

व्याख्यातोऽयं[7] मन्त्रः [६।३१] ॥ २४ ॥

[8]तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥२५॥

सावित्री[9] पङ्क्तिः । तच्चक्षुः आदित्यात्मकं चक्षुः । देवहितं देवेन श्रीभगवता निहितं प्रतिष्ठितम् । पुरस्तात् प्राच्यां दिशि । देवेभ्योऽर्थाय वा हितं देवहितम् । पुरस्तात् प्राच्यां दिशि । शुक्रं शुद्धं पाप्मभिरसंस्पृष्टम् । [यद् ? उच्चरत्] उदेति । पश्येम सर्वाणि पुरुषार्थ-साधनानि पश्येम । शरदः शतं प्रतिबहुकालम् । जीवेम । शरदः शतं [10]शतसंवत्सरपरिमित-कालम् । शृणुयाम श्रीभगवन्माहात्म्यप्रवादिनीं श्रुतिं शरदः शतं साकल्येन शृणुयाम ॥ २५ ॥

इति [11]श्रीशुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

---

१ वायुदेवत्या–ख० । २ तडिद्रूपाय–ख० । ३ 'नमस्ते भगवन्नस्तु' नास्ति–ख० ।
४ (मा० ३६।२२) । ५ त्रिवृद् गायत्री–ख०, अनुष्टुप्–सर्वा० ।
६ (मा० ३६।२३) । ७ 'अयम्' नास्ति–ख-ग० ।
८ (मा० ३६।२४) ९ सौरी–सर्वा० । १० 'शत····कालम्' नास्ति–ख० ।
११ काण्ववेदमन्त्रभाष्यसंग्रहे–ख०, श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे–ग० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सप्तत्रिंशोऽध्यायः

अथ–दीक्षासु महावीरान् संभरति। अन्तःपात्यदेशे संभारान्निदधाति। मृदं वल्मीकवपां वराहविहतं पूतीकानजापयो गवेधुकाः कृष्णाजिनमभ्रिं चोत्तरतः [का० श्रौ० २६।१।१–३] इति। अभ्रिमादत्ते—

[1]देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आददे नारिरसि॥ १॥

अभ्रिदेवत्यं यजुः। नारी नरस्य संबन्धिनी नारी त्वं नार्यसीति[2]॥ १॥

[3]अभ्रिमादायौदुम्बरीं वैकङ्कतीं [4]वाऽरत्निमात्रीं सव्ये कृत्वा दक्षिणेनालभ्य जपति [का० श्रौ० २६।१।४]—

[5]युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥ २॥

व्याख्यातोऽयं[6] मन्त्रः [५।१४]॥ २॥

अथ मृत्पिण्डं परिगृह्णाति [शत० ब्रा० १४।१।२।६]—

[7]देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे॥ ३॥

मृत्पिण्डमादाय पञ्च संभारा महावीरकरणार्थाः। महावीरस्तु प्रवर्ग्यसंतापनार्थः कृतो मृद्भिर्घुटिकाकारः पात्रविशेषः। द्यावापृथिवीदेवत्या [8]जगती। अस्य कृत्स्नस्याध्यायस्य दध्यङ्ङाथर्वण ऋषिः। हे देवी देव्यौ हे द्यावापृथिव्यौ। मखस्य यज्ञस्य। वां युवां द्वे आदाय, मृदं चोदकं चादायेत्यर्थः। अद्य अस्मिन्नहनि। शिरः उत्तमाङ्गम्। राध्यासम् 'राध साध संसिद्धौ'

---

१ (मा० ३७।१)। २ 'इति' नास्ति–क०। ३ 'अभ्रिमादायौदुम्बरीम्' नास्ति–ख०। ४ 'वा प्रादेशमात्रे तामभ्रिं सव्येन पाणौ कृत्वा' इति–क-ख-ग०। ५ (मा० ३७।२)। ६ 'अयम्' नास्ति–ख-ग०। ७ (मा० ३७।३)। ८ ब्राह्मी गायत्री–सर्वा० टी०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१२६३-६४ स्वादिः] साधये। कुत्रेति ? देवयजने पृथिव्याः। [1]देवा इज्यन्ते यस्मिन् तद् देवयजनं तस्मिन् देवयजने पृथिव्याः संबन्धिनि देवयजने पृथिव्या देवक्षेत्रस्थाने। मखाय त्वा यज्ञाय त्वां मृत्पिण्ड त्वां परिगृह्णामि। ततोऽपि विशेषा-[काङ्क्षा ?]पेक्षायामाह—मखस्य त्वा शीर्ष्णे। मखस्य [2]यज्ञस्य। शीर्ष्णे विशिष्टशिरसः सिध्यर्थम्। त्वा त्वां द्यावापृथिव्यामेव मृत्पिण्ड त्वां परिगृह्णामि ॥ ३ ॥

[3]अथ वल्मीकवपां कृष्णाजिन उत्तरतो निदधाति—

[4]देव्यो वम्रियो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ४ ॥

वल्मीकवपादेवत्या पङ्क्तिः। वम्रियः। [5]उपदीका शमीका इति पर्यायः। वल्मीक-[वा?का]रिण्यः। यूयं भूतस्य प्रथमजा वम्रियः। [पृथिवी भूतानां प्रथमजा], तत्संबन्धात् ता अपि मृदः प्रथमजा उच्यन्ते। मखस्य वोऽद्य शिरः। वः युष्मान् मृदः आदाय। अद्य मखस्य यज्ञस्य शिरः। राध्यासं [6]साधये। 'देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे' इति व्याख्यातः [३७।३] ॥ ४ ॥

[7]अथ वराहविहतं निदधाति—

[8]इयत्यग्र आसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥

वराहविहतदेवत्याऽनुष्टुप्[9]। "इयती ह वा इयमग्रे पृथिव्यास प्रादेशमात्री तामेमूष इति वराह उज्जघान" [शत० ब्रा० १४।१।२।११] इति याभिहिता [या?] पृथि[वीं ? वी] सा। इयती इयत्परिमाणपरिमिता प्रादेशमात्रीत्यभिनयेन प्रदर्शयति। अग्रे पूर्वम्। क्षोणीमुद्धर्तुमिच्छतो वराहस्य दंष्ट्राग्रेणेयती उद्धृता आसीत्। [10]व्यत्ययः। आसीरिति। त्वा त्वां ब्रवीमि। मखस्य

---

१ 'देवा इज्यन्ते''''मखस्य त्वा शीर्ष्णे। मखस्य' नास्ति—ख०। २ देवयज्ञस्य—ख०।
३ द्रष्टव्यम्—का० श्रौ० [२६।१।६-७]। ४ (मा० ३७।४)। ५ उपादीका—क-ग०, उपजिह्वकाः सीमका इति पर्यायाः—उवटः। ६ संसाधये—क-ग०। ७ द्रष्टव्यम्—का० श्रौ० [२६।१।८]।
८ (मा० ३७।५)। ९ ब्राह्मी गायत्री—सर्वा० टी०। १० 'व्यत्ययः' नास्ति—ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेऽद्य शिरो राध्यासमिति[१] । ते[२] त्वामादय । अद्य मखस्य शिरः राध्यासं [३]साधये । 'देवयजने' इति व्याख्यातः [३७।३]॥ ५ ॥

[४]पूतीकानादत्ते [का० श्रौ० २६।१।६]—

[५]इन्द्रस्यौज स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ६ ॥

पूतीकदेवत्याऽनुष्टुप्[६] । ये पूतीकानाम यूयम् । इन्द्रस्य परमैश्वर्ययुक्तस्य श्रीभगवत इन्द्रस्य । ओजः बलं स्थ बलं भवथ । अतस्तान् वः युष्मान् ब्रवीमि—मखस्य वोऽद्य शिरो राध्यासमिति[७] । वः अद्य युष्मान् उपादाय । मखस्य यज्ञस्य । शिरः राध्यासम् उत्तमाङ्गं साधये । 'देवयजने' इति व्याख्यातः [३७।३] ॥ ६ ॥

अजाक्षीरं तूष्णीमानयति । [८]संभृतान् गवेधुकान् तूष्णीमभिमृशति । कृष्णाजिनं परिगृह्योत्तरतः परिवृतं गच्छति [का० श्रौ० २६।१।१०-१३]—

[९]प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ७ ॥

[१०]लिङ्गोक्तदेवत्याऽनुष्टुप् । प्रैतु ब्रह्मणस्पतिः । प्रैतु [११]गच्छतु । प्रदेवी सूनृता [१२]शक्त्यात्मिका देवी प्रैतु । अच्छावीरं नर्यं नरेभ्यो हितं कारणं नर्यम् । पङ्क्तिराधसं पङ्क्तिछन्दसा साध्यम् । वीरं कृष्णाजिनम् । अच्छ आसुमेतु । देवा यज्ञं नयन्तु । नः अस्माकम् । यज्ञं नयन्तु । कृष्णाजिनं [१३]यज्ञं प्रापयन्तु । अत्र मखाय त्वेति त्रिः पठ्यते । [१४]एकदा संभारान्

---

१ 'इति' नास्ति—क० । २ 'ते' नास्ति—ग० । ३ संसाधये—क ग० । ४ आदारानादत्ते—ख० ।
५ (मा० ३७।६) । ६ ऋचां त्रिष्टुप् । मखाय त्वेति यजुः पङ्क्तिः—सर्वा० टी० ।
७ 'इति' नास्ति—क० । ८ संवृतान्—क-ख-ग० । ९ (मा० ३७।७) ।
१० घर्मदेवत्यानि यजूंषि—सर्वा०, अत्र 'प्रैतु' इति बृहती—सर्वा० टी० ।
११ प्रगच्छतु—ख० । १२ शच्यात्मिका—ख० । १३ 'यज्ञम्' नास्ति—क० ।
१४ अत्र द्रष्टव्यानि—का० श्रौ० [२६।१।१४-१६] ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मखाय त्वेति संभारैः संसृजति । एकदा मखाय त्वेति मृदमादत्ते । एकदा [1]मखाय त्वेति मृदमादाय महावीरं [2]करोति । 'मखाय त्वा' इत्युक्तम्[3] [३७।३] ॥ ७ ॥

प्रादेशमात्रमूर्ध्वमासेचनवन्तं [मेखलावन्तं] मध्यसंगृहीतमूर्ध्वे मेखलायास्त्र्यङ्गुलं निष्ठितमभिमृशति [का० श्रौ० २६।१।१७–१८]—

[4]मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ८ ॥

लिङ्गोक्तदेवत्यानि यजूंषि । मखस्य शिरोऽसि । [हे] निष्ठित, त्वं मखस्य [5]यज्ञस्य शिरोऽसि । एवं द्वितीयम्, एवं तृतीयमिति । मखाय त्वेति त्रिभिः पर्यायमन्त्रैस्त्रीन्महावीरान् गवेधुकाभिः [6]श्लक्ष्णयति प्रतिमन्त्रम् ॥ ८ ॥

[7]मुखवृष्णिं धूपयति—

[8]अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ९ ॥

---

१ 'मखाय त्वेति' नास्ति–क० । २ 'महावीरं करोति' इत्यस्याग्रे 'इति त्रयाणां विनियोगः । तथा चाधारे सादयति' इत्यधिकम्–ख-ग० । ३ अत्र खपुस्तके–'उक्तम्' इत्यस्याग्रे–'अथ प्रयौति मखाय त्वेति । अथ मृत्पिण्डमादाय महावीरं करोति । मखाय त्वेत्युक्तम् ॥ छ ॥ ऊर्ध्वं मेखलायां त्रियंगुलं नेपितमभिमृशति–मखस्य शिरोऽसीति' इति पाठः । ४ (मा० ३७।८) ५ 'यज्ञस्य' नास्ति–ख० । ६ द्रष्टव्यम्–का० श्रौ० [२६।१।२३] । श्लक्ष्णं प्रणयति–ख० । ७ 'मुखवृष्णिं धूपयति' नास्ति–क-ग० । अश्वशकृता धूपयति–का० श्रौ० [२६।१।२४] । ८ (मा० ३७।९) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिङ्गोक्तदेवत्यानि यजूंषि । हे महावीर, अश्वस्य वृष्णः सेचनधर्मवतः । सेचनसंबन्धिनं महावीरं त्वा [1]त्वां धूपयामि । केनेति ? [सत्या ?]शक्रा [शक्नुता] धूपयामि । पृथिव्याः संबन्धि-[नि] देवयज[न ? ने] स्थितं धूपयामीति[2] । मखाय त्वा मखस्य त्वा शीर्ष्णे इति । धूपयामि 'धूप संतापे' [३९६ भ्वादिः] संतापयामि । एवं द्वितीयतृतीयौ [3]धूपयामि मखाय त्वेति [4]त्रिभिर्मन्त्रैः ॥ ९ ॥

[5]त्रीन् महावीरान् पक्वानुद्धरति—

[6]ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १० ॥

लिङ्गोक्तदेवत्या [7]गायत्री "असौ वै लोक ऋजुः सत्यꣳ ह्यृजुः सत्यमेष य एष तपति" [शत० ब्रा० १४।१।२।२२] इति । ऋजवे अकुटिलाय स्वर्गलोकाय सत्याय आदित्याय । एष त्वा त्वाम् । उद्धपामि । एष एव प्रथमः प्रवर्ग्यः । साधवे वायवे पय उद्धपामि । एष द्वितीयः प्रवर्ग्यः, "अयं वै साधुः" [श० ब्रा० १४।१।२।२३] इत्यादिश्रुतेः । सुक्षित्यै अस्मै लोकाय । त्वां पय उद्धपामि, "सुक्षित्यै वेत्ययं वै लोकः सुक्षितिरस्मिन् हि लोके सर्वाणि भूतानि क्षियन्ति" [श० ब्रा० १४।१।२।२४] इति श्रुतेः । एष एव तृतीयः प्रवर्ग्यः । मखाय त्वेति [8]प्रतिमन्त्रम् ॥ १० ॥

इति महावीरकरणम् ॥

महावीरं प्रोक्षति [का० श्रौ० २६।२।२६]—

[9]यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु ।
पृथिव्याः सꣳस्पृशस्पाहि । अर्चिरसि शोचिरसि तपोऽसि ॥ ११ ॥

नानादेवत्या [10]त्रिष्टुप् । [11]यमाय त्वा महावीरं त्वां प्रोक्षामि । मखाय यज्ञाय त्वां प्रोक्षामि । [12]सूर्यस्य त्वा सूर्याय त्वां प्रोक्षामि । तपसे अर्थाय त्वां प्रोक्षामि । देवस्त्वा सविता

---

१ 'त्वाम्' नास्ति–क-ग० । २ 'इति' नास्ति–क० । ३ धूपयति–ख-ग० । ४ द्रष्टव्यम्–का० श्रौ० [२६।१।२६] । ५ द्रष्टव्यम्–का० श्रौ० [२६।१।२७] । ६ (मा० ३७।१०) । ७ दैवी बृहती–सर्वा० टी० । ८ द्रष्टव्यम्–का० श्रौ० [२६।१।२८] । ९ (मा० ३७।११) । १० दैव्यौ बृहत्यौ–सर्वा० टी० । ११ 'यमाय त्वा' नास्ति–क-ग० । १२ 'सूर्यस्य त्वा' नास्ति–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मध्वानक्तु । सविता देवः । मध्वा मधुना । महावीरं त्वाम् । अनक्तु अञ्जयतु । पृथिव्याः संस्पृशस्पाहि । संस्पृशतीति संस्पृक्, संस्पृशः पृथिव्याः संबन्धि[नः]। हे रजत सुवर्ण, त्वं [1]महावीरं पाहि गोपाय । महावीरमाज्यवन्तं[2] निदधाति[3]–अर्चिरसि शोचिरसि तपोऽसीति । दीप्तिपर्यायाः । [4]'ऋच शुच दीप्तौ', 'तप संतापे' [९८५ भ्वादिः] एषां रूपाणि–अर्चिरसि, शोचिरसि, तपोऽसीति ॥ ११ ॥

अथास्यामाशिष आशास्ते [शत० ब्रा० १४।१।३।१८]। वाचयति [5]प्रादेशमध्यधि धारयन्तम् [का० श्रौ० २६।३।५]—

[6]अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः। सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दा आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः। विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्य ओजो मे दा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि ॥ १२ ॥

सप्त पार्थिवानि यजूंषि, यजमानाशीः। हे पृथिवि, पुरस्तात् महावीरस्य पुरस्तात् प्राच्यां दिशि हे पृथिवि, या त्वमनाधृष्टा रक्षोभिरनाधृष्टा धर्षितुमशक्या । अतस्त्वां ब्रवीमि—अग्नेराधिपत्य इति । अग्नेराधिपत्ये सति त्वं तत्र स्थितासि । अतः आयुर्मे मह्यम् । दाः देहि । पुत्रवती दक्षिणतः। महावीरस्य दक्षिणस्यां दिशि । हे पृथिवि, या पुत्रवती भवसि । तां त्वां ब्रवीमि। इन्द्रस्याधिपत्ये इन्द्राधिपत्ये सति। अतस्त्वं मे मह्यं प्रजां देहि । सुषदा पश्चात् । या त्वं महावीरस्य पश्चिमतः पश्चिमस्यां दिशि सुषदा 'सुष संशोभने'[?] । शोभनसदनवती। अतस्त्वां ब्रवीमि । देवस्य सवितुराधिपत्ये सति तत्र स्थिता त्वं चक्षुर्मे दाः चक्षुर्देहीति। आश्रुतिरुत्तरत इति। महावीरस्य उत्तरतः उत्तरस्यां दिशि। आश्रुतिः आश्रयन्त्यस्मिन् [7]यजमाना इत्याश्रुतिः। यज्ञियो ह्यसौ देशः । अतो ब्रवीमि । धातुराधिपत्ये धातुः विधातुः आधिपत्ये सति । तत्रस्था त्वं रायस्पोषं धनस्य पोषम् । मे मह्यं देहि । विधृतिरुपरिष्टात् । हे

---

१ महा···गोपाय नास्ति–ख० ।
२ 'आज्यवन्तम्' नास्ति–ख० ।
३ द्रष्टव्यम्–का० श्रौ० [२६।३।४]।
४ 'रुच दीप्तावभिप्रीतौ च' [७४५ भ्वादिः], 'शुच शोके' [१८३ भ्वादिः] इति–धातु० ।
५ प्रादेशमध्यधि विधाय–क-ख-ग० ।
६ (मा० ३७।१२)।
७ 'यजमाना'···'अतः' नास्ति–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विधृति, या त्वम् उपरिष्टात् महावीरस्य ऊर्ध्वप्रदेशे । यतस्त्वं विधृतिः विधारयित्री । अतस्त्वां ब्रवीमि । बृहस्पतेराधिपत्ये सति तत्रस्था त्वम् । ओजः तेजः । मे मह्यं देहि । विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि । विश्वाभ्यः सर्वाभ्यः । [१]नाष्ट्राभ्यः आर्तिभ्यः । मा माम् । पाहि गोपाय । अथेमामभिमृश्य जपति [शत० ब्रा० १४।१।३।२५]–मनोरश्वासीति । मनोस्त्वं धनस्य भूमिपुत्रस्य मनोः । त्वमश्वा असि । "अश्वा ह वा इयं भूत्वा मनुमुवाह" [श० ब्रा० १४।१।३।२५] इति श्रुतेः । हे पृथिवि, त्वं मनोरश्वासि अश्वा भूत्वा मनुं वहसि । अतो माम[भि?पि] समुद्धरेत्यभिप्रायः ।। १२ ।।

[२]अथ वैकङ्कतैः शकलैस्त्रयोदशभिः परिश्रयति—

[३]स्वाहा मरुद्भिः परिश्रीयस्व दिवः सꣳस्पृशस्पाहि ।
मधु मधु मधु ।। ३ ।।

लिङ्गोक्तदेवत्यं यजुः । हे प्रवर्ग्य, यस्त्वं [४]स्वाहाकारः [५]तं त्वां ब्रवीमि । मरुद्भिः परिश्रीयस्व । कर्मणि यक् । मरुतस्त्वामाश्रयन्त्वित्यर्थः । स्वाहेति होमार्थः । [६]सुवर्णशतमानेनोपरिष्टादुपदधाति–दिवः संस्पृशस्पाहीति । लिङ्गोक्तदेवत्यं यजुः । हे प्रवर्ग्य, त्वं दिवः द्युलोकस्य । संस्पृशः महावीरान् प्रवर्ग्यपात्रविशेषान् । पाहि रक्ष । अथवा दिवः [७]संस्पृशः संस्पर्शकर्तॄन् पाहि । अथ धवित्रैराधूनोति [शत० ब्रा० १४।१।३।३०]–मधु मधु मध्विति । प्राणदेवत्यानि यजूंषि । "प्राणो वै मधु" [शत० ब्रा० १४।१।३।३०], रसरूपसामान्यात् । प्राणस्त्वमङ्गानां [रसनं ? रसः । तं] मध्वात्मकं प्राणं महावीरे स्थापयति ।। १३ ।।

[८]महावीरमुपतिष्ठते—

[९]गर्भो देवानां पिता मतीनां पतिः प्रजानाम् ।
सं देवो देवेन सवित्रा गत सꣳ सूर्येण रोचते ।। १४ ।।

[१०]गर्भदेवत्याऽनुष्टुप्[११] । गर्भो देवानाम् । गर्भयतीति गर्भः, आदित्यात्मना देवानां गर्भ एष प्रवर्ग्यः । पिता मतीनाम् । पाति रक्षतीति पिता, मतीनां पिता प्रवर्ग्यः । प्रजानां पतिश्च ।

---

१ 'नाष्ट्राभ्यः' नास्ति–ख० । २ द्रष्टव्यम्–का० श्रौ० [२६।३।९] । ३ (मा० ३७।१३) ।
४ स्वाहाकारम्–ख० । ५ 'तम्' नास्ति–ख० । ६ द्रष्टव्यम्–का० श्रौ० [२६।३।१०] ।
७ 'संस्पृशः' नास्ति–क-ग० । ८ द्रष्टव्यम्–का० श्रौ० [२६।४।१३] । ९ (मा० ३७।१४) ।
१० घर्मदेवत्या–सर्वा० । ११ गर्भो देवानां पङ्क्तिः–सर्वा० टी० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समित्यस्य गतेत्यनेन संबन्धः। देवः देवयतीति देवः प्रवर्ग्यः। देवेन सवित्रा सूर्येण संगत सूर्येण सह। रोचते दीप्यते ॥ १४ ॥

[1]समग्निरग्निना गत सं दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट।

स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत ॥ १५ ॥

घर्मदेवत्या [2]जगती। अग्निः अग्निवर्णः प्रवर्ग्यः। अग्निना संगत। दैवेन सवित्रा सर्वस्य प्रसवकर्त्रा। सूर्येण सर्वस्य प्रेरकेण सूर्येण सह। अरोचिष्ट दीप्यते। स्वाहा समग्निस्तपसा गत। अग्निः अग्निवर्णः प्रवर्ग्यः। तपसा 'तप संतापे' [९८५ भ्वादिः] तेजसा संगत। संदैव्येन देवसंबन्धिना सवित्रा सूर्येण सह। अरूरुचत रोचते। अत एवंगुणं त्वां स्तुम इति शेषः ॥१५॥

[3]धर्ता दिवो विभाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः।

वाचमस्मे नियच्छ देवायुवम् ॥ १६ ॥

ऊर्ध्वबृहती घर्मदेवत्या। घर्म इत्यादित्यनाम, "आदित्यो वै घर्मः" [शत० ब्रा० १४।२।२।१७] इति श्रुतेः। धर्ता दिवो विभाति। दिवः द्युलोकस्य। धर्ता धारयिता। तपसश्च धर्ता। रश्मिजालस्य धर्ता। पृथिव्यामवस्थितो विभाति। धर्ता देवो देवानाम्। धर्ता धारयिता स्वयं च देवः अमर्त्यः मर्त्यधर्मविरोधी। तपोजाः तपो ब्रह्म तस्माज्जायत इति तपोजाः। देवायुवं देवान् यौति मिश्रयतीति देवायुः वाक्, तां देवायुवं वाचम्। अस्मे अस्मासु। [4]नियच्छ नियच्छतु प्रयच्छतु ॥ १६ ॥

[5]अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।

स सध्रीचीः स विषूचीर्वसान आवरीवर्त्ति भुवनेष्वन्तः ॥ १७ ॥

घर्मदेवत्या त्रिष्टुप्। ऋषिर्दीर्घतमाः। आदित्यात्मना घर्मस्तुतिः। यं गोपामपश्यमिति संबन्धः। गोपां गोप्तारम्। कथंभूतं गोप्तारम्? अनिपद्यमानम् अनिवारणेनापद्यमानम् अविश्राम्यन्तं विश्राममकुर्वाणम्। आ च परा च पथिभिश्चरन्तम्। आ आभिमुख्येन। 'चर गतिभक्षणयोः' [५५६ भ्वादिः] चरन्तं गच्छन्तम्। परा पराङ्मुखतया। पथिभिः देवैर्मार्गैः। मध्याह्नात् प्राग् आभिमुख्येन गच्छन्तम्, मध्याह्नादुपरि पराङ्मुखतया गच्छन्तम्। सर्वदा गच्छन्तम्। गोपा-

१ (मा० ३७।१५)। २ ब्राह्मी अनुष्टुप्-सर्वा० टी०। ३ (मा० ३७।१६)। ४ 'नियच्छ' नास्ति-क०। ५ (मा० ३७।१७)।

२०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

/

मादित्यम् । अपश्यम् अद्राक्षमिति संबन्धः । आदित्यः सध्रीचीः सम्यग्गमनः । विषूचीः विष्वग्गमनः । वसानः 'वस आच्छादने' [१०२३ अदादिः] । स्वरश्मिभिः दिश आच्छादयन् । आवरीवर्ति भुवनेष्वन्तः । भुवनेषु [1]एषु लोकेषु । अन्तः आवरीवर्ति । 'वृतु वर्तने' [७५८ भ्वादिः] [2]अन्तः पुनः पुनरावर्तते । तं गोपामपश्यमिति संबन्धः ॥ १७ ॥

[3]विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते । देवश्रुत्त्वं देव घर्म देवो देवान्पाह्यत्र प्रावीरनु वां देववीतये । मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥ १८ ॥

घर्मदेवत्याऽनुष्टुप्[4] । प्रगाथः । अनुष्टुब्बृहत्यौ यत्र मीलिते स प्रानुष्टुभः प्रगाथः । विश्वासां भुवां पृथिवीनां पते, हे विश्वासां भुवां पते । हे विश्वस्य मनसस्पते, सर्वप्रा[मा?]ण्याश्रितमनसः पते । हे विश्वस्य वचसस्पते, त्रयीलक्षणवेदवचसः पते । [हे सर्वस्य वचसस्पते], लौकिकवाचामधिपते[5] । तं त्वां स्तुम इति शेषः । यतस्त्वं देवश्रुत्[इति शेषः?] । यतस्त्वं देव इति श्रुत् । देवानां श्रावयतीति देवश्रुत् त्वं देव घर्म । हे देव घर्म तेजोरूप । देवस्त्वं देवान्पाहि गोपाय । अत्र प्रावीरनु वां देववीतये । अत्र [सत्रे] अस्मिन्नवसरे वा । [प्रावीरिति] पुरुषव्यत्ययः । प्रावीत् । [हे] अश्विनौ, वां युवाम् । अयं घर्मः । अनुप्रावीत् अनुगच्छतु । कस्मै ? देववीतये देवतर्पणाय । मधुमाध्वीभ्यां [6]मधुमाधूचीभ्याम् । मधु च माध्वी च मधुमाध्व्यौ [7]मधुमाधवीभ्यां मध्वञ्जनाभ्याम् । दध्यङ्ङाथर्वणो मधुविद्यां प्रावोचत् । तां चैतावश्विनौ अनुप्रावीरिति संबन्धः ॥ १८ ॥

[8]हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।
ऊर्ध्वो अध्वरं दिवि देवेषु धेहि ॥ १९ ॥

घर्मदेवत्योष्णिक्[9] । हृदे हृदयार्थं त्वां [स्तुमः] । [सु?]मनसे त्वां स्तुमः । दिवे त्वां स्तुमः । सूर्याय त्वां स्तुमः । इत एव त्वां ब्रूमः—ऊर्ध्वः उत्कृष्टः त्वम् । अध्वरं यज्ञम् । दिवि द्युस्थाने । देवेषु मध्ये । धेहि स्थापय तेषां हविर्भागं यागार्थं स्थापयेति ॥ १९ ॥

---

१ 'एषु' नास्ति—क-ग० । २ यः—क-ग० । ३ (मा० ३७।१८) । ४ विश्वासां भुवामत्यष्टिः—सर्वा० । ५ अध्यधिपते—ख-ग० । ६ 'मधुमाधूचीभ्याम्' नास्ति—ख० । ७ मधुमाधूचीभ्याम्—ख० । ८ (मा० ३७।१९; का० ३७।१८) काण्वसंहितायां तु पूर्वमन्त्रस्यैवायमन्तिमो भागः । ९ परोष्णिक्—सर्वा० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[१]पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिꣳसीः ॥ २० ॥

[२]त्रिष्टुप् घर्मदेवत्या। उत्तरार्द्धं पत्न्याशीः। पिता नः अस्माकम्। यतस्त्वं [३]पितासि पातासि। अतो ब्रवीमि—पिता नो बोधि। नः अस्माकम्। बोधि बोधय। नमस्ते अस्तु। ते तुभ्यम्। नमोऽस्तु। मा माम्। मा हिंसीः हिंसां मा कार्षीः ॥ २० ॥

[४]महावीरमीक्षमाणां पत्नीं वाचयति—

[५]त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेह्यरिष्टाहꣳ सह पत्या भूयासम् ॥२१॥

[६]यस्त्वष्टा हि रेतस्यं विकर्तनस्थानं तद्वन्तो वयम्[?]। यद्वा व्यत्ययः। त्वष्टृमत्यः[?] वयं महावीरं सपेम। सपतिः स्पर्शनकर्मा [निरु० ५।१६]। संस्पृशेम। [७]मिथुनार्थं स्पृशेम। अतस्त्वं पुत्रान् पशून् च मयि धेहि स्थापय। अहं च अरिष्टा पत्या सह अरिष्टा अनुपहिंसिता। भूयासं भवेयमिति[८] ॥ २१ ॥

रौहिणौ जुहोति [शत० ब्रा० १४।२।१।१]—

[९]अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा।

रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २२ ॥

घर्मदेवत्ये द्वे यजुषी। अहः केतुना प्रज्ञया कर्मणा वा सहितमहः। जुषतां सेवतां परिगृह्णातु। कथं भूतमहः? सुज्योतिर्ज्योतिषा। [१०]स्वकीयेनैवादित्यज्योतिषा स्वयं सुज्योतिः शोभनज्योतिष्कमहः जुषताम्। रात्रिः केतुना प्रज्ञया कर्मणा [११]वा युक्ता रात्रिः जुषताम्। सुज्योतिर्ज्योतिषा[१२]। स्वकीयेन चन्द्रादिज्योतिषा सुज्योतिः शोभनदीप्तिः। रात्रिर्जुषताम्। स्वाहेति होमार्थः ॥ २२ ॥

इति [१३]श्रीशुक्लयजुःकाण्वसंहिताभाष्यसंग्रहे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

---

१ (मा० ३७।२०; का० ३७।१९)। २ पिता नोऽसि ऋग्गायत्री—सर्वा० टी०। ३ पितासि। पाता पिता, पिता नो बोधि नः—ख०। ४ द्रष्टव्यम्—का० श्रौ०[२६।४।१५]; शत० ब्रा०[१४।१।४।१६]। ५ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः। ६ त्वष्टृमन्तः यजुः—सर्वा०, ऋचां त्रिष्टुप्, घर्मो देवता—सर्वा० टी०। ७ 'मिथुनार्थं स्पृशेम' नास्ति—ख०। ८ 'इति' नास्ति—क०। ९ (मा० ३७।२१; का० ३७।२०) १० 'स्वकीयेनैवादित्यज्योतिषा' नास्ति—ख०। ११ 'वा' नास्ति—क०। १२ 'ज्योतिषा' नास्ति—ख०। १३ श्रीकाण्ववेदमन्त्रभाष्यसंग्रहे—ख-ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अष्टत्रिंशोऽध्यायः

[1]घर्मधुग्दोहनार्थं रज्जुमादत्ते—

[2]देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।

आददेऽदित्यै रास्नासि ॥ १ ॥

'देवस्य त्वा' इति मन्त्रो व्याख्यातः [१।१३]। अतस्त्वाम्। [3]आददे गृह्णामि। यतस्त्वमदित्यै रास्नासीति। अदित्यै देवतायै त्वं रास्ना रशना [4]रज्जुरसि ॥ १ ॥

[5]रज्जुं गृहीत्वा गामाह्वयति—

[6]इळ एह्यदित एहि सरस्वत्येहि।

असावेह्यसावेह्यसावेहि ॥ २ ॥

गोदेवत्यं यजुः। हे इळे [7]मानवि, देवतास्तुतिरूपिणि। एहि [8]आ इहि आगच्छ। दोहनार्थम्। हे अदिते देवमातः, त्वम् एहि आगच्छ। हे सरस्वति ब्रह्मवल्लभे, एहि [9]आगच्छ। गोर्नामान्येतानि—"इडा हि गौरदितिर्हि गौः सरस्वती हि गौः" [शत० ब्रा० १४।२।१।७] इति श्रुतेः। अथोच्चैराह्वयति[10] नाम्ना। असाविति नामग्रहणम्। असौ एहि आगच्छेति आह्वयति [11]गार्हपत्यं गच्छन् ॥ २ ॥

[तामागताम्] अभिदधाति [शत० ब्रा० १४।२।१।८]—

[12]अदित्यै रास्नासीन्द्राण्या उष्णीषः ॥ ३ ॥

---

१ द्रष्टव्यम्—का० श्रौ० [२६।५।१]; शत० ब्रा० [१४।२।१।६]।
२ (मा० ३८।१)। ३ 'आददे' नास्ति—ख०। ४ 'रज्जुः' नास्ति—ख०।
५ द्रष्टव्यम्—का० श्रौ० [२६।५।१]; शत० ब्रा० [१४।२।१।७]। ६ (मा० ३८।२)।
७ 'मानवि' नास्ति—ख०। ८ 'आ इहि' नास्ति—क-ग०। ९ 'आगच्छ' नास्ति—ख०।
१० उच्चैः प्राह्वयति—ख०। द्रष्टव्यम्—का० श्रौ० [२६।५।१]; शत० ब्रा० [१४।२।१।७]।
११ द्रष्टव्यम्—का० श्रौ० [२६।५।१]। १२ (मा० ३८।३)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0. In Public Domain. Digitized by Sarayu Trust/eGangotri

रज्जुदेवत्या द्विपदा गायत्री। [1]गां पाशेन प्रतिमुञ्चति—अदित्यै रास्नासीति। अदित्यै अदित्याः देवतायाः। रास्नासि रसनासि। इन्द्राण्या उष्णीष इति। इन्द्राणी इन्द्रस्य प्रिया पत्नी, तस्या इन्द्राण्या उष्णीषः शिरोवेष्टनमसीति रज्जुः स्तूयते ॥ ३ ॥

गां स्थूणायां बध्वा वत्समुत्सृजति[1]—

[2]पूषासि घर्माय दीष्व ॥ ४ ॥

वत्सदेवत्यं यजुः। पूषासीति। पूषा वायुः पुष्यतीति पूषा वृष्टिधाराप्रेरकः। प्रकरणत्वेन यः प्रसिद्धो वायुः पूषा वृष्टिधाराप्रेरकः। तथायं वत्सोऽपि प्रस्रवहेतुत्वेन धाराप्रेरक इति। वत्समुन्नयति [का० श्रौ० २६।५।४]—घर्माय दीष्व। घर्माय रसाय दीष्व। दयतिर्दानकर्मा [निरु० ४।१७]। पयसः प्रदानं कुरु। इयं गौः[!] ये रसास्तान् पिन्वतोऽस्मै घर्माय रसाय। दीष्व दानं कुर्वित्यर्थः ॥ ४ ॥

[3]गां दोग्धि—

[4]अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व ॥ ५ ॥

लिङ्गोक्तदेवत्यं यजुः। अश्विभ्यामर्थाय पिन्वस्व। [5]'पिवि मिवि सेचने' [५८८-८६ भ्वादिः]। क्षीरसेचनं कुरुष्व। सरस्वत्यै अर्थाय पिन्वस्व। इन्द्राय सुत्राम्णे पिन्वस्व। क्षीरधाराप्लवनं कुरुष्व ॥ ५ ॥

अथ विप्रुषोऽभिमन्त्रयते [का० श्रौ० २६।५।६; शत० ब्रा० १४।२।१।१४]—

[6]स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ६ ॥

क्षीरविप्रुड्देवत्यं यजुः। दुह्यमानेष्विदं पयः। इन्द्रवत् इन्द्रयुक्तमस्तु। स्वाहा सुहुतमस्तु। इति त्रिष्कृत्व आह—स्वाहेन्द्रवत् स्वाहेन्द्रवत्[7] स्वाहेन्द्रवत्। आवृत्तिर्नियमार्था ॥६॥

---

१ द्रष्टव्यम्—का० श्रौ० [२६।५।३]। २ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवान्तिमो भागः।
३ द्रष्टव्यम्—का० श्रौ० [२६।५।५]। अथ पिन्वने पिन्वयति [शत० ब्रा० १४।२।१।११]-ख०।
४ (मा० ३८।४; का० ३८।४)। ५ पिन्व मिन्व—क-ख-ग०।
६ पूर्वमन्त्रस्यैवायमन्तिमो भागः काण्वमाध्यन्दिनयोः।
७ 'स्वाहेन्द्रवत्' नास्ति—ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्तनमालभते [का० श्रौ० २६।५।७]—

[१]यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः। येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः। उर्वन्तरिक्षमन्वेमि ॥ ७ ॥

वाग्देवत्या त्रिष्टुप्, यजुरन्ता। ऋषिर्दीर्घतमाः। हे सरस्वति, यस्ते तव स्तनः [२]स्तन इव स्तनः। कथंभूतः स्तनः? शशयः। 'शीङ् स्वप्ने' [१०३२ अदादिः] स्वप्न इव स्थितः। अन्यैरनुपयुक्तः सुप्त इवास्ते। [३]यश्च मयोभूः। मय इति सुखनाम [निघ० ३।६]। मयः सुखं भावयति सर्वेषां भूतानामिति स्तनो मयोभूः। यस्ते स्तनः रत्नधाः रत्नानां धनानां दाता, रत्नानां रमणीयानां [४]च धारयिता। यश्च वसु धनं देवयतीति[?] वसुवित्। यश्च सुदत्रः कल्याणदानः। हे सरस्वति, येन स्तनेन। विश्वा विश्वानि। वार्याणि वरणीयानि वस्तूनि पुष्यसि। [५]इह तं स्तनं धातवे धननिधानाय स्वपोषणाय। अकः अकरोः कृतवत्यसि। [६]अथ गार्हपत्यं गच्छत्युर्वन्तरिक्षमन्वेमीत्येवैतदाह। अधिश्रिते पयसि ऊर्ध्वमुत्सिच्यमाने पयस्येतदाह ॥ ७ ॥

परीशासावादत्ते [का० श्रौ० २६।५।१२]—

[७]गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि ॥ ८ ॥

परिशासदेवत्यं यजुः। गायत्रं छन्दोऽसि। [८]त्रैष्टुभं छन्दोऽसि। परिशासस्य क्रमेण मन्त्रद्वयम् ॥ ८ ॥

ताभ्यां महावीरं परिगृह्णाति [का० श्रौ० २६।५।१४]—

द्यावापृथिवीभ्यां त्वा परिगृह्णामि ॥ ९ ॥

महावीरदेवत्यं यजुः। द्यावापृथिवीभ्यां त्वा त्वां महावीरं परिगृह्णामि ॥ ९ ॥

---

१ (मा० ३८।५; का० ३८।५) २ 'स्तन इव स्तनः। कथंभूतः स्तनः?' नास्ति—ख०। ३ 'यश्च' नास्ति—ख०। ४ 'च' नास्ति—क-ग०। ५ 'इह' नास्ति—ख०। ६ द्रष्टव्यम्—का० श्रौ० [२६।५।११]। ७ (मा० ३८।६; का० ३८।६)। इत आरभ्य व्याख्यातानां चतुर्णां प्रतीकानामेक एव मन्त्रः काण्वमाध्यन्दिनयोः। ८ 'त्रैष्टुभं छन्दोऽसि' नास्ति—ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपयमन्योपगृह्णाति [का० श्रौ० २६।५।१५]—

अन्तरिक्षेणोपयच्छामि ॥ १० ॥

अन्तरिक्षेण लोकेन । उपयच्छामि ॥ १० ॥

[1]पय आसिञ्चति—

इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट् ।

स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ११ ॥

वैश्वदेवानि यजूंषि । हे इन्द्राश्विनौ, हे इन्द्र हे अश्विनौ । मधुनः । कथंभूतस्य ? सारघस्य मधुमक्षिकाभिः साध्यस्य मधुनः । घर्मं रससंघातम् । वसवश्च देवाः घर्मं पात पिबत । ऋत्विजः यजत वाट् । वाडिति वषट्कारः । वषट्कृतम् । एवं हुतं भवति । स्वाहा सूर्यस्य रश्मये स्वाहा । कथंभूताय ? वृष्टिवनये । वृष्टिं वनति संभजतीति वा वृष्टिवनिः, तस्मै वृष्टिवनये रश्मये । स्वाहेति होमार्थः । सुहुतमस्तु ॥ ११ ॥

[2]आहवनीयं गच्छन्नध्वर्युर्वातनामानि जुहोति—

[3]समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।

अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहा ।

अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥ १२ ॥

वातदेवत्यानि यजूंषि । समुद्राय । [4]'द्रु द्रवणे' सम् उत् । सर्वे देवा यद् वातात् समुद्द्रवन्तीति समुद्रो वातः । तस्मै समुद्राय वाताय । [5]'वा गतिगन्धनयोः' [१०५० अदादिः] हे प्रवर्ग्य, त्वा त्वाम् । समुद्राय वाताय जुहोमि । स्वाहेति होमार्थः । सरिराय त्वा वाताय स्वाहा । 'ईर गतौ [कम्पने च]' [१०१८ अदादिः] सर्वाणि भूतानि यतः सहेरते । व्यत्ययः । सहेरन्ते । सह गच्छन्ति स सरिरः, तस्मै सरिराय वाताय ।

---

१ द्रष्टव्यम्–का० श्रौ० [२६।५।१६] । २ द्रष्टव्यम्–का० श्रौ० [२६।५।१७] ।
३ (मा० ३८।७; का० ३८।७) । ४ 'द्रु गतौ' [९४५ भ्वादिः] ।
५ 'वा गतिगन्धनयोः'····अनाधृष्याय त्वा वाताय स्वाहा' नास्ति–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वा प्रवर्ग्यं त्वां जुहोमि स्वाहा। अनाधृष्याय [1]त्वा वाताय स्वाहा। 'ञिधृषा प्रागल्भ्ये' [१२७० स्वादिः] धर्षितुमशक्यः अनाधृष्यः स्प्रष्टुमशक्यः, तस्मै अनाधृष्याय। शत्रुभिः प्रतिधर्षितुमशक्यः अप्रतिधृष्यः, तस्मै अप्रतिधृष्याय वाताय प्रवर्ग्यं त्वां स्वाहा जुहोमि। सर्वत्रैवं वाक्ययोजना। स्यति उपस्पर्शनकर्मा। सर्वाणि भूतानि अवस्यति उपस्पृशति वा अवस्युः, तस्मै अवस्यवे वाताय। अशिमिदाय। शिमीति कर्मनाम [निघ० २।१; निरु० ५।१२] शिमिं ददातीति शिमिदः कर्मदः। अस्मादन्यो न विद्यत इति अशिमिदः, तस्मै अशिमिदाय वाताय। [2]प्रवर्ग्यं [3]त्वां जुहोमि ॥ १२ ॥

[4]इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहा। इन्द्राय त्वाभिमातिघ्ने स्वाहा सवित्रे त्व ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥ १३ ॥

[5]घर्मदेवत्यं यजुः। इन्द्रादिनामभिरेव वायुः स्तूयते। इन्द्राय परमैश्वर्ययुक्ताय वाताय त्वा प्रवर्ग्यं त्वाम्। वसुमते वसवो विद्यन्ते यस्येति वसुमान्, तस्मै वसुमते। रुद्रवते रुद्रोऽस्यास्तीति रुद्रवान् वातः, तस्मै रुद्रवते। इन्द्राय। आदित्योऽस्यास्तीति आदित्यवान् वातः, तस्मै आदित्यवते वातायेन्द्राय। अभिमातिघ्ने अभिमातिः शत्रुः तं हन्तीत्यभिमातिहा, तस्मै अभिमातिघ्ने। सवित्रे प्रसवकर्त्रे वाताय। ऋभुमते तस्मै बृहते। विभुमते विभवे। वाजवते अन्नवते। बृहस्पतये वाताय। विश्वदेव्यावते [6]विश्वेषु देवेषु भवः विश्वदेव्यः [7]सोऽस्यास्तीति विश्वदेव्यावान्, तस्मै विश्वदेव्यावते। छान्दसो दीर्घः। प्रवर्ग्यं त्वां जुहोमि ॥ १३ ॥

[8]यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ १४ ॥

[9]घर्मदेवत्यं यजुः। यमयतीति यमः वातः। तस्मै यमाय त्वा। अङ्गिरस्वते अङ्गिरा इत्यङ्गिरस्वान् इत्यङ्गिरस्वते वाताय। पितृमते पिता पालकोऽस्यास्तीति पितृमान्, तस्मै पितृमते। हे प्रवर्ग्य, तं त्वां जुहोमि। स्वाहा सुहुतमस्तु ॥ १४ ॥

---

१ 'त्वा वाताय स्वाहा''''अप्रतिधृष्यः' नास्ति–क०। २ प्रवर्ग्य–क०। ३ 'त्वा' नास्ति–ख०।
४ (मा० ३८।८; का० ३८।८)। ५ 'घर्मदेवत्यं यजुः' नास्ति–ख०।
६ विश्वेदेवेषु भवः–ख०। ७ 'सोऽस्यास्तीति विश्वदेव्यावान्' नास्ति–ख०।
८ (मा० ३८।९; का० ३८।९)। ९ 'घर्मदेवत्यं यजुः' नास्ति–ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपयमन्याऽऽसिञ्चति [का० श्रौ० २६।६।१]—

[1]स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ १५ ॥

[2]द्वे [3]घर्मदेवत्ये यजुषी। घर्माय घर्मदेवतायै स्वाहा जुहोमि। पित्रे पितृदेवतायै स्वाहा। [4]घर्मरसः सुहुतमस्तु ॥ १५ ॥

वषट्कृते जुहोति [का० श्रौ० २६।६।३]—

[5]विश्वा आशा दक्षिणसत्सर्वान्देवानयाळिह।
स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥ १६ ॥

आश्विन्यनुष्टुप्। विश्वाः सर्वाः। आशाः कामाः। दक्षिणसत् दक्षिणतः सीदतीति दक्षिणसत्। अग्नेर्दक्षिणतः स्थित्वा ब्रह्मा ब्रवीति—सर्वान् देवान् अयाळिह। सर्वान् देवान् अयाक्षीदिति। इह यज्ञे इष्टवानसीत्येतदाह। स्वाहाकृतस्य घर्मस्य। स्वाहाकारेण कृतः [6]स्वाहाकृतस्तस्य स्वाहाकृतस्य। घर्मस्य रसस्य। मधोः साधुभूतस्य घर्मस्य स्वभागमिति दक्षिणसत्। हे अश्विनौ पिबतम् ॥ १६ ॥

अथ हुत्वोद्ध्र्वमुत्कम्पयति [शत० ब्रा० १४।२।२।१७] इति श्रुतिः। त्रिरुत्कम्पयति [का० श्रौ० २६।६।४] इति सूत्रम्—

[7]दिवि धा इमं यज्ञमिमं यज्ञं दिवि धाः।
स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः ॥ १७ ॥

घर्मदेवत्या [8]गायत्री। दिवि द्युलोके। इमं यज्ञं धाः स्थापय। इमं यज्ञं दिवि धाः। अभ्यासे भूयांसमर्थं मन्यन्ते [निरु० १०।४२]। [9]अनुवषट्कृते जुहोति—स्वाहाग्नय इति। अग्नये स्वाहा सुहुतमस्तु। यज्ञियाय शं यजुर्भ्यः। यज्ञार्हाय अग्नये। यजुर्भ्यः सकाशात्। शं सुखम्। अस्माकमस्त्विति शेषः ॥ १७ ॥

---

१ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः। २ स्वाहा घर्मायेति स्वाहा घर्मपित्र इति च द्वे—ख-ग०। ३ 'घर्मदेवत्ये यजुषी' नास्ति—ख०। ४ 'घर्मः' इत्येव—ख०। ५ (मा० ३८।१०; का० ३८।१०)। ६ 'स्वाहाकृतः' नास्ति—क०। ७ (मा० ३८।११; का० ३८।११)। ८ सामोष्णिक्—सर्वा० टी०। ९ द्रष्टव्यम्—का० श्रौ० [२६।६।५]।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]ब्रह्मानुमन्त्रयते [का० श्रौ० २६।६।६]—

[2]अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १८ ॥

उष्णिग् [3]आश्विनी । अश्विना अश्विनौ । घर्मरसं पातं पिबतम् । हार्द्वानं हृदयस्य प्रियं हृदयसंबन्धि प्रियं वचनं हार्द्वानम् । घर्मं पातम् । अहः अहोभिः । दिवाभिः [4]दिवसैः । अह इत्यत्र पूर्वाह्णवचनः । दिवाशब्दोऽत्र सायंकालवचनः । स हि प्रवर्ग्ययागकालः । ऊतिभिः एतत्कालोपलक्षिताभिः [5]ऊतिभिः [6]अवनैः अग्निनिमित्तभूतैः । तन्त्रायिणे । प्रसारिताः तन्तवः तुरीशलाकाप्रोताः तन्तवः तन्त्रमुच्यन्ते । तन्त्रमिव तन्तुना ऊर्णनाभिरिव अयितुं त्रिलोकान् गन्तुं शीलमस्येति । तन्तौ [7]यथा तन्तुनालिः सूत्रपूरणाय एति तथा त्रींल्लोकानादित्यस्तन्त्रायी; "एष हीमाँल्लोकाँस्तन्त्रमिवानुसंचरति" [शत० ब्रा० १४।२।२।२२] इति श्रुतेः । तस्मै नमः । उत्तरत्राप्यनुषङ्गः । नमो द्यावापृथिवीभ्याम् ॥ १८ ॥

[8]यजमानोऽनुमन्त्रयते

[9]अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम् ।
इहैव रातयः सन्तु ॥ १९ ॥

आश्विनी ककुप् । अपातां पीतवन्तौ । अश्विना घर्मम् । अनु द्यावापृथिवी । अमंसाताम् अनुमतवत्यौ । तथा घर्ममपातामश्विनौ द्यावापृथिव्यौ अनुमतवत्यौ । द्यावापृथिव्यौ । साध्वभूदिति । यत एवम् अतो ब्रवीमि । इहैव रातयः सन्तु । इहैव यज्ञे एव । रातयः दानानि [10]धनदानानि सन्तु ॥ १९ ॥

पिन्वमानमभिमन्त्रयते[11]—

[12]इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व
क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ॥ २० ॥

---

१ द्रष्टव्यम्—शत० ब्रा० [१४।२।२।१९] । २ (मा० ३८।१२; का० ३८।१२) । ३ 'आश्विनी' नास्ति—ख० । ४ 'दिवसैः' नास्ति—ख० । ५ 'ऊतिभिः' नास्ति—क० । ६ 'अवनैः' नास्ति—ख० । ७ 'यथा तन्तुनाभिः''''साध्वभूदिति' नास्ति—ख० । ८ द्रष्टव्यम्—का० श्रौ० [२६।६।७] । ९ (मा० ३८।१३; का० ३८।१३) । १० धनानि—क० । ११ अनुमन्त्रयते—का० श्रौ० [२६।६।८]; शत० ब्रा० [१४।२।२।२७] । १२ (मा० ३८।१४; का० ३८।१४) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रवर्ग्यदेवत्या जगती। हे प्रवर्ग्य, इषे [1]पिन्वस्व तुष्ट्यै पिन्वस्व सेचस्व। ऊर्जे अन्नाय पिन्वस्व। ब्रह्मणे ब्राह्मणेभ्यः पिन्वस्व। क्षत्राय क्षत्रियेभ्यः पिन्वस्व। द्यावापृथिवीभ्यां तर्पणाय पिन्वस्व ॥ २० ॥

उत्क्रामत्युत्तरपूर्वार्द्धम् [का० श्रौ० २६।६।९]—

[2]घर्मासि सुधर्माऽमेन्यस्मे नृम्णानि धारय

ब्रह्म धारय क्षत्रं धारय विशं धारय ॥ २१ ॥

हे प्रवर्ग्य, त्वं घर्मासि सर्वस्य जगतो धारकोऽसि। हे सुधर्म, आहुतिपरिणामद्वारेण सुधर्म साधुधारणशील। खरे करोति [का० श्रौ० २६।६।१०]—[अमेनीति]। अमेनि 'मीञ् हिंसायाम्' [१४७७ क्र्यादिः]। अमेनि अहिंसन् अक्रुध्यन्। नृम्णानि धनानि धारय। ब्रह्म ब्राह्मणजातिम्। अथ क्षत्रं धारय। विशं धारय। अस्मे अस्मासु। धारय स्थापय ॥ २१ ॥

शाकलैर्जुहोति [शत० ब्रा० १४।२।२।३१]—

[3]स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः।

स्वाहा पितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्यः स्वाहा

द्यावापृथिवीभ्याᳬ स्वाहा विश्वेभ्यो देवेभ्यः ॥ २२ ॥

सप्त लिङ्गोक्तदेवत्यानि यजूंषि। पूष्णे स्वाहा वायवे प्राणाय[4]। शरसे। शर इति दध्न उपरि स्नेहभूतो रसः शर इत्युच्यते, तद्रूपाय शरसे। ग्रावभ्यः प्राणेभ्यः। "प्राणा वै ग्रावाणः" [शत० ब्रा० १४।२।२।३३] इति श्रुतेः। प्रतिरवेभ्यः प्राणेभ्यः। "प्राणा वै प्रतिरवाः" [शत० ब्रा० १४।२।२।३४] इति। स्वाहा पितृभ्यः ऊर्ध्वबर्हिर्भ्यः। उर्ध्वम् उत्कृष्टं बर्हिर्येषां ते उर्ध्वबर्हिषः, तेभ्यः स्वाहा। घर्मपावभ्यः घर्मसेविभ्यः स्वाहा। द्यावापृथिवीभ्यां प्राणोदानाभ्यां स्वाहा इति। विश्वेभ्यो देवेभ्यः प्राणेभ्यः स्वाहा ॥ २२ ॥

---

१ 'पिन्वस्व' नास्ति—ख०।

२ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः।

३ (मा० ३८।१५; का० ३८।१५)।

४ 'प्राणाय' नास्ति—ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

¹स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः ।
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २३ ॥

रुद्रशब्दः स्तोतृनामसु पठितः [निघ० ३।१६]। रुद्रैः स्तोतृभिः आहूयत इति रुद्रहूतिः, तस्मै रुद्रहूतये स्वाहा । महावीराद्दुपयमन्यां प्रत्यानयति [शत० ब्रा १४।२।२।४०]– स्वाहा संज्योतिषा ज्योतिः । संज्योतिषा ज्योतिरूपेण । ज्योतिः संगच्छते; "ज्योतिर्वा इतरस्मिन् पयो भवति ज्योतिरितस्याम्" [शत० ब्रा० १४।२।२।४०] इति श्रुतेः । 'अहः केतुना' इति व्याख्यातम् [३७।२२] ॥ २३ ॥

अथ यजमानाय घर्मोच्छिष्टं प्रयच्छति । स उपहवमिष्ट्वा भक्षयति [शत० ब्रा० १४।२।२।४२]—

²मधु हुतमिन्द्रतमे अग्ना अश्याम ते देव घर्म
नमस्ते अस्तु मा मा हिꣳसीः ॥ २४ ॥

मधु मधुमत् । मधु हुतं कृतम् । इन्द्रतमे इन्द्रियवत्तमे । अग्नौ हुतम् । ते तुभ्यम् । देवतार्थत्वेनास्माभिर्हुतम् । हे देव हे घर्म प्रवर्ग्य, तच्छेषम् अश्याम । 'अश भोजने' [१५२४ क्र्यादिः] । भक्षयामः । हविःशेषभक्षणं कुर्मः । हे देव, तुभ्यं नमोऽस्तु । मा माम् । त्वं मा हिंसीः हिंसां मा कार्षीः । ³एवमाशिषमाशास्ते ॥ २४ ॥

⁴महावीरमासन्द्यां करोति—

⁵अभीमं महिमा दिवं विप्रो बभूव सप्रथाः ।
उत श्रवसा पृथिवीꣳ सꣳसीदस्व महाँ२ असि रोचस्व देववीतमः ।
विधूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ २५ ॥

---

१ (मा० ३८।१६; का० ३८।१६) । २ काण्वमाध्यन्दिनयोः पूर्वमन्त्रस्यैवायमन्तिमो भागः ।
३ आशिषमेवैतदाशास्ते–शत० ब्रा० [१४।२।२।४२]
४ द्रष्टव्यम्–का० श्रौ० [२६।६।२६] । ५ (मा० ३८।१७; का० ३८।१७) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गायत्रीबृहत्यावनवसाने। [1]यत्र गायत्रीबृहत्यौ मीलिते प्रतीयेते स गायत्रः प्रगाथः, अतिशक्करी वाऽऽग्नेयी। अभीमं महिमा दिवं विप्रो [2]बभूव। हे श्रीभगवन्नग्ने, प्रवर्ग्यात्मकाग्ने। यस्य तव महिमा माहात्म्यम्। इमं दिवं द्युलोकम्। अभिबभूव अभिभवं चकार। कथंभूतस्त्वम्? विप्रः महिम्ना मेधावीति स्तूयते, 'प्रा पूरणे' [१०६१ अदादिः] इति वा। अपेक्षितफलस्य परिपूरकः। सप्रथाः सर्वतः पृथुभावयुक्तः। उत अपि च। श्रवसा भवत्कीर्त्या। श्रव इति कीर्तिनाम [निरु० ११।६]। पृथिवीं च ते महिमा अभिबभूव। हे श्रीभगवन्नग्ने, देववीतमः। इतस्त्वां ब्रवीमि। संसीदस्व आसन्द्यां सीदस्व अत्राऽऽसीनो भव। त्वं च महानसि। अतस्त्वं शोचस्व दीप्यस्व। विधूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्। हे श्रीभगवन्नग्ने, मियेध्य। मेध्य इति प्राप्ते मियेध्य इति छान्दसं पदम्। हे मियेध्य हे यज्ञिय आर्ष, आरोचने धूमं विसृज। हे प्रशस्त हे श्रीभगवन्नग्ने। दर्शतं दर्शनीयम्। इत उत्तरमाहुतिपरिणामं भवत्विति शेषः ॥२५॥

चतुर्गृहीतेनाभिजुहोति [२६।७।४]—

[3]या ते॑ घर्म दि॒व्या शुग्या गा॑य॒त्र्याᳪं ह॑वि॒र्धाने॑। सा त॒ आप्या॑यतां॒ निष्ट्या॑यतां॒ तस्यै॑ ते॒ स्वाहा॑। या ते॑ घर्मा॒न्तरि॑क्षे॒ शुग्या त्रि॒ष्टुब्भ्याग्नी॑ध्रे। सा त॒ आप्या॑यतां॒ निष्ट्या॑यतां॒ तस्यै॑ ते॒ स्वाहा॑। या ते॑ घर्म पृ॑थि॒व्याᳪं शुग्या जग॑त्याᳪं सद॒स्या॑। सा त॒ आप्या॑यतां॒ निष्ट्या॑यतां॒ तस्यै॑ ते॒ स्वाहा॑ ॥ २६ ॥

यत्रातिशक्कर्यनुष्टुभौ मीलिते सोऽतिशाक्करः प्रगाथः। हे घर्म, ते तव। दिव्या दिवि भवा शुक्। द्युलोकं प्रविष्टा च दीप्तिः। शुक् दीप्तिः। गायत्र्यां या प्रविष्टा हविर्धाने च या शुक् दीप्तिः। सा ते तव। आप्यायताम् आप्यायनं कुरुताम्। निष्ट्यायताम्। 'स्त्यै ष्ट्यै शब्द-संघातयोः' [६१०–११ भ्वादिः]। निः नितरां स्त्यायतां संघातभावमापद्यताम्। तस्यै शुचे ते तुभ्यं स्वाहा। या ते घर्म। हे घर्म प्रवर्ग्य रसरूप। ते तव अन्तरिक्षे अन्तरिक्षस्थाने प्रविष्टा या शुक्। या च त्रिष्टुभि श्रिता शुक्। या च आग्नीध्रे या च दीप्तिः। सा त इत्यादिः समानार्थः। या ते घर्म ते तव पृथिव्यां प्रविष्टा या शुक्। या च जगत्यां छन्दसि स्थिता शुक्। सदस्या सदसि सभायां भवा या शुक्। आप्यायतामित्यादिः समानार्थः ॥ २६ ॥

---

१ 'यत्र' नास्ति–ख०। २ 'बभूव'''विप्रः महिम्ना' नास्ति–ख०।
३ (मा० ३८।१८; का० ३८।१८)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]निष्क्रामति—

[2]क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।
विशस्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे ॥ २७ ॥

लिङ्गोक्तदेवत्या बृहती । [3]क्षत्रस्य क्षत्रसंबन्धिनः । परस्पाय परं प्रकृष्टं घर्मं पावयति पातीति वा परस्पः, तस्मै परस्पाय परमाय । ज्वलनाय ज्वलनार्थम् । हे महावीर, ब्रह्मणस्तन्वं शरीरम् । पाहि पालय । विशस्त्वा धर्मणा । "यज्ञो वै विट्" [शत० ब्रा० १४।३।१।६] इति श्रुतेः । विशः यज्ञस्य । धर्मणा यज्ञसंबन्धित्वेन विहितधर्मेण । त्वा महावीरं त्वाम् । अनुक्रामाय अनुगच्छेम । किमर्थमिति ? सुविताय [4]सुसमानाय अरिष्टयै । नव्यसे । असौ इति दीप्यदनेष्टुः [?] । निपूर्वस्य नेर्नाशार्थः[?] । नव्यसे [5]अविनाशस्य । महावीरं त्वामनुगच्छेमेति संबन्धः ॥ २७ ॥

[6]महावीरं निदधाति—

[7]चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः
स नः सर्वायुः सप्रथाः । अप द्वेषो अपह्वरोऽन्यव्रतस्य सश्चिम ॥२८॥

प्रवर्ग्यदेवत्या महाबृहती । महावीरः चतुःस्रक्तिः [8]महावीरस्य परितः । दिशः स्रक्तयः, "दिशो ह्येतस्य स्रक्तयः" [शत० ब्रा० १४।३।१।१७] इति श्रुतेः । चतस्रः स्रक्तयो दिशो यस्य, चतुःस्रक्तिः महावीरः । किं च, नाभिः [9]ऋतस्य यज्ञस्य नाभिः महावीरः । स च सप्रथाः सर्वतः पृथु । स त्वं नः अस्माकं विश्वायुः । [10]सर्वायुः सप्रथाः अस्मान्प्रथयिता च । आदरार्थोऽयमभ्यासः । [11]सर्वायुः सर्वायुषो दाता सर्वतश्च प्रथयितास्तु । अभ्यासे भूयांसमर्थं मन्यन्ते [निरु० १०।४२] इति । त्वत्प्रसादाच्च अपद्वेषः द्वेषादिः अपगच्छेत् । एवं चेद्वीतरागा भवेम । अपह्वरः [12]'ह्वर ह्वल चलने' [८०५–६ भ्वादिः] अपह्वरः अस्मत्तः [13]अपगतचलनः

---

१ द्रष्टव्यम्–का० श्रौ० [२६।७।६]। २ (मा० ३८।१९; का० ३८।१९) ।
३ 'क्षत्रस्य' नास्ति–ख० । ४ सुखमानाय–क-ग० । ५ अरिविनाशाय–ख० ।
६ द्रष्टव्यम्–का० श्रौ० [२६।७।१४] । ७ (मा० ३८।२०; का० ३८।२०) ।
८ महावीरस्य परितः शक्तस्य परितः–ख० । ९ 'ऋतस्य यज्ञस्य नाभिः' नास्ति–ख० ।
१० 'सर्वायुः' नास्ति–ख० । ११ 'सर्वायुः····त्वत्प्रसादाच्च' नास्ति–ख० ।
१२ 'ह्वर····अस्मत्तः' नास्ति–ख० । १३ अपगतवचनः वचनशून्यः–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चलनशून्यो भवतु । अन्यव्रतस्य । कर्मणि षष्ठी । अन्यद्व्रतं कर्म । सश्चिम । सश्चतिः सेवाकर्मा । सेवामहे ॥ २८ ॥

पयसा पूरयति [का० श्रौ० २६।७।३२]—

[1]घर्मैतत्ते पुरीषं तेन वर्द्धस्व चा च प्यायस्व ।

वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ २९ ॥

घर्मदेवत्याऽनुष्टुप् । हे घर्म, एतत् [2]एतत्कर्म । पुरीषं तव पूरयिता । तेन कर्मणा वर्धस्व अभिवृद्धिं कुरु । चा च प्यायस्व । [3]चकारो भिन्नक्रमः । आप्यायस्वेति । [4]अन्यद् व्याख्यातम् [२।२७] ॥ २९ ॥

[5]परिषिञ्चति—

[6]अचिक्रदद् वृषा हरिर्महान्मित्रो न दर्शतः ।

सᳬं सूर्येण दिद्युतदुदधिर्निधिः ॥ ३० ॥

[7]परोष्णिक् । अत्र घर्मात्मना आदित्यः स्तूयते । [8]यो महावीरः अचिक्रदत् । क्रन्दिरु[?] गतिशोषणयोः । क्रन्दतिरत्र शब्दवचनः । अचिक्रदत् पुनः पुनः [9]शब्दमकरोत् । वृषा वर्षिता आहुतिपरिणामद्वारेण । [10]हरिः हरितवर्णः, हर्ता वा रसानाम् । [11]महान् प्रभावतः । मित्रो न [12]दर्शतः मित्र इव दर्शनीयः । [13]मित्रः सूर्यो हि सर्वस्यैव मित्रम् । संसूर्येण [14]सूर्येण सह संगत्य । दिद्युतत् दिद्योतते । स्पर्धमान इव । उदधिः उदकधारकः । उदधिरिवोदधिः । निधिश्च अपेक्षितार्थफलसाधनत्वेन निधिश्च ॥ ३० ॥

---

१ (मा० ३८।२१; का० ३८।२१)। २ 'एतत्कर्म' नास्ति–ख० ।
३ 'चकारो भिन्नक्रमः' नास्ति–ख० । ४ व्याख्यातो मन्त्रः–ख० ।
५ द्रष्टव्यम्–का० श्रौ० [२६।७।१२]। ६ (मा० ३८।२२; का० ३८।२२)।
७ लिङ्गोक्तदेवत्योष्णिक्–ख०, पुरउष्णिक्–क-ग० । ८ 'यः' नास्ति–क० ।
९ शब्दं करोति–ख० । १० रसानाहरतीति हरिः–ख० ।
११ 'प्रभावतः' नास्ति–ख० । १२ 'दर्शतः' नास्ति–ख० ।
१३ मित्रो नाम सूर्यः सर्वस्य मित्रम्–ख० । १४ 'सूर्येण' नास्ति–ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[1]तथा चात्वालेऽप उपस्पृशन्ति—

[2]सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ ३१ ॥

प्राङ्विवोदङ्ङुत्क्रामति [श० ब्रा० १४।३।१।२८]—

[3]उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥
[4]एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥ ३ ॥

मन्त्रावेतौ व्याख्यातौ [६।३१; २२।६–७] ॥ ३१–३२ ॥

[5]दधिघर्मग्रहणम् [का० श्रौ० २६।७।५४]—

[6]यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥ ३३ ॥

दधिघर्मदेवत्या [7]महाबृहती । यावती यावत्परिमाणे । द्यावापृथिवी द्यावापृथिव्यौ । यावच्च । व्यत्ययः । यावच्च सप्त सिन्धवः । समुद्राश्च यावत्परिमाणपरिमिताः । वितस्थिरे विशेषतः स्थिराः । हे इन्द्र, तावन्तं तावत्परिमाणपरिमितम् । ते त्वदीयं ग्रहम् । ऊर्जा अन्नेन सह गृह्णामि । पुनः कथंभूतं ग्रहम् ? अक्षितम् अनुपक्षीणम् । गृह्णामीति संबन्धः । अपि च [8]मयि गृह्णाम्यक्षितम् । मयीत्यधिकारिणो निर्देशः । विज्ञानात्मनिश्चयः । तं ग्रहं गृह्णामीति ॥३३॥

भक्षयति [शत० ब्रा० १४।३।१।३१]—

[9]मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः ।
घर्मस्त्रिशुग्विराजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥३४॥

---

१ द्रष्टव्यम्–का० श्रौ० [२६।७।३७] । २ (मा० ३८।२३; का० ३८।२३) ।
३ (मा० ३८।२४; का० ३८।२४) । ४ (मा० ३८।२५; का० ३८।२४) ।
५ दधिलिङ्गग्रहणम्–ख० । ६ (मा० ३८।२६; का० ३८।२५) । ७ ब्राह्मी उष्णिक्–सर्वा० टी० ।
८ 'मयि' नास्ति–ख० । ९ (मा० ३८।२७; का० ३८।२६) ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदाहरणम्—

रूपपञ्चकमृणं धनं सखे खेन युक्तमथवा विवर्जितम् ।
शून्यतः पृथगपास्य तानि वा किं भवेद्गणक मे पृथग्वद ॥ ६ ॥

न्यासः—रू ५̇ रू ५।०

एतानि खेन युतान्यूनितान्यविकृतान्येव—रू ५̇ रू ५।०

न्यासः—रू ५̇ रू ५।०

एतानि शून्यतश्च्युतानि जातानि व्यक्तानि—रू ५, रू ५̇

इति शून्यसंकलनव्यवकलने ॥

---

[1]खगुणादौ सूत्रम्—

खं राशिना विभक्तं खं स्याद्राशिः खभाजितः खहरः ॥ १२ ॥
शेषविधौ सति खगुणश्चिन्त्यः शून्ये गुणे खहरश्चेत् ।
पुनरेव तदाऽविकृतो राशिर्ज्ञेयोऽत्र मतिमद्भिः ॥ १३ ॥

[2]उदाहरणम्—

धनात्मकैश्चाप्यधनात्मकैस्त्रिभिर्विभाजितं खं फलमाशु [मे] वद ।
धनात्मकाश्चाप्यधनात्मकास्त्रयः खभाजितास्त्वं गणक प्रवेत्सि चेत् ॥ ७ ॥

---

१ खगुणादावुपपत्तिः—गुण्यापचयाद् गुणनफलस्यापचयस्तावत् सिद्ध एव । यथा १२ × २ = २४; १० × २ = २०; २ × २ = ४; १ × २ = २ इतिरीत्या गुण्यस्य परमापचये गुणनफलस्यापि परमापचय आवश्यक इति ० × २ = ० । संख्यायाः परमापचये शून्यतायां पर्यवसानात् । तथैव गुणकापचये गुणनफलापचयोऽपि द्रष्टव्यः । यथा १२ × ८ = ९६; १२ × ५ = ६०; १२ × ३ = ३६; १२ × १ = १२; गुणकस्य परमापचये १२ × ०, गुणनफलेऽपि परमापचयवशात् १२ × ० = ० फलं भवति । भागहारे च भाजकापचये फलोपचयः सिद्धः । तद्यथा १२ ÷ ६ = २; १२ ÷ ४ = ३; १२ ÷ १ = १२ अत्र भाजकस्य परमापचये फलस्य परमा वृद्धिरावश्यकीत्यतः १२ ÷ ० = $\frac{१२}{०}$ अनन्तो वा। अयमेव खहर उच्यते ।

२ यथा भाज्यः ० । भाजकः −३ । रू ३ । ० ÷ ३ = ० । ० ÷ − ३ = ० । यथा भाज्यः रू −३ । रू ३ । भाजकः = ०अत्र रू −३ । रू ३ खहर इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यासः—भाज्यः रू ० भाजकः रू ३ रू ३̇

भागे हृते जातमुभयोः फलम् ०

न्यासः—भाज्यः रू ३ रू ३̇

भागे हृते जातः खहरः रू ३ वा रू ३̇ अत्र खहरगुण उच्यते ।

[1]शून्याभ्यासवशात्खतामुपगतो राशिः पुनः खोद्धृतोऽ-
प्यावृत्तिं पुनरेव तन्मयतया न प्राक्तनीं गच्छति ।
आत्माभ्यासवशादनन्यममलं चिद्रूपमानन्ददं
प्राप्य ब्रह्मपदं न संसृतिपथं योगी गरीयानिव ॥ १४ ॥

प्राक्तनश्लोकश्च—

[2]अस्मिन्विकारः खहरे न राशावपि प्रविष्टेष्वपि निःसृतेषु ।
बहुष्वपि स्याल्लयसृष्टिकालेऽनन्तेऽच्युते भूतगणेषु यद्वत् ॥ १५ ॥

इति खरूपभागहारः ॥

खयोगवियोगगुणनभजनवर्गवर्गमूलेषु सूत्रम्—

खं खयुतं रहितं वा खं स्यात्खेनाहतं च विहृतं वा ।
खस्य कृतिः खं खपदं खमेव सर्वत्र विज्ञेयम् ॥ १६ ॥

---

१ शून्याभ्यासवशादिति । अत्र न्यासः, $\frac{५ \times २}{२} = ५$ । $\frac{५ \times ०}{०} = ५$ ।

२ अस्मिन्विकार इति । ननु यद्यप्यभिन्नराशिना योगान्तरयोर्भवत्यविकृतत्वं तथापि भिन्नराशिना योगेऽन्तरे च त्वदुक्तरीत्या भवेदेव विकारः । यथा $\frac{३}{०} + \frac{१}{३}$ अन्योन्यहाराभिहतौ हरांशाविति जातौ तुल्यहरौ $\frac{९}{०}$ । $\frac{०}{०}$ अनयोर्योगे जातम् $\frac{९}{०}$ । अथ यद्युच्यते—एकस्य हरेण येन केनचिदङ्केन वाऽपरराशिहरांशगुणनमात्रेण तुल्यहरत्वे जाते परतः श्रमो व्यर्थ एव । प्रकृतेऽपि खहरराशेर्हरणे शून्येनापरराशि $\frac{१}{३}$ हरांशगुणनमात्रेण तुल्यहरस्य जातत्वाद्योगेऽन्तरे च नास्त्येव विकार इति । तर्हि खहरस्य खहरणे योगेऽन्तरे च भवेदेव विकारः । यथा राशिः $\frac{३}{०} + \frac{५}{०}$ अनयोस्तुल्यहरत्वाद्योगे जातम् $\frac{८}{०}$ तत्कथं न विकार इति चेन्मैवम्; अत्रापि फलतो विकाराभावात् । न हि खेन भक्तेषु त्रिष्वन्यत्फलमष्टसु भक्तेष्वितरदिति, किन्तूभयत्राप्यनन्तत्वे न व्यभिचार इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदाहरणम्—

खे शून्येन युते च किं विरहिते किं खेन निघ्ने च किं
किं भक्ते किमु वर्गिते कथय भो मूलीकृते किं सखे।
राशिः कोऽपि खसंगुणो निजदलेनाढ्यः खसंभाजितो
जाता द्वादश तं द्रुतं वद दृढां प्रौढिं प्रयातोऽसि चेत् ॥ ८ ॥

न्यासः-०

एतत्खेन युतं जातम् ०। वर्जितम् ०। खेन गुणितम् ०। भक्तम् ०।
वर्गितम् ०। मूलीकृतम् ०।

न्यासः-अज्ञातो राशिः कल्पितमिष्टम् २

अत्र [1]शेषविधाविति खगुणश्चिन्त्यः। तत्कथम्? शून्येन द्वये गुणिते ०। अस्यार्द्धम् ०। अनेन युतम्०। एतच्छून्येन हृतं शून्यमेव ०। दृश्यभावादियं क्रिया निर्वहति इष्टम् २

---

१ शेषविधाविति खगुणश्चिन्त्य इति। कश्चिदपि राशिः खेन (शून्येन) गुणितः खं भवतीति प्रसिद्धम्। यथा ५ × ० = ०, १२ × ० = ०, इत्यादि। परन्तु तत्र यदि शेषविधिरप्यस्ति, अर्थाद् गुणनानन्तरमपि योगवियोगभागादिरूपा काचित्क्रियाऽवशिष्टा स्यात्तदा पूर्वागतं (गुणनेनागतम्) शून्यं फलं न ग्राह्यम्। यतो ह्यत्र शून्यं गुण्यस्य गुणकस्य वा परमापचयद्योतकम्, न स्वभावरूपम्। अतस्तत्र खगुणितराशिमेव संस्थाप्याग्रिमा क्रिया कार्या।

यथा $\frac{५ \times ०}{०}$ इत्यत्र ५ × ० = ० तथा $\frac{०}{०}$ इदं न कार्यम्। यतो हि ५ इत्यत्र शून्यगुणनानन्तरं शून्येन भजनमप्यवशिष्टमतो भजनरूपक्रियावशेषात् ५ × ० = ० इदं फलं नोचितम्। अस्ति च ५ × ० = ५ × ० इदं शेषक्रियानिर्वाहार्थं युक्तम्।

अतः $\frac{५ \times ०}{०} = ५$ सिद्धम्। $\frac{५ \times ०}{०} = ०$ इदं न युक्तम्।

वस्तुतो हि ५ × ० इत्यत्र गुणकस्यात्यल्पसंख्याङ्कबोधकाङ्काभावाच्छून्येनैव गुणकगतात्यन्ताल्पता बोध्यते, अतो गुणनफलस्यात्यन्ताल्पताबोधकमिदं शून्यं भवितुमर्हति न स्वभावरूपताबोधकम्।

अल्पताबोधकमेव शून्यमस्तीत्यत्रान्यापि युक्तिः—गुण्यगुणकयोरेकतरस्य ह्रासे फलापचयो दृश्यते। यथा १२ × ८ = ९६, १२ × ३ = ३६, १२ × २ = २४, १० × २ = २०, ९ × १ = ९ इत्यादि। इत्थं गुण्यगुणकयोरेकतरस्यात्यन्ताल्पत्वे फलस्याप्यत्यन्ताल्पत्वं युक्तिसिद्धम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र गुणनायागतं शून्यं पृथग् न्यस्तं रू २ं एतत्स्वार्द्धयुतम् ३ं

भागहरणायागतं शून्यं हरस्थाने न्यस्तम् $\frac{३ं}{०}$

शून्यं गुणकः शून्यं भागहारोऽतो गुणनभजने न कार्ये, तथा कृते जातोऽविकृतः ३ यः कश्चिद्राशिः केनचिद् गुणितः पुनस्तेनैव भक्तश्चेदविकृत एव भवति तर्हि गुणनभजने वृथा। अथ तथा कृते जातम्- ३

अत्र त्रैराशिकम्-

यदि दृश्येनानेन ३ अयं राशिः २ तदा द्वादशभिः किमिति जातो राशिः ८

इति शून्यस्य द्वे षड्विधे ॥

---

[1]अथाव्यक्तसंकलनव्यवकलने-

यावत्तावत्कालकनीलकपीताश्च लोहितो हरितः।
श्वेतकचित्रककपिलकपाटलकाः पाण्डुधूम्रशबलाश्च ॥ १७ ॥

परन्तु तदत्यन्ताल्पमानबोधकसंख्याङ्काभावाद् वक्तुमशक्यत्वाद्वा शून्यमेव तादृशत्वेन व्यवह्रियते। ज्ञायतेऽनेन यच्छून्यस्य स्वरूपद्वयम्—अभावरूपमेकं संख्यासु स्थानाङ्काभावद्योतकम्। यथा १८, १०८, १००८ इत्यत्र दशकशतकस्थानीयं शून्यं तत्तत्स्थानेष्वङ्काभावद्योतकम्। द्वितीयन्तु फलस्य परमापचयोपचयबोधकमिति। यथा ५ × ० अत्र गुणकस्य परमापचयबोधकमेव शून्यम्। न तु गुणकसंख्याभावद्योतकम्। तथैव $\frac{५}{०}$ अत्रापि भाजकस्य परमापचयद्योतकं शून्यम्। अत्र लब्धिरपि खहरत्वेनानन्ता, परमोपचितेत्यर्थः। अमुमेव सिद्धान्तमवलम्ब्योदाहरणं प्रदर्श्यते—

राशिः कोऽपि खसंगुणो निजदलेनाढ्य इति। अत्र कल्पितो राशिः २। अयं खसंगुणः २ × ०। स्वार्द्धयुतः ३ × ०। खभाजितः $\frac{३ \times ०}{०}$। यः कश्चिद् राशिः केनचिद् गुणितः पुनस्तेनैव भक्तश्चेदविकृत एव तिष्ठति। तर्हि गुणनभजने वृथा। एवं कृते जातम् ३। अतोऽत्र त्रैराशिकम्—यदि दृश्येनानेन ३ राशिः २ तदा द्वादशभिः किमिति $\frac{२ \times १२}{३} = ८$ अतोऽत्र राशिमानम् ८।

[1] अव्यक्तकल्पनायां स्वबीजे भास्करोऽपि—"यावत्तावत्कालको नीलकोऽन्यो वर्णः पीतो लोहितश्चैतदाद्याः। अव्यक्तानां कल्पिता मानसंज्ञास्तत्संख्यानं कर्तुमाचार्यवर्यैः॥" इति। अव्यक्तानां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्यामलकमेचकधवलकपिशङ्गशारङ्गबभ्रुगौराद्याः ।
गणनोत्पत्त्यै विहिताः संज्ञाश्चाव्यक्तमानानाम् ॥ १८ ॥
वर्णेषु च समजात्योर्योगः कार्यस्तथा वियोगश्च ।
असदृशजात्योर्योगे पृथक् स्थितिः स्याद्वियोगे च ॥ १९ ॥
क्षयधनयोर्युतिवियुती गुणनभजने वर्गवर्गमूले च ।
अव्यक्तानां बहूनां रूपवदुपलक्षणं भवति ॥ २० ॥

गणनेति योगवियोगगुणनभजनवर्गवर्गमूलघनघनमूलत्रैराशिकपञ्चराशिक-श्रेढीक्षेत्रखातादि; यथोद्देशालापवत्त्वादेषां या गणना तस्या गणन[ा]या उत्पत्त्यै अवताराय वर्णाः कल्पिताः । यावत्तावत्कालक-नीलक-पीतक-लोहितक-हरितक-चित्रक-कपिलक-पाटलक-पाण्डुरक-धूम्रक-शबलक-श्यामलक-मेचक-धवलक-पिशङ्गक-सारङ्गक-बभ्रुक-गौरकेत्याद्या वर्णाः, अथवा वर्णाः कादयः, अथवा मधुरादयो रसपर्यायाः, अथवाऽसदृशप्रथमाक्षरनामपर्यायपदार्थाः कल्प्यन्ते । एषु समजात्योर्बहूनां वा योगवियोगौ कार्यौ । असदृशजात्योर्बहूनां वा वर्णानां पृथक् स्थितिः स्यात् । तेषामव्यक्तानामृणधनयोगाद्युपलक्षणं रूपवद्भवतीति ।

उदाहरणम्—

[1]अव्यक्तषट्कं च धनं सरूपमव्यक्तयुग्मं च विपञ्चरूपम् ।
किं मेऽनयोरैक्यमृणं धनं च यद्व्यस्तयोः संकलनं वदाशु ॥ ९ ॥

योगोऽन्तरश्च सजातीयानामेव भवतः । यथा पञ्चभिर्घोटकैः सह सप्तानां घोटकानां योगे द्वादश घोटकाः स्युः । न ह्यत्र पञ्चभिर्घोटकैः सह सप्तानां गर्दभानां योगे द्वादशघोटका भवन्ति, भिन्नजातित्वात्तत्र पृथक् स्थितिरेव ।

१ अव्यक्तषट्कमिति । यथा— या ६ रू १ । या २ रू ५̇
समजात्योः स्वस्थाने योगे जातम्— या ८ रू ४̇
नव्यैस्तु— (६ या + १) + (२ या − ५)
= ८ या − ४
नवीनप्राचीनरीत्योः कुत्रापि फले न विकृतिः । किन्तु लेखनप्रकारभिन्नत्वेन भिन्ना रीतिः प्रतीयते । अत्र पठितोदाहरणानां प्राच्यगणितं ग्रन्थकर्तृभिः स्पष्टमुक्तम् । अतो नूतनां रीतिमनुसृत्याग्रे क्रिया प्रदर्श्यंते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यासः–या ६ रू १। या २ रू ५ं

समजात्योः स्वस्थान इति जातं न्यस्ते–या ६ रू १
या २ रू ५ं

ऋणधनयो रूपवदुपलक्षणमिति योगे जातम्–या ८ रू ४ं

[1]आद्यपक्षस्यर्णत्वं प्रकल्प्य न्यासः–या ६ं रू १ं
या २ रू ५ं

योगे जातम्–या ४ं रू ६ं

[2]द्वितीयपक्षवैपरीत्यं कृत्वा न्यासः–या ६ रू १
या २ं रू ५

या ४ रू ६। [3]उभयोर्व्यत्यासे न्यासः– या ६ं रू १ं
या २ं रू ५

योगे जातम्–या ८ं रू ४

उदाहरणम्—

[4]अव्यक्तवर्गद्वितयं सरूपमव्यक्तयुग्मेन युतं च किं स्यात्।
[5]अव्यक्तषट्कं क्षयगं सरूपं शोध्यं तु षड्रूपकसंयुतेभ्यः॥ १०॥

---

(१) (—६ या—१)+(२ या—५)
= —४ या—६

(२) (६ या + १) + (—२ या + ५)
= ४ या + ६

(३) (—६ या—१) + (—२ या + ५)
= —८ या + ४

(४) (२ या^{2} + १) + २ या
= २ या^{2} + २ या + १

(५) (८ या + ६)—(—६ या + १)
= १४ या + ५

(संशोध्यमानं स्वमृणत्वमेति तथा ऋणं स्वत्वमेति. पूर्वोक्तविधिना।)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अव्यक्तकेभ्यो गणक प्रचक्ष्वाष्टाभ्योऽवशेषं यदि वेत्सि बीजम् ॥

प्रथमोदाहरणे न्यासः–या व २ या० रू १
या व ० या २ रू ०

योगे जातम्–या व २ या २ रू १

द्वितीयोदाहरणे न्यासः—या ८ रू ६
या ६ं रू १

शुद्धे जातम्–या १४ रू ५

इत्यव्यक्तसंकलनव्यवकलने ॥

अथाव्यक्तगुणने करणसूत्रम्—

स्याद्रूपवर्णघाते वर्णो द्वित्र्यादितुल्यजातिवधे ।
तत्कृतिघनादयः स्युस्तद्भावितमसमजातिवधे ॥ २१ ॥
गुणकारसमुत्थानि स्वजातिखण्डानि योजयेदेवम् ।
अव्यक्तवर्गकरणीगुणनासु व्यक्तवज्ज्ञेयम् ॥ २२ ॥

[1]उदाहरणम्—

यावत्तावद्द्वितयसहितं रूपषट्कं विनिघ्नं
यावत्तावत्त्रितयरहितै रूपकैः पञ्चभिश्च ।
गौणं किं स्याद्वद मम फलं हे सखे कल्पयित्वा
व्यक्तं वर्णं पटुरसि यदि त्वं गुणाकारमार्गे ॥ ११ ॥

---

१ गुणनोदाहरणे—

२ या + ६	गुण्यः
− ३ या + ५	गुणकः

− ६ या^{2} − १८ या + १० या + ३० = गुणनफलम्
= − ६ या^{2} − ८ या + ३०

गुण्यस्य व्यत्यासे—

− २ या − ६	गुण्यः
३ या − ५	गुणकः

− ६ या^{2} − १८ या + १० या + ३० = गुणनफलम्
= − ६ या^{2} − ८ या + ३०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यासः- गुण्यः या २ रू ६। गुणकः या ३ं रू ५

व्यक्तवद्गुणिते जातम्- या व ६ं रू ३० या ८ं

गुणकस्य धनर्णयोर्व्यत्यासे न्यासः- या २ रू ६। या ३ रू ५ं

गुणिते जातम्- या व ६ या ८ रू ३०ं

गुण्यस्य व्यत्यासे न्यासः- या २ं रू ६ं। या ३ं रू ५

गुणिते जातम्- या व ६ या ८ रू ३०ं

गुण्यगुणकयोर्व्यत्यासे न्यासः- या २ं रू ६ं। या ३ रू ५ं

गुणिते जातम्- या व ६ं या ८ं रू ३०

इत्यव्यक्तगुणना ॥

---

[1]अव्यक्तभागहारे सूत्रम्-

शुद्ध्यति यैर्यैर्वर्णै रूपैर्भाजको हतो भाज्यात्।

क्रमशः स्वेषु स्वेषु स्थानेषु फलानि तानि स्युः ॥ २३ ॥

गुणनफलस्य गुण्यभागहारस्य भागार्थं न्यासः— | या व ६ं या ८ं रू ३० / या २ रू ६ |

| या व ६ या ८ रू ३०ं / या २ रू ६ | या व ६ या ८ रू ३०ं / या २ं रू ६ं | या व ६ं या ८ं रू ३० / या २ं रू ६ं |

भागे हृते जातो गुणः- या ३ं रू ५, या ३ रू ५ं, या ३ं रू ५, या ३ रू ५ं

इत्यव्यक्तभागहारः ॥

---

[1] भागहारः—

२ या + ६) − ६ या^{२} − ८ या + ३० (− ३ या + ५

− ६ या^{२} − १८ या

× १० या + ३०

१० या + ३०

×

एवमग्रेऽपि।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[अव्यक्तवर्गोदाहरणम्]—

अव्यक्तानां रूपपञ्चोनितानां षण्णां वर्गं वा युतानां प्रचक्ष्व।
चेद्बीजज्ञोऽसि त्वमस्याः कृतेश्च मूलं विद्वन्ब्रूहि तन्मे पृथक्किम् ॥ १२॥

न्यासः– या ६ रू ५̇, या ६ रू ५

[1]स्थाप्यान्त्यकृतिर्द्विसंगुणान्त्यगुणेत्यादिना जातौ वर्गौ– या व ३६ या ६०̇ रू ·५, या व ३६ या ६० रू २५

[अव्यक्तवर्गमूले] सूत्रम्—

मूलान्यादायादौ वर्गेभ्यस्तद्द्वयोर्द्वयोर्घातम्।
द्विगुणं जह्याच्छेषान्मूलमितीदं वदन्तीह ॥ २४॥

पूर्ववर्गमूलार्थं न्यासः– या व ३६ या ६०̇ रू २५, या व ३६ या ६० रू २५

एतयोर्मूले– या ६ रू ५̇, या ६ रू ५

इत्यव्यक्तवर्गमूले ॥

इत्यव्यक्तषड्विधम् ॥

---

१ स्थाप्यान्त्यकृतिर्द्विसंगुणेत्यादि। समद्विघातः कृतिरेवेत्यादिनाऽऽगतो वर्गो गुणनविशेषपरिमाषैव। परन्तु यदि संख्यायामङ्कस्थानं द्व्यधिकं चेत्तदा अ + क अस्य वर्गानयने—

$$(\text{अ} + \text{क})^2 = (\text{अ} + \text{क}) (\text{अ} + \text{क})$$
$$= \text{अ} \times \text{अ} + \text{अ} \times \text{क} + \text{अ} \times \text{क} + \text{क} \times \text{क}$$
$$= \text{अ}^2 + 2\, \text{अ} \times \text{क} + \text{क}^2$$

स्वरूपमिदमुपपद्यते। एतदवलोकनेनेदमुपपन्नं भवति—
अन्त्यस्य वर्गः स्थाप्यः, तथाऽपरेऽङ्का द्विसंगुणान्त्यगुणिताः स्वस्वोपरिष्टात् स्थाप्याः। अन्त्यं त्यक्त्वा उपान्तिमराशिं संगृह्य पुनश्चैवमेव क्रिया कार्या। एवं कृते सति वर्गितराशिर्निष्पद्यते।

यथा— $(\text{या } ६ - ५)^2 = ३६ \text{ या}^2 - \text{या } ६० + २५$

अथवा— $(\text{या } ६ + ५)^2 = ३६ \text{ या}^2 + \text{या } ६० + २५$

अत्र भास्करोक्तं सूत्रं यथा—

समद्विघातः कृतिरुच्यतेऽथ स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नाः।
स्वस्वोपरिष्टाच्च तथाऽपरेऽङ्कास्त्यक्त्वान्त्यमुत्सार्य पुनश्च राशिम् ॥ इति।

अस्य वर्गसूत्रस्य विलोमविधिनैव मूलानयनमपि सुगमम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदाहरणम्—

[1]यावत्तावत्त्रितयमधनं कालकाः षट् क्षयं भो
विद्वन्नीलाष्टकमपि धनं पीतकाः स्वं च पञ्च।
रूपाद्यैस्तैर्द्विगुणितमितैस्तेऽपि युक्ता वियुक्ता
जानासि त्वं यदि झटिति मे ब्रूहि वर्णाः कति स्युः ॥ १३ ॥
तैस्तैर्हताः कथय किं गुणने फलं स्याद्भक्तं च तद्गुणकवर्गगुणेन तेन ।
गुण्यस्य मे कथय वर्गमतश्च मूलं चेद्वर्णषड्विधविधाववधिं गतोऽसि ॥१४॥

न्यासः- गुण्यः या ३̇ का ६̇ नी ८ पी ५ रू १
गुणकः या ६̇ का १२̇ नी १६ पी १० रू २

गुणिते जातम्- या व १८ या का ७२ या नी ९६̇ या पी ६०̇ या १२̇ का व ७२ का नी १९२̇ का पी १२०̇ का २४̇ नी व १२८ नी पी १६० नी ३२ पी व ५० पी २० रू २

एत एव यथाक्रमेण न्यस्ता जाताः- या व १८ का व ७२ नी व १२८ पी व ५० या का ७२ या नी ९६̇ या पी ६०̇ का नी १९२̇ का पी १२०̇ नी पी १६० या १२̇ का २४̇ नी ३२ पी २० रू २

---

१ −३ या −६ का + ८ नी + ५ पी + १ = गुण्यः
−६ या −१२ का + १६ नी + १० पी + २ = गुणकः

=

१८ या^{2} + ३६ या का − ४८ या नी − ३० या पी − ६ या
+ ७२ का^{2} + ३६ या का − ९६ का नी − ६० का पी − १२ का
+ १२८ नी^{2} − ४८ या नी − ९६ का नी + ८० नी पी + १६ नी
+ ५० पी^{2} − ३० या पी − ६० का पी + ८० नी पी + १० पी
−६ या − १२ का + १६ नी + १० पी + २

गुणनफलम् = १८ या^{2} + ७२ का^{2} + १२८ नी^{2} + ५० पी^{2} + ७२ या का
− ९६ या नी − ६० या पी − १९२ का नी − १२० का पी + १६० नी पी
− १२ या − २४ का + ३२ नी + २० पी + २

अव्यक्तरीत्या गुणने रूपवर्णाभिहतिर्वर्णो भवेत्। तथा द्वित्रिसमजातिघाते वर्गघनादयः पूर्ववदेव भवन्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भक्ते जातो गुणकः– या ६ं का १२ं नी १६ पी १० रू २

इति वर्णगुणनभजने ॥

वर्गार्थं न्यासः– या ३ं का ६ं नी ८ पी ५ रू १

उक्तवज्जातो वर्गः– या व ९ या का ३६ या नी ४८ं या पी ३०ं या ६ं का व ३६ का नी ९६ं का पी ६० का १२ नी व ६४ नी पी ८० नी १६ पी व २५ पी १० रू १

यथाक्रमं न्यासः– या व ९ का व ३६ नी व ६४ पी व २५ या का ३६ या नी ४८ं या पी ३०ं का नी ९६ं का पी ६०ं नी पी ८० या ६ं का १२ं नी १६ पी १० रू १

अस्माद्वर्गाज्जातं मूलम्– या ३ं का ६ं नी ८ पी ५ रू १

इति वर्णवर्गवर्गमूले ॥

इति वर्णषड्विधम् ॥

अथ करणीषड्विधम्–

[1]मूले ग्राह्ये राशेर्यस्य तु करणीति नाम तस्य स्यात् ।
संगुणनं भजनं वा कुर्याद्वर्गस्य वर्गेण ॥ २५ ॥

---

१ मूले ग्राह्य इति । अस्ति मूलं द्विविधम्–अङ्कात्मकं रेखात्मकं च । अङ्कात्मकं मूलं वर्गाङ्कानामेव भवति (१, ४, ९, १६, २५ इत्यादयो वर्गाङ्काः) । यद्धि देशकालवस्तुषु सर्वत्रैवोपयुज्यते । रेखात्मकं मूलं वर्गाङ्कानामवर्गाङ्कानां सर्वेषामेव भवितुमर्हति, किन्तु रेखात्मकमूलस्य न कुत्राप्यवसानम् । अतस्तस्य स्पष्टमूलं वस्तुगतं कथमपि न संभवति । यथा–'पञ्च' इत्यस्य मूलविचारे द्विराशिवर्गः ४ अयं पञ्चाल्पः,त्रिराशिवर्गः ९ अयं पञ्चतोऽधिकः। अतोऽस्ति द्वित्रिराश्योर्मध्ये कश्चिद्राशिर्यस्य वर्गः पञ्चतुल्यः । परन्तु तद्राशिमानं वस्तुगतं स्पष्टं कथयितुमशक्यम् । यतो हि द्वित्रिराश्योर्मध्येऽभिन्नराश्यङ्कस्याभावाद् मूलराशिर्भिन्नात्मक एव भवितुमर्हति । किन्तु भिन्नाङ्कः स्वगुणितो भिन्नत्वं न जहातीत्यतः प्रत्यक्षप्रामाण्याद्यस्य वर्गराशेर्निरग्रं मूलं न संभवति तन्मूलमेव करणीत्युच्यते [श्रीपतिकृतसिद्धान्तशेखरेऽस्य स्फुटत्वम्] । यथा २ क, ३ क, ५ क, वा नवीनमते $\sqrt{२}$, $\sqrt{३}$, $\sqrt{५}$, इत्येवमादयः । तदर्थश्च द्वितुल्यराशिकारकं मूलं त्रितुल्यराशिकारकं वा मूलमित्यादि ।
यद्यपि करणीयोगेऽपेक्षिते वर्गमूलानयनप्रकारेणैव तदासन्नमूलं (सावयवात्मकं यथा-स्यात्तथा) गृहीत्वा तयोर्मूलयोर्योगेन करणीयोगो भवितुं शक्यः, अत्र फलस्यान्तरमपि नगण्यमेव;

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लघ्व्या वापि महत्या पृथक्करण्यौ हृते च तत्पदयोः ।
युतिवियुती कृती च तया गुणिते योगान्तरे भवतः ॥ २६ ॥
गुणिते वापि करण्यावनल्पया वाऽल्पया च तत्पदयोः ।
युतिवियुतिकृती भक्ते ह्यभीष्टया योगविवरे च स्तः ॥ २७ ॥
अथवा लघ्व्या महती भक्त्वैकं तन्मूलयुक्तोनम् ।
स्वघ्नं लघ्व्या गुणितं युतिवियुती स्तो महत्येव ॥ २८ ॥
रूपवदपि च करण्योर्घातपदेन द्विसंगुणेन युतिः ।
युक्तोना युतिर्वियुती पृथक्स्थितिः स्यान्न घातपदम् ॥ २९ ॥

तथापि वस्तुव्यवहारेष्वस्य प्रयोजनाभावात् क्षेत्रव्यवहारादौ कर्णरेखामाननिर्णयाच्च निश्चितमूलानयने प्राप्ते तथाविधेनासन्नमूलसंकलनादिना कार्यसिद्धेरसंभवात् प्रयोजनमस्यास्त्येव । यतो हि वस्तुतो मूलानयनविधिनाऽऽसन्नमूलमानीय संकलनादिनोपस्थापने तु तस्य मूलस्यासन्नत्वात् सिद्धान्ते च वास्तवमानस्यावश्यकत्वात् करणीनां पूर्वोक्तप्रकारेण (आसन्नमूलेन) संकलनादिकं परित्यज्य साक्षात्करणीमेवाश्रित्य संकलनादिकं प्रदर्श्यते । करणीनां योगेऽन्तरे च कर्तव्ये बहवः प्रकाराः सन्ति शास्त्रेषु । ते खलु वर्गयोगान्तरविलोमविध्यन्तर्गताः सन्ति । यथा वर्गयोगो द्विगुणघातसमन्वितो युतिवर्गो भवति । युतिवर्गः $= (\text{अ} + \text{ब})^2$

$$= (\text{अ}^2 + \text{ब}^2 + 2\,\text{अ}\,\text{ब}) = \text{अ}\,\text{अ} + \text{ब}\,\text{ब} + 2\,\text{अ}.\text{ब} = (\text{अ} + \text{ब})^2$$

वर्गयोगो द्विगुणघातविरहितोऽन्तरवर्गो भवति । यथा $(\text{अ}^2 + \text{ब}^2 - 2\,\text{अ}\,\text{ब}) = (\text{अ} - \text{ब})^2$

$$= (\text{अ}\,\text{अ} + \text{ब}\,\text{ब} - 2\,\text{अ}\,\text{ब}) = (\text{अ} - \text{ब})^2$$

तथैव करणीविषयेऽपि मूलयोर्वर्गयोगः करणीद्वयघातमूलेन द्विघ्नेन योज्यो युतिवर्गार्थम्, वियोज्यश्चान्तरवर्गार्थम् ।

तथा च–"खण्डद्वयस्याभिहतिर्द्विनिघ्नी तत्खण्डवर्गैक्ययुता कृतिः स्यात्" इत्यादिप्रकारेण तन्मूलग्रहणेनैव करणीनां योगान्तरे भवतः । अथवा यदि कश्चिदवर्गाङ्कस्तेनैवावर्गाङ्केन गुण्यते भज्यते वा तदा सोऽवर्गाङ्को वर्गत्वं प्राप्नोति (प्रत्यक्षयुक्त्या) । एतद्रीत्या गतवर्गाङ्कस्य मूलं संगृह्य रूपवद्योगान्तरे वा विधाय ते करणीगते कृत्वा प्राक्तनो योऽवर्गाङ्को गुणको भाजको वाऽस्ति तेन भाजिते गुणिते वा (पूर्वं यदि गुणितस्तदेदानीं भाजितः, पूर्वं यदि भाजितस्तदेदानीं गुणितः) करणीनां योगवियोगावेव भवतः । अथवा, येनापवर्तनाङ्केन करणी मूलदा भवेत्तेनैवापवर्तनं दत्त्वा मूलमानीय रूपवद्योगान्तरे वा विधाय पुनस्ते करणीगते कृत्वा पूर्वदत्तापवर्तनाङ्केनापवर्तिते योगान्तरे सुतरां स्पष्टे एव । एभिः प्रकारैराचार्यैर्गणितं प्राचीनलेखपद्धत्या दर्शितम्, तत्स्पष्टमेव ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

करणीनां तु बहूनां योगे केनापि राशिना छित्वा ।
तन्मूलयुतिः स्वघ्ना छेदगुणा स्याद्युतिस्तासाम् ॥ ३० ॥

[१]उदाहरणम्—

षट्सिद्धसंख्ययोर्योगविशे [?श्ले] षौ वद मे द्रुतम् ।
करण्योर्द्वित्रिमित्योश्च योगशेषे तयोर्वद ॥ १५ ॥

न्यासः– क ६ क २४ अत्र लघ्व्या ६ भक्ते १।४
अथवा महत्या भक्ते $\frac{१}{४}$।१ मूले १।२ वा $\frac{१}{२}$।१
युतिवियुती ३।१ वा $\frac{३}{२}$।$\frac{१}{२}$ कृती ९।१ वा $\frac{९}{४}$।$\frac{१}{४}$
लघ्व्या गुणिते ५४।६ महत्या वा ५४।६

जाते योगान्तरे क ५४ क ६ । द्वितीयप्रकारेण क ६ क २४ । एते महत्या २४ गुणिते १४४।५७६ लघ्व्या वा ३६।१४४ अनयोर्मूले १२।२४ वा ६।१२

---

१ $\sqrt{६} + \sqrt{२४}$ अत्र ६ अनेनापवर्तनाङ्केनापवर्तिता करणी $= \sqrt{१} + \sqrt{४}$
$= १ + २ = ३ = \sqrt{९}$

तेनैवापवर्तनाङ्केन गुणिते $\sqrt{९ + ६} = \sqrt{५४}$ अयमेव योगः ।

अथवा– $\sqrt{६} + \sqrt{२४}$ अत्र २४ अनेनापवर्तनाङ्केनापवर्तिता $= \sqrt{\frac{१}{४}} + \sqrt{१}$
$= \frac{१}{२} + १ = \frac{३}{२} = \sqrt{\frac{९}{४}}$

तेनैवापवर्तनाङ्केन गुणिते $\sqrt{\frac{९}{४} \times २४} = \sqrt{५४}$ अयमेव योगः ।

अथवा $\sqrt{६} + \sqrt{२४}$ अत्र ६ अनेनाङ्केन गुणिता $= \sqrt{३६} + \sqrt{१४४} = ६ + १२ = १८$
$= \sqrt{३२४}$

तेनैवापवर्तनाङ्केन भाजिते $\sqrt{\frac{३२४}{६}} = \sqrt{५४}$ अयमेव योगः ।

अथवा २४ अनेनाङ्केन गुणिते $= \sqrt{१४४} + \sqrt{५७६} = १२ + २४ = ३६ = \sqrt{१२९६}$

तत एव भाजिते $\sqrt{\frac{१२९६}{२४}} = \sqrt{५४}$ अयमेव योगः ।

अथवा $\sqrt{६} + \sqrt{२४}$ खण्डद्वयस्याभिहतिर्द्विनिघ्नीत्यादिप्रकारेण—

$= ६ + २४ = ३०$ बृहत्
$\sqrt{६} \times \sqrt{२४} = \sqrt{१४४} = १२$
$१२ \times २ = २४$ लघु
(बृ. + ल.) $= ३० + २४ = ५४$
अस्य मूलम् $= \sqrt{५४}$ अयमेव योगः ।

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

युतिवियुती ३६।१२ वा १८।६ कृती १२९६।१४४ वा ३२४।३६ महत्या भक्ते लघ्व्या वा भक्ते जाते योगान्तरे क ५४ क ६

अथवा तृतीयप्रकारः– क ६ क २४ लघ्व्या ६ महती, महत्या वा लघ्वी भक्ता ४। वा $\frac{१}{४}$ मूलम् २। वा $\frac{१}{२}$ एकयुतमूनं च ३।१ वा $\frac{३}{२}$। $\frac{१}{२}$ स्वघ्नं ९।१ वा $\frac{९}{४}$। $\frac{१}{४}$ लघ्व्या ६ महत्या २४ वा भक्ते जाते योगान्तरे क ५४ क ६

अथ चतुर्थप्रकारः– क ६ क २४ एते रूपाणि [? रूपे] प्रकल्प्य रू ६ रू २४ घातपदे १२ तद्द्विगुणेन २४ करण्योर्युतिः ३० युतोना [? युतोने] जाते योगान्तरे करण्यौ क ५४ क ६।

अन्तरार्थमपि तथैव गणितम्– $\sqrt{२४} - \sqrt{६}$ अत्रापवर्तनाङ्कः ६ इत्यनेन भाजिते–
$$\sqrt{४} - \sqrt{१} = २ - १ = १ = \sqrt{१}$$
येनापवर्तनाङ्केन पूर्वं करणी भाजिता तेनैवात्र गुणिते $\sqrt{१ \times ६} = \sqrt{६}$ = वियोगः।

अथवाऽपवर्तनाङ्कः २४, अनेनापवर्तनाङ्केनापवर्तिता करणी तदा $\sqrt{२४} - \sqrt{६} = \sqrt{१} - \sqrt{\frac{१}{४}}$
$$= १ - \frac{१}{२} = \frac{१}{२} = \sqrt{\frac{१}{४}}$$
पुनरपवर्तनाङ्केन २४ अनेन गुणिते $\sqrt{\frac{१}{४} \times २४} = \sqrt{६}$ = वियोगः।

अथवाऽपवर्तनाङ्कः ६ अनेन गुणिते $\sqrt{२४} - \sqrt{६} = \sqrt{१४४} - \sqrt{३६} = १२ - ६ = ६ = \sqrt{३६}$
६ इत्यनेन पुनर्भाजिते $\sqrt{\frac{३६}{६}} = \sqrt{६}$ = वियोगः।

अथवा $\sqrt{२४} - \sqrt{६}$ अत्र २४ अनेनापवर्तनाङ्केन गुणिते $\sqrt{५७६} - \sqrt{१४४} = २४ - १२$
$$= १२ = \sqrt{१४४}$$
अव्यवहितोक्तापवर्तनाङ्केन भाजिते $\sqrt{\frac{१४४}{२४}} = \sqrt{६}$ = वियोगः।

अथवा खण्डद्वयस्याभिहतिरित्यादिना–

$\sqrt{२४} - \sqrt{६}$

२४ + ६ = ३० बृ. क.

$\sqrt{२४ \times ६} = \sqrt{१४४} = १२$

१२ × २ = २४ ल. क.

बृ. – ल. = क ३० – क २४ = $\sqrt{६}$ = वियोगः।

द्वितीयोदाहरणे $\sqrt{२} + \sqrt{३}$ अत्र करण्योर्घाते मूलाभावात् पृथक् स्थितिरेव। अतः–
$\sqrt{२} + \sqrt{३}$ अयमेव योगः। $\sqrt{३} - \sqrt{२}$ अयमेव वियोगः।

इति करणीसंकलनव्यवकलने ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वितीयोदाहरणे करण्यौ क २ क ३ अनयोर्घाते मूलाभावात् पृथक् स्थितिरिति योगे जातम्– क २ क ३ अन्तरे च क २ क ३

इति करणीसंकलनव्यवकलने ॥

करणीगुणनादौ सूत्रम्–

[1]करणीनां बहूनां यासां संयोगसंभवोऽप्यस्ति ।
तासां योगं कृत्वा कार्यं गुणनादि वा कर्म ॥ ३१ ॥
क्षयरूपकृतिः क्षयगा भवेद्यतस्तु प्रयाति करणीत्वम् ।
क्षयगतकरणीमूलं रूपत्वं क्षयागतं भवति ॥ ३२ ॥

[2]उदाहरणम्—

षड्रूपाद्या गणक करणी पञ्चसंख्या च गुण्यो
द्वेष्टौ पञ्चप्रमितकरणीखण्डसंख्यागुणश्च ।
षड्रूपोने शरनखमिते वा गुणे किं फलं स्यात्
तद्गुण्याप्तां वद गुणमितिं प्रौढता चेत्तवास्ति ॥१६॥

प्रथमं न्यासः– गुण्यः क ३६ क ५ गुणकः क ८ क ५ क २

---

१ करणीनामिति । अत्र करणीगुणनेऽपि गुण्ये गुणके वा करणीनां करण्योर्वा यथासंभवं लाघवार्थं योगं विधाय गुणनं कार्यम् । "क्षयरूपकृतिः क्षयगा....." इत्यादिकथनमत्रावश्यकम् । यतः करणीगुणनार्थं रूपवर्गः क्रियते । स यद्यपि धनात्मक एव तथापि तस्य मूलमृणात्मकमेव, "स्वयोरस्वयोर्वा वधः स्वं भवति" इति युक्त्या । करणीनां योगेन मूलयुतिवर्गः साध्यते । तत्र क्षयरूपवर्गकरण्या यदि धनत्वं कल्प्यते तदान्यया धनकरण्या सह तस्या योगो भवति, तन्मूलं च मूलयुतिरेव; तन्न सत् । अतः क्षयरूपकरणीवर्गः क्षयात्मक एव तथा क्षयगतकरणीमूलमपि ऋणमेव । एवं च करण्या ऋणसंज्ञा मूलस्य ऋणत्वबोधार्थमेव कृता ।

२ गुण्यः $=\sqrt{३६}+\sqrt{५}$ । गुणकः $=\sqrt{८}+\sqrt{५}+\sqrt{२}$

अत्र गुणके $\sqrt{२}+\sqrt{८}$ इत्यत्र २ अनेनापवर्तनाङ्केन गुणिते—

$$\sqrt{४}+\sqrt{१६}=२+४=६=\sqrt{३६}$$

पुनरपवर्तनाङ्केन विपरीतापवर्तने $=\sqrt{\frac{३६}{२}}=\sqrt{१८}=$ योगः

$\therefore$ गुण्यः $\sqrt{३६}+\sqrt{५}$ । गुणकः $\sqrt{१८}+\sqrt{५}$

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणिते जातम्– क २८८ क १८० क ७२ क ४० क २५ क १०
एतास्वनयोः क २८८ क ७२ योगे जातम्– क ६४८
पुनरेनयोः क ४० क १० योगे जातम्– क ९०
पुनरस्याः क २५ मूलम्– रू ५
यथाक्रमं न्यासः– रू ५ क ६४८ क १८० क ९०
अथवा लघुकर्मणा गुण्यः– क ३६ क ५ गुणकः क ८ क ५ क २
द्विकाष्टमित्योर्योगे कृते जातो गुणकः– क १८ क ५
गुणिते जातं तदेव– रू ५ क ६४८ क १८० क ९०
द्वितीयोदाहरणे गुण्यः– क ३६ क ५ गुणकः– क ३६ क २० क ५
गुणिते जातम्– क १२९६ क ७२० क १८० क १८० क १०० क २५
एतास्वासां क १२९६ क १०० क २५ मूलानि ३६ रू १ क ५
योगः रू २१ पुनरनयोः क १८० क १८० योगमिमामस्यां क ७२०
संयोज्य जातम्– क ७२० वा लघुकर्मणि वा गुण्यः क ३६ क ५

$(\sqrt{३६}+\sqrt{५})(\sqrt{१८}+\sqrt{५})$

$=\sqrt{६४८}+\sqrt{९०}+\sqrt{१८०}+\sqrt{२५}=$ गुणनफलम् । परन्तु $\sqrt{२५}=५$

$\therefore$ गुणनफलम् $=५+\sqrt{६४८}+\sqrt{१८०}+\sqrt{९०}$

अथवा $(\sqrt{३६}+\sqrt{५})(\sqrt{२}+\sqrt{८}+\sqrt{५})$

$=\sqrt{७२}+\sqrt{२८८}+\sqrt{१०}+\sqrt{४०}+\sqrt{१८०}+\sqrt{२५}=$ गुणनफलम् ।

अत्र $\sqrt{७२}+\sqrt{२८८}=\sqrt{६४८}$

तथा $\sqrt{१०}+\sqrt{४०}=\sqrt{९०}$ । $\sqrt{२५}=५$

$\therefore$ गुणनफलम् $=५+\sqrt{६४८}+\sqrt{१८०}+\sqrt{९०}$

द्वितीयोदाहरणेऽपि तथैव । यथा— गुण्यः $\sqrt{३६}+\sqrt{५}$ ।

गुणकः– $\sqrt{३६}+\sqrt{२०}+\sqrt{५}$

$=(\sqrt{३६}+\sqrt{५})(-\sqrt{३६}+\sqrt{२०}+\sqrt{५})$

अत्र गुणके $\sqrt{२०}+\sqrt{५}=\sqrt{४५}$

$\therefore(\sqrt{३६}+\sqrt{५})(-\sqrt{३६}+\sqrt{४५})$

$=-\sqrt{१२९६}-\sqrt{१८०}+\sqrt{१६२०}\sqrt{२२५}$

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३।।२८०

सारस्वत्यां सुषमायां प्रकाशिता ग्रन्थाः

१ प्रत्याख्यानसंग्रहः (व्याकरणम्) नागेशभट्टप्रणीतः । श्रीसूर्यनारायणशुक्ल–श्री. अनन्तशास्त्रि-फडके–श्रीदेवदत्तशर्मोपाध्यायैः संपादितः ।

२ सुवर्णमुक्तासंवादः (लघुकाव्यम्) श्रीमहेशमनीषिणा विरचितः । खिस्तेश्रीवटुकनाथशास्त्रिणा साहित्याचार्येण संपादितः ।

३ पथिकजनपातकचिन्तनस्मृतिः (यात्रावर्णनम्) महेश्वरभट्टप्रणीता । श्रीव्रजवल्लभद्विवेदेन दर्शनाचार्येण संपादिता ।

प्रकाश्यन्ते

४ काण्वसंहिताभाष्यसंग्रहः (वेदः) आनन्दबोधभट्टोपाध्यायप्रणीतः । डा० सुभद्रझा–व्रजवल्लभ-द्विवेदाभ्यां संपादितः ।

५ प्रत्यङ्गिरासूक्तम् (पिप्पलादशाखीयम्) (वेदः) वासुदेवद्विवेदविरचितव्याख्यानसहितम् । डा० सुभद्रझा-व्रजवल्लभद्विवेदाभ्यां संपादितम् ।

६ बीजगणितावतंसः (गणितज्यौतिषम्) नारायणपण्डितविरचितः । श्रीचन्द्रभानुपाण्डेयेन ज्यौतिषाचार्येण संपादितः ।

Published by the Superintendent, Printing and Stationery, U. P. Allahabad.

मुद्रक—पं० बैकुण्ठनाथ भार्गव, आनन्दसागर प्रेस, गायघाट, बनारस १.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi